KÂVYAMÂLÂ.

A collection of old and rare Sanskṛit Kâvyas, Nâtakas, Champûs, Bhâṇas, Prahasanas, Chhandas, Alankâras &c.

PART III.

EDITED BY

PAṆDIT DURGÂPRASÂDA

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

Second Revised Edition.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRṆAYA-SÂGARA" PRESS.

BOMBAY.

1899.

Price 1 *Rupee*

॥ श्रीः ॥

काव्यमाला

नाम

नानाविधप्राचीनकाव्यनाटकचम्पूभाणप्रहसन-
च्छन्दोलंकारादिसाहित्यग्रन्थानां
संग्रहः ।

तृतीयो गुच्छकः ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना महामहोपाध्याय
पण्डितदुर्गाप्रसादेन, मुम्बापुरवासिना
परबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा
च संशोधितः ।

द्वितीयं संस्करणम् ।

स च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१८९९

मूल्यमेको रूप्यकः ।

अनुक्रमणिका ।

काव्यमाला।

महामहोपाध्यायश्रीगोकुलनाथविरचितं[1]

शिवशतकम्।

विततविविधसंप्रदायशाखाव्यतिकरवेष्टितमूर्तये नमोऽस्तु।
बहुतरजगदण्डबीजपूरप्रसवफलेग्रहिपादपाय तुभ्यम् ॥ १ ॥
न धरणिसलिलानला न वायुर्न खमत एव न खानि नापि वर्ष्म।
न समयककुभौ न चिन्न चित्तं पुरुषपुरंदर पूरुषस्तवास्मि ॥ २ ॥
अविरतपरिवृत्तदण्डकाष्ठाकुलमतुलव्यतिवर्तमानवेगम्।
भ्रमयसि जगदण्डगोलमालाकलशकलापकुलाल कालचक्रम् ॥ ३ ॥
भुवनपुटकुटीरहट्टयन्त्रभ्रमणसहध्रुवतर्कुतः क्रमेण।
सृजसि समयसूत्रमत्र मायामयपटवानविधानतन्तुवायः ॥ ४ ॥
निगमवनवनस्पते प्रसूषे कति जगदण्डमयान्युदुम्बराणि।
दधति बहलजन्तुजालमन्तः पुनरपि तानि लयं त्वयि प्रयान्ति ॥ ५ ॥
बहुतरजगदण्डभारभर्तुर्नहि महिमानमहं तवावयामि।
मशक इव शलाटुगर्भजन्मा विटपबृहत्त्वमुदुम्बरद्रुमस्य ॥ ६ ॥
प्रविशति मम चित्तवेश्म सर्वेन्द्रियविकलः श्रुतिशिष्यमाणवर्त्मा।
विधिगृहतिलबिन्दुजालबर्ही गलितवपुः प्रपितामहः प्रजानाम् ॥ ७ ॥
विगलितवपुषं विकारवार्तारहितमनिन्द्रियमक्रियं पुराणम्।
त्वमसि तदिति चेतनाविशेषं निजपितरं निगमाः प्रबोधयन्ति ॥ ८ ॥

---

१. अयं पण्डितः ख्रिस्तसंवत्सरीयवर्तमानशतकप्रारम्भ एव बभूवेत्येके; पूर्वशतकपूर्वार्ध इत्यन्ये; किं तु पादोनवर्षशतद्वयान्न प्राचीनः. अयं च मिथिलादेशान्तर्वर्तिनि 'मगरौनी'संज्ञकग्रामे विद्यानिधिपीताम्बरपण्डिताज्जन्म लेभे इति मैथिलाः. अद्यावधि ज्ञाता एतत्कृता ग्रन्थास्त्वेते—(१) दीधितिविद्योतः (शिरोमणिटीका), (२) न्यायसिद्धान्ततत्त्वम्, (३) पदवाक्यरत्नाकरः, (४) मासमीमांसा, (५) मिथ्यात्वनिरुक्तिः, (६) रश्मिचक्रम् (चिन्तामणिटीका), (७) रसमहार्णवः, (८) लाघवगौरवरहस्यम्, (९) शिवशतकम्.

जगदिदमुपदीपयत्यविद्यातिमिररिपौ त्वयि न स्वमप्यवैमि ।
प्रतपति तपनातपे तपतौ भजति यदान्ध्यमसावुलूकलोकः ॥ ९ ॥
विषमनिगमकाननान्तशाखाततिषु निलीय परान्निरीक्षमाणः ।
परिणतिविदलज्जगत्कपित्थग्रसनकपे सुचिरान्निरूपितोऽसि ॥ १० ॥
सकलमपि मया स्वकर्मबीजं त्वयि वृषवाह समर्पयांबभूवे ।
तव मम च न चेत्फलं प्रसूते कथमधुनाप्यहमेव दोषभूमिः ॥ ११ ॥
नट इव वशगो भवामि यासामहमपहस्तितसर्वभूतपूर्वः ।
प्रकृतिचरितनाट्यसूत्रधार भ्रमयसि मामियतीषु भूमिकासु ॥ १२ ॥
भवदभिरुचितासु मे क्रियासु व्यवहरतोऽनुदिनं हिताहितासु ।
जननिधनबन्धमोचनेषु प्रभुरसि भूतपते तवास्मि दासः ॥ १३ ॥
भवदभिमतमेव सेवमानो हितमहितं च त्वया वृथास्मि बद्धः ।
तदपि कतममाश्रये शरण्यं बत परवानितरः पतिस्त्वमेव ॥ १४ ॥
वरमुपहसनीयवर्णकोऽयं विविधविकारविडम्बितस्वरूपः ।
तदपि कृतकहासमात्रहेतोर्विरम निवारय निःसहोऽस्मि मायाम् ॥ १५ ॥
क्व जगति कतमाह्वि कस्य हेतोरहमिह बद्ध इति त्वमेव वेत्थ ।
त्वमपि यदि न चेतये न च त्वां मम करुणामय तत्र कोऽपराधः ॥१६॥
अविदितगतिना प्रमादनिद्रामुषितमतिः कितव त्वयास्मि बद्धः ।
कथमपि मम दृष्टिवर्त्मवर्ती भव पथतस्करबन्धने प्रभुः स्याः ॥ १७ ॥
बहुविधभवभूमिकाभिराभिर्नटयसि नाथ यथा तथा नटामि ।
कृपण गमयिता भवानविद्याजवनिकयान्तरितः कियन्त्यहानि ॥ १८ ॥
वपसि विगतभोगभाग्य दूरान्मयि वृषवाह तवाहमुर्वरास्मि ।
स्वपदमुपदधासि यत्र तस्मिन्भवति कडङ्गर एव कर्मबीजम् ॥ १९ ॥
प्रभवति मतये पदप्रबन्धो न तव निरत्यय नित्यचेतनस्य ।
न भवति करुणा सतो(?) पुरारे मम कृपणैः परिदेवितप्रपञ्चैः ॥ २० ॥
सरसमपि वरं न भोक्तुमीहे हर मम शम्बलसंचयं गृहाण ।
उपदिश कतरद्धि दूरयात्राश्रमशमनं भववर्त्मनोऽवसानम् ॥ २१ ॥

मम भवपथिकस्य कर्म भोग्यं प्रलयनिशि त्वमवेक्षथाः शयालोः ।
त्वयि सकलमकिंचनो बुभूषुः प्रहरकवेतनमेतदर्पयामि ॥ २२ ॥

श्रुतिजनक रटत्यसौ कुमारी तव दुहिता बहिरेत्य नेति नेति ।
व्यवहित निकटस्थितेऽपि तस्मात्त्वयि मिलितेऽपि ममातिथेः क्व भोगः॥२३॥

अपरिमितविभागभूमिरेकस्त्वमसि ततो जगदण्डबिन्दुरासीत् ।
इति भुवनभरैकधुर्य जाने दश ककुभो गणितक्रमेण सिद्धाः ॥ २४ ॥

कथय क इव दिग्विपर्ययेऽपि प्रभवति गन्तुमतः क्व संसरेयम् ।
भव भवपथिकस्य कोऽप्यपूर्वस्त्वमहमिति प्रसृतो मम प्रमोहः ॥ २५ ॥

मयि परमविभौ विशुद्धसत्त्वे यदिह शरीरतदात्मतामधासीः ।
निगमपुरुष तत्प्रतिक्रियायै त्वयि निदधामि समस्तवस्त्वभेदम् ॥ २६ ॥

निबिडजडतदात्मताप्रमोहं विमलयति त्वदभेदविभ्रमो माम् ।
प्रकृतिमुपनयन्ति वारिधानीं कतकरजांसि रजोन्तरापकर्षात् ॥ २७ ॥

पुरि पुरि विहरामहे भ्रमन्तः पुरहर पश्यसि भोगवञ्चितोऽस्मान् ।
किमिति न विहरेम नाथवन्तो वयमितरे त्वमनाथ एक एव ॥ २८ ॥

स्वपिषि न परकर्मसु प्रसक्तः परमुपभोजयतस्तव क्व भोगः ।
परचरितमवैषि निर्निमेषः प्रकृतिदरिद्र न कोऽपि पश्यति त्वाम् ॥ २९ ॥

प्रकृतिचटुल सूक्ष्मभूतशेषे प्रकृतिविकारनिकोचभाजि काले ।
अविरतपरिवृत्तिखेदखिन्ने स्वपिति जने प्रतिबुध्यसे त्वमेकः ॥ ३० ॥

प्रलयदहनदग्धशेषपीलुप्रकरशिलोञ्छपवित्रवृत्तिरादौ ।
घटयसि भुवनानि तेषु जीवप्रकृतिचलैः परमाणुभिः शरीरम् ॥ ३१ ॥

जनशरण शरीरिणां प्रसृप्तैः करणगणैरुपलभ्यचेतनानाम् ।
कतिचन जनुरन्तरानुभूतिप्रसृमरवासनया स्मृतीः प्रसूषे ॥ ३२ ॥

अतिशयितविबुद्धवत्पुराणः स्मरति मुनिर्निगमं हिरण्यगर्भः ।
गगनपवनसंनिपातकर्ता कथमसि वा करुणानपेक्ष एव ॥ ३३ ॥

अथ कृतककलेवरद्वयेन व्यवहरता च निदेशदायिना च ।
अवगमितपदप्रवृत्तिमादौ कवयसि लोकहिताय संप्रदायम् ॥ ३४ ॥

हितविधिकपटान्निसर्गमूढप्रकृतिरसावहितान्निवर्तनीयः ।
इति विषमतमेऽपि संविधाने गणयतु कस्तव नाथ कौशलानि ॥ ३५ ॥
भवतु विधिरपूर्वकार्मतत्त्वाशयहितसाधनताभिधासु कश्चित् ।
तदपि मुषितदोषमन्तरा त्वां न भवितुमर्हति चोदना प्रमाणम् ॥ ३६ ॥
प्रभवति परमाप्तयो दुरन्तादपसरणाय हिते प्रवर्तनाय ।
सह चरति चतुर्भिरर्थवादैर्निगमकवे स तवैव सूक्तसारः ॥ ३७ ॥
अजिनमुसलवेदियूपशम्यादृषदुपलस्फ्यहविःकपालशूर्पैः ।
अथ गुरुयजमानगातृहोतृप्रभृतिभिरध्वरकर्मसु त्वमिज्यः ॥ ३८ ॥
विकिरति परितो घनावलीव श्रुतिरमृतानि तवाशयादुदस्य ।
विलयमयमुपैति चित्समुद्र त्वयि जगतो निगमस्य चित्प्रवाहः ॥ ३९ ॥
अभिसरति परं परं पुरारे विषयमनेकमपास्य पूर्वपूर्वम् ।
वरुणनिलयमापगेव यावद्व्रजति भवन्तमसौ न चित्तवृत्तिः ॥ ४० ॥
गुणगणमपनीय चित्तकूपे मम निगमैः सहसा निपातितोऽसि ।
अमृतकलश तिष्ठ तिष्ठ मन्ये पुनरपि जीवनमुद्धरिष्यसे नः ॥ ४१ ॥
प्रथमसमयसंगमाय नैतज्जगदुपजीवति केवलं भवन्तम् ।
भवतु सततसन्तमन्तरा त्वां कथमनिदंप्रथमापि वस्तुसत्ता ॥ ४२ ॥
प्रवहपवनवेगघट्टितोऽपि स्खलति न यज्जगदण्डपिण्डभारः ।
लघुगुरुतुलनातुलाप्रकाण्ड द्रढिमगुणः स भवद्गुणत्रयस्य ॥ ४३ ॥
त्वमखिलजगदीश षड्भिरङ्गैरुपचितवेदमजीजनः षडङ्गम् ।
कथय कथमसावुपैत्वसत्तां सततसतो भवतः स्वतः प्रपञ्चः ॥ ४४ ॥
विशकलितमनुव्रजन्निचित्य स्थपतिरिव त्वमजीघटः प्रपञ्चम् ।
विभुरसि न च युज्यसे विकारैस्त्वयि समवैतु कथं स भूतसर्गः ॥ ४५ ॥
न जगदिदमहेतुतो न शून्यादवधिमतां कथमुद्भवोऽस्त्वकस्मात् ।
प्रकृतिरियमधर्मधर्मरूपा पुरुषगुणः कथमारभेत विश्वम् ॥ ४६ ॥
स्वपरपरिचयान्ध्यहेतुमेतं शिव भवदावरणीयमन्धकारम् ।
शमयति जगदण्डबिन्दुवृन्दाम्बुद भवदेकपदा विवेकविद्युत् ॥ ४७ ॥

स्मरसि कथमनन्यदेव वृत्तां प्रभवकथाविधुरां निजामवस्थाम् ।
पुनरपि न चिराज्जनार्दन त्वां न परिचरिष्यति चेतनो द्वितीयः ॥ ४८ ॥
निमिषपरिचितो हरे समूलं हरसि विशेषगुणव्रजं परस्य ।
प्रथयसि खलतामिमामपूर्वां कथयसि यद्विगुणत्वमात्मनोऽपि ॥ ४९ ॥
अलमवगलितेन्द्रियप्रवृत्तेस्तव जरतः पुरुषस्य जागरेण ।
अयमहमधुना प्रबुध्यमानः पुरुषविकारकरीं निहन्मि मायाम् ॥ ५० ॥
असकृदनटदस्मिता नटी मे निहितपदा मशके मतङ्गजे च ।
ध्रुवमुपरि तवाधिरोक्ष्यतीयं भव महतोऽपि महानणोरणीयान् ॥ ५१ ॥
विलयमुपजगाम चेदखण्डस्त्वयि जरठो जगदण्डगुल्मपिण्डः ।
क्षपयसि तदपि क्षपामनिद्रः कतिभिरसौ हि बुभूषति प्ररोहैः ॥ ५२ ॥
विकिरति परदृष्टिवञ्चनाय त्वदुपरि विष्टपसर्षपानविद्या ।
तदपि निमिषमात्रनिर्गतोऽपि प्रविशति भूतगणो भवन्तमेव ॥ ५३ ॥
असकृदुदरमद्भिरङ्कभेदैर्नटगणनिष्क्रमणाद्विविक्तरङ्गः ।
अविदितमुखसंधिरामुखान्तो निगमकवेस्तव नाटकप्रबन्धः ॥ ५४ ॥
भ्रमयसि जगतस्त्वमेव संज्ञापरिचयसंस्कृतिरूपवेदनाभिः ।
सदसदतदपोढवस्तुचिन्ताकृतिरिति कल्पयसे विवेकवेद्यम् ॥ ५५ ॥
त्वममृत विषयप्रवेशभूमौ भवसि दृशः पथि यस्य स द्वितीयम् ।
जगति न परिपश्यति स्म जिह्मा स्मरहर दृष्टिविषाधिका गतिस्ते ॥ ५६ ॥
द्रुहिणभवनपद्मबीजमालामणिपरिवर्तनतत्परात्मनस्ते ।
ग्रसितुमखिलमेव जन्तुजातं विजनयतो विदिता बिडालवृत्तिः ॥ ५७ ॥
अपरिमितकृतेर्निराश्रयस्य भ्रमरहितस्य निरस्तचेष्टितस्य ।
दृषदुदरदरीषु दर्दुराणां घटनपटोस्तव कीदृशं शरीरम् ॥ ५८ ॥
भुवनभवनभासनप्रदीप न्यपतदसौ त्वयि चेतनापतङ्गी ।
क्षणमधिकमदीप्यत ज्वलन्ती पुनरजहात्प्रथमामपि स्वसत्ताम् ॥ ५९ ॥
ध्रुवमियमपवर्गरात्रिसंध्या भवति यतस्त्वयि निर्भरोऽनुरागः ।
रुचिमय चरमोऽयमञ्जलिस्ते ननु नचिराद्भविता भवानदृश्यः ॥ ६० ॥

यदपि तव वशे ममेन्द्रियाणि श्रुतिविषयावधिवर्तमानदृष्टेः ।
मुखमसि जगतस्तथापि नाथ श्रुतिमुकुरेण विना न वेदितासे ॥ ६१ ॥
मतिधनमितरे सुदीर्घनिद्राप्रणवधियस्त्वयि निक्षिपन्त्यतन्त्रे ।
उपहरणसुसंचितो न जातु व्ययमुपगच्छति चेतनानिधिस्ते ॥ ६२ ॥
क्वचिदपि विषमे त्वया नियुज्य स्थितिमनवाप्य चिरस्य संसरामि ।
भवगिरिसरिदस्मि चित्समुद्र त्वमपि जहामि तदा लभे यदि त्वाम् ॥६३॥
भगवति नियते विदूरयात्रासह····संसरणाध्वनोऽयमन्तः ।
जरति विरम निःसहासि संविन्नगरमतःपरमद्वयोपभोग्यम् ॥ ६४ ॥
विलिखतु कथमक्षराणि भाले स विधिरदृष्टपदार्थलेखदक्षः ।
मम हि मिलितमक्षपादपादप्रणिपतनेन ललाटसीम्नि चक्षुः ॥ ६५ ॥
उडुनि मयि रवे प्रकाशलेशं व्यवधिवशादपरीक्षितो न्यधासीः ।
तमपहरसि संनिकर्षमेत्य त्वदुपरि तर्हि निजं वपुस्त्यजामि ॥ ६६ ॥
भवपथपथिकोऽस्मि वाटपाटच्चर मिलितोऽसि विलुण्ठ्य संपदो मे ।
अहमपि भवदन्तरं प्रविश्य ध्रुवमचिरेण हरामि ते विभूतीः ॥ ६७ ॥
श्रुतिरसि पुरुषार्थसंनिबद्धस्तव चरमे प्रथमे विरौमि वत्सः ।
अमरगवि स दोग्धि कस्य हेतोरमृतमभोक्तरि पूर्तिभाजि भाण्डे ॥ ६८ ॥
शिव तव मम चान्तरालभूमौ विविधविधां व्यवधां व्यधाद्विधाता ।
तदपि हि भवतोऽहमेव भित्तिर्भवति वृतिः सदनस्य नाजिरस्य ॥ ६९ ॥
व्यवधिरुपरराम भूर्विभक्ता प्रभवसि गूढमतिर्न मां प्रहर्तुम् ।
तदहमहमिकाहृदेकशेषावधिरधुना ध्रुवमावयोर्विमर्दः ॥ ७० ॥
न धरणिरुपरि प्रयाति नाधः पतति न च प्लवते न बम्भ्रमीति ।
न च दिवि वसति स्वशक्तियोगादपि तु भवानचलास्थिरत्वहेतुः ॥ ७१ ॥
अविषमचतुरस्रषड्विभागां न सृजसि कन्दुकनिस्तलां न सूषे ।
घटयसि पृथिवीमिमां स्वचक्रभ्रमणकुलाल विशालदर्पणाभाम् ॥ ७२ ॥
पुरहर परदृष्टिदोषशान्त्यै कति जगदण्डकगण्डकान्बिभर्षि ।
त्वदुपरि परिपातयन्ति दृष्टिं विजहति सर्वमकिंचना भवन्ति ॥ ७३ ॥

परपुरमभिविश्य सर्वलोकं भ्रमयसि सर्वदिनेषु भूतवर्गः ।
भवपितृवनवाटबोधिवृक्ष प्रलयनिशासु निलीय सेवते त्वाम् ॥ ७४ ॥

ग्रहगृहसरसीरुहस्य राहुभ्रमरविमर्दसहार्ककर्णिकस्य ।
भ्रमणमिदमभिव्यनक्ति लीलां तव घटितां ध्रुवनालघट्टनाय ॥ ७५ ॥

सकलगुणगणो ममोर्णनाभेर्विलयमुपैति वितायते च भूयः ।
पटुजनजडतापहारहेतोः क्षणमपि न क्षमसे क्षयं गुणानाम् ॥ ७६ ॥

न खलु विघटिताः पुनर्घटन्ते न च घटिताः स्थिरसङ्गतां श्रयन्ते ।
पिपतिषुमवशं रुजन्ति वंश्यास्तटतरुमाप इवापगाणकस्य(?) ॥ ७७ ॥

विगतविपरिलोपदृष्टि पश्यन्वशयसि यां पुरुषप्रकाण्ड मायाम् ।
प्रकृतिचपलया तया विकारैर्बहुविधवर्णिकया वशीकृतोऽस्मि ॥ ७८ ॥

प्रकृतिचपलपीलुबीजवर्गे दलति खगोलकुशूलविप्रकीर्णम् ।
अघटितमितरेतरेण कल्पक्षयरजनौ समचीकलस्त्वमेकः ॥ ७९ ॥

खपुटपटलमभ्यजीर्यदाशावृतिरदलन्निरवाद्रविप्रदीपः ।
प्रलयभवनिवास्त्वगात्तथापि क्व जगदगारगृहस्थ निश्यवात्सीः ॥ ८० ॥

प्रसरति विषयेषु येषु रागः परिणमते विरतेषु तेषु शोकः ।
त्वयि रुचिरुचिता नितान्तकान्ते गुणपरिपाकशुचामगोचरोऽसि ॥ ८१ ॥

प्रतिगृहमतिथिर्गृहीतदण्डो धृतजगदण्डकमण्डलुप्रकाण्डः ।
भुवनवहन पात्रमात्रशेषं सतृणमिमं जगदत्ति कालभिक्षुः ॥ ८२ ॥

प्रसभनिविशमानकालसर्पप्रतिहतनिर्गमने खगोलनीडे ।
बहुविधगतयो विविक्तजायासुतजननीतनवः खगा भ्रमन्ति ॥ ८३ ॥

अभिलषितमथानुचिन्तितं यो हृदयगुहाशयितः शृणोत्यकर्णः ।
तमिममवचनं च वाग्मिता च प्रभवति मन्त्रयितुं त्रयीभुजंगम् ॥ ८४ ॥

परिपिबति पयो भवाध्वनीनस्तनयकराज्जननीपयोधराच्च ।
व्यपगतमधुना तदाशयापि प्रसभवशादयमाशयः शुशोष ॥ ८५ ॥

स्तनकलशमुखेन वा जनन्यास्तनयकराङ्गुलिमध्यकुल्यया च ।
चपल पिब पयांसि यावदायुर्भवति न चेतसि चेतनासमुद्रः ॥ ८६ ॥

विधिवशमिलितो भवाध्वयात्रां हरसि जगत्तिलपेषतैलिकोऽसि ।
न तव पशुपते विदन्ति पाशं पिहितदृशः पशवः परिभ्रमन्ति ॥ ८७ ॥
मयि फलकधिया त्वया कियत्यः प्रतिकृतयो लिखितास्तथा विलुप्ताः ।
विरम बत निसर्गनिर्मलस्य प्रमृज रजो मम पश्य दर्पणोऽस्मि ॥ ८८ ॥
क्षितिबिलपतितं जरायुपेशीस्थगितमथाण्डसमुद्गके निगूढम् ।
अविवृतमपि धातुसंचयं ते भव भवता हृतविग्रहो हरामि ॥ ८९ ॥
परिमित[सुखदं] कषायपाकं विरसतरं विषयान्तरं विहाय ।
निरवधिमधुरे समे समन्तात्त्वयि पुरुषोत्तम विश्रमोऽस्तु वाचाम् ॥ ९० ॥
अपगतपदपाटवोऽपि गर्भादुपनिषदामधुनोत्थितः प्रबन्धः ।
जनयतु तव कौतुकं कलेन प्रतिपदविस्खलितेन जल्पितेन ॥ ९१ ॥
प्रकृतिमलिनमृक्षलक्षलिक्षाचयचितमम्बरचीवरं वसानम् ।
प्रकटितबृहदण्डमत्रपं त्वां पुरुषमुदीक्ष्य हसामि चोल्लसामि ॥ ९२ ॥
व्यरमदवसरः स यत्र कर्मप्रकरमकार्षममर्त्यलेह्यलोभात् ।
न पुनरपि पिबामि सोमपात्रामृतदधि राहुबिडालपीतशेषम् ॥ ९३ ॥
स्वयमयमवलेढि होतुराज्यं तदनु तमाशयते सुधाम्बुबिन्दून् ।
अजनि तु जननीपयस्तृषार्तिक्षयमवमुञ्चति याज्यमिज्यवर्गः ॥ ९४ ॥
भ्रमयसि नवधा खमण्डलानि द्रढयसि सप्तपुटानि भूतधात्र्याः ।
उपदिशसि च षड्गतीर्ग्रहाणां ध्रुवमसि तद्ध्रुवयोरपि ध्रुवस्त्वम् ॥ ९५ ॥
गुणमपि तव निर्गुणत्वपक्षे भ्रमयति दोषकुलाकुलं प्रबन्धः ।
मलिनयति नवेन्दुसुन्दराणि स्फटिकशिलाशकलानि काचसङ्गः ॥ ९६ ॥
किमपि निविशति प्रकाशराशौ त्वयि यमुनेव रवौ विधाविवाङ्कः ।
असिततनु चतुर्भुजस्वरूपं यदरतरा(?) हृदयं हरन्ति वामाः ॥ ९७ ॥
इदमपरपुरं तदेव यस्मिन्नसकृदहर्निरगान्निशि प्रविश्य ।
विगलितवरणाद्बहिर्विहीनात्कथमधुना सदनादितो निरीयाम् ॥ ९८ ॥
यदभिलपसि पुद्गलानजीवासुरवरनिर्जरजीवबन्धमोक्षान् ।
नयसि च यदनावृतान्विहंगप्रकृतिमतस्तदुपास्यसे जिनेन्द्रः ॥ ९९ ॥

प्रकृतिरियमनश्वरस्वरूपा सृजति महान्तमसौ यतो विकारम् ।
अविकृतमपि पश्यतः सतस्ते सह रमते ह्यनया सखा त्वदीयः ॥ १०० ॥
यदि मम सहसा तवाभिसारात्कुलगुरुभिर्निगमैर्निवारितासौ ।
स्वयमभिसर तर्हि वाचमेनां परपुरुषं निगमो न पश्यति त्वाम् ॥ १०१ ॥
मम वचनजलानि कर्णशुक्तौ तव पतितानि गतानि मौक्तिकत्वम् ।
विगुणविलुलितानि लाजबुद्ध्या रसयतु कुण्डलकुण्डलिप्रकाण्डम् ॥१०२॥
अपटुभिरभिधित्सितार्थबुद्धावनभिमतानपि बोधयद्भिरर्थान् ।
पुरमथन पराहतैरमीभिः कथय कदा विहसिष्यसि प्रलपैः ॥ १०३ ॥
न तव पुरि शिलादपुत्रवेत्रप्रततिनिरुद्धतया लभे प्रवेशम् ।
शिवसहचरि गौरि गोपुरेभ्यो बहिरुपविश्य वसामि नौमि च त्वाम् ॥ १०४ ॥
न दहति सगरान्वयं न पादात्प्रभवति नाप्यलिकादुदेति चक्षुः ।
न च किमपि शृणोति नेत्रवर्गो मम कथमस्तु तव स्तवेऽधिकारः ॥ १०५ ॥

इति महोपाध्यायश्रीगोकुलनाथविरचितं शिवशतकम् ।

पञ्चस्तवी[1] ।

लघुस्तवः ।

ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥ १ ॥

---

१. दृष्टेषु बहुष्वपि पञ्चस्तवीपुस्तकेषु रचयितुः कवेर्नाम न प्राप्तम्. किं तु प्राचीनोऽयं कश्चन कविवरः, यतः सरस्वतीकण्ठाभरणे पञ्चमपरिच्छेदे अत्रत्यतृतीयस्तवस्थः 'लक्ष्मीवशीकरणचूर्णसहोदराणि' इत्यादि श्लोको भोजराजेनोदाहृतः. अथ च तृतीयस्तवस्थ एव 'आनन्दमन्थरपुरंदरमुक्तमाल्यम्' इत्यादि श्लोकः कुवलयानन्दे संसृष्टिप्रकरणे, अस्यैव श्लोकस्य 'पादाम्बुजं भवतु मे विजयाय मञ्जु–' इत्याद्युत्तरार्धं काव्यप्रकाशे दशमोल्लासे च वर्तेते. लघुस्तवनाम्नः प्रथमस्तवस्य द्वित्राष्टीका अपि समुपलभ्यन्ते, ताश्च सर्वा अपि तन्त्रशास्त्रानुसारिण्य इत्यनुपयुक्ता इत्यस्माभिर्न गृहीताः. तत्रैको नित्यानन्दनामा लघुस्तवटीकाकारः 'लघुस्तवकर्ता धर्माचार्यः' इति वदति.

या मात्रा त्रपुसीलतातनुलसत्तन्तुस्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमा
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥ २ ॥

दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे बिन्दुं विनाप्यक्षरम् ।
तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्राम्बुजात् ॥ ३ ॥

यन्नित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलं
तत्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ।
आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पदप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥ ४ ॥

यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै-
स्तार्तीयं तदहं नमामि मनसा त्वद्बीजमिन्दुप्रभम् ।
अस्त्वौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गोशब्दो गिरि वर्तते स नियतं योगं विना सिद्धिदः ॥ ५ ॥

एकैकं तव देवि बीजमनघं सव्यञ्जनाव्यञ्जनं
कूटस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति सततं तं तं समस्तं नृणाम् ॥ ६ ॥

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तनयनस्निग्धप्रभालोकिनीं
ये त्वामम्ब न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥ ७ ॥

ये त्वां पाण्डुरपुण्डरीकपटलस्पष्टाभिरामप्रभां
सिञ्चन्तीममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
अश्रान्तं विकटस्फुटाक्षरपदा निर्याति वक्राम्बुजा-
त्तेषां भारति भारती सुरसरित्कल्लोललोलोर्मिवत् ॥ ८ ॥

ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमा-
मुर्वीं चापि विलीनयावकरसप्रस्तारमग्नामिव ।
पश्यन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
क्लान्तास्त्रस्तकुरङ्गशावकदृशो वश्या भवन्ति स्फुटम् ॥ ९ ॥

चञ्चत्काञ्चनकुण्डलाङ्गदधरामाबद्धकाञ्चीस्रजं
ये त्वां चेतसि तद्गते क्षणमपि ध्यायन्ति कृत्वा स्थिराम् ।
तेषां वेश्मसु विभ्रमादहरहः स्फारीभवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णतालतरलाः स्थैर्यं भजन्ते श्रियः ॥ १० ॥

आर्भट्या[1] शशिखण्डमण्डितजटाजूटां नृमुण्डस्रजं
बन्धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीं
मध्ये निम्नवलित्रयाङ्किततनुं त्वद्रूपसंवित्तये ॥ ११ ॥

जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले
निःशेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरवृन्दवन्दितपदः श्रीवत्सराजोऽभव-
द्देवि त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदयः ॥ १२ ॥

चण्डि त्वच्चरणाम्बुजार्चनविधौ बिल्वीदलोल्लुण्ठन-
त्रुट्यत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः ।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्समत्स्याङ्कितै-
र्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥ १३ ॥

विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवै-
स्त्वां देवि त्रिपुरे परापरमयीं संतर्प्य पूजाविधौ ।
यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरनिघ्नीकृताः ॥ १४ ॥

शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति स्फुटम् ।

---

१. अत्यादरेण.

लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥ १५ ॥
देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिःस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः ।
यत्किंचिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गादिकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥ १६ ॥
लक्ष्मीं राजकुले जयां रणभुवि क्षेमंकरीमध्वनि
क्रव्याद्द्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजम्बुकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥ १७ ॥
माया कुण्डलिनी क्रिया मधुमती काली कलामालिनी
मातङ्गी विजया जया भगवती देवी शिवा शांभवी ।
शक्तिः शंकरवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥ १८ ॥
आईपल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च तैः सस्वरैः ।
नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परेभ्यो नमः ॥ १९ ॥
बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसा यत्राद्यवृत्ते स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरै-
र्मन्त्रोद्धारविधिर्विशेषसहितः सत्संप्रदायान्वितः ॥ २० ॥
सावद्यं निरवद्यमस्तु यदि वा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
संचिन्त्यापि लघुत्वमात्मनि दृढं संजायमानं हठा-
त्त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ॥ २१ ॥

इति पञ्चस्तव्यां लघुस्तवः प्रथमः ।

चर्चास्तवः ।

सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
संकल्पकल्पतरवस्त्रिपुरे जयन्ति ।
एते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥ १ ॥

देवि स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र
स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥ २ ॥

मातस्तथापि भवतीं भवतीव्रताप-
विच्छित्तये स्तवमहार्णवकर्णधारः ।
स्तोतुं भवानि स भवच्चरणारविन्द-
भक्तिग्रहः किमपि मां मुखरीकरोति ॥ ३ ॥

सूते जगन्ति भवती भवती बिभर्ति
जागर्ति तत्क्षयकृते भवती भवानि ।
मोहं भिनत्ति भवती भवती रुणद्धि
लीलायितं जयति चित्रमिदं भवत्याः ॥ ४ ॥

यस्मिन्मनागपि नवाम्बुजपत्रगौरि
गौरि प्रसादमधुरां दृशमादधासि ।
तस्मिन्निरन्तरमनङ्गशरावकीर्ण-
सीमन्तिनीनयनसंततयः पतन्ति ॥ ५ ॥

पृथ्वीभुजोऽप्युदयनप्रभवस्य[1] तस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
यच्चक्रवर्तिपदवीप्रणयः स एष
त्वत्पादपङ्कजरजःकणजः प्रसादः ॥ ६ ॥

---

१. उदयनसूनोर्नरवाहनदत्तस्य. नरवाहनदत्तकथैव बृहत्कथाया मूलभूता.

त्वत्पादपङ्कजरजःप्रणिपातपूर्वैः
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ।
क्षीरक्षपाकरदुकूलहिमावदाता
कैरप्यवापि भुवनत्रितयेऽपि कीर्तिः ॥ ७ ॥

कल्पद्रुमप्रसवकल्पितचित्रपूजा-
मुद्दीपितप्रियतमामदरक्तगीतिम् ।
नित्यं भवानि भवतीमुपवीणयन्ति
विद्याधराः कनकशैलगुहागृहेषु ॥ ८ ॥

लक्ष्मीवशीकरणकर्मणि कामिनीना-
माकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।
नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो
देवि त्वदङ्घ्रिजनितो जयति प्रसादः ॥ ९ ॥

देवि त्वदङ्घ्रिनखरत्नभुवो मयूखाः
प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति ।
सेवानति व्यतिकरे सुरसुन्दरीणां
सीमन्तसीम्नि कुसुमस्तबकायितं यैः ॥ १० ॥

मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तदीप्तं
मध्येललाटममरायुधरश्मिचित्रम् ।
हृच्चक्रचुम्बि हुतभुक्कणिकानुकारि
ज्योतिर्यदेतदिदमम्ब तव स्वरूपम् ॥ ११ ॥

रूपं तव स्फुरितचन्द्रमरीचिगौर-
मालोकते शिरसि वागधिदैवतं यः ।
निःसीमसूक्तिरचनामृतनिर्झरस्य
तस्य प्रसादमधुराः प्रसरन्ति वाचः ॥ १२ ॥

सिन्दूरपांसुपटलच्छुरितामिव द्यां
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम् ।

यः पश्यति क्षणमपि त्रिपुरे विहाय
व्रीडां मृडानि सुदृशस्तमनुद्रवन्ति ॥ १३ ॥

मातर्मुहूर्तमपि यः स्मरति स्वरूपं
लाक्षारसप्रसरतन्तुनिभं भवत्याः ।
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः
प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥ १४ ॥

योऽयं चकास्ति गगनार्णवरत्नमिन्दु-
र्योऽयं सुरासुरगुरुः पुरुषः पुराणः ।
यद्वाममर्धमिदमन्धकसूदनस्य
देवि त्वमेव तदिति प्रतिपादयन्ति ॥ १५ ॥

इच्छानुरूपमनुरूपगुणप्रकर्षं
संकर्षिणि त्वमभिमृष्य यदा बिभर्षि ।
जायेत स त्रिभुवनैकगुरुस्तदानीं
देवः शिवोऽपि भुवनत्रयसूत्रधारः ॥ १६ ॥

ध्यातासि हैमवति येन हिमांशुरश्मि-
मालामलद्युतिरकल्मषमानसेन ।
तस्याविलम्बमनवद्यमनन्तकल्प-
मल्पैर्दिनैः सृजसि सुन्दरि वाग्विलासम् ॥ १७ ॥

आधारमारुतनिरोधवशेन येषां
सिन्दूररञ्जितसरोजगुणानुकारि ।
दीप्तं हृदि स्फुरति देवि वपुस्त्वदीयं
ध्यायन्ति तानिह समीहितसिद्धसाध्याः ॥ १८ ॥

ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति
रूपं तवाम्ब नवयावकपङ्कपिङ्गम् ।
तेषां सदैव कुसुमायुधबाणभिन्न-
वक्षःस्थला मृगदृशो वशगा भवन्ति ॥ १९ ॥

त्वामैन्दवीमिव कलामनुभालदेश-
मुद्भासिताम्बरतलामवलोकयन्तः ।
सद्यो भवानि सुधियः कवयो भवन्ति
त्वं भावनाहितधियां कुलकामधेनुः ॥ २० ॥

शर्वाणि सर्वजनवन्दितपादपद्मे
पद्मच्छदद्युतिविडम्बितनेत्रलक्ष्मि ।
निष्पापमूर्तिजनमानसराजहंसि
हंसि त्वमापदमनेकविधां जनस्य ॥ २१ ॥

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरंतनमघौघवनं लुनीहि ।
कारागृहे निगडबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झटिति मे निगडास्त्रुटन्ति ॥ २२ ॥

त्वां व्यापिनीति सुमना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि स्तुवन्ति विजयेति जयेत्युमेति ॥ २३ ॥

उद्दामकामपरमार्थसरोजखण्ड-
चण्डद्युतिद्युतिमपासितषड्विकाराम् ।
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-
लीलागुहां भगवतीं त्रिपुरां नमामि ॥ २४ ॥

गणेशवटुकस्तुता रतिसहायकामान्विता
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता ।
अनङ्गकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥ २५ ॥

रुद्राणि विद्रुममयीं प्रतिमामिव त्वां
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ।

तानेत्य पक्ष्मलदृशः प्रसभं भजन्ते
कण्ठावसक्तमृदुबाहुलतास्तरुण्यः ॥ २६ ॥

त्वद्रूपैकनिरूपणप्रणयितावन्धो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
त्वत्पादार्चनचातुरी करयुगे त्वत्कीर्तनं वाचि मे
कुत्रापि त्वदुपासनव्यसनिता मे देवि मा शाम्यतु ॥ २७ ॥

त्वद्रूपमुल्लसितदाडिमपुष्परक्त-
मुद्भावयेन्मदनदैवतमक्षरं यः ।
तं रूपहीनमपि मन्मथनिर्विशेष-
मालोकयन्त्युरुनितम्बतटास्तरुण्यः ॥ २८ ॥

ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ।
वागीश्वरि त्रिभुवनेश्वरि विश्वमात-
रन्तर्वहिश्च कृतसंस्थितये नमस्ते ॥ २९ ॥

यः स्तोत्रमेतदनुवासरमीश्वरायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ॥ ३० ॥

इति पञ्चस्तव्यां चर्चास्तवो द्वितीयः ।

घटस्तवः ।

आनन्दमन्थरपुरंदरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥ १ ॥

देवि त्र्यम्बकपत्नि पार्वति सति त्रैलोक्यमातः शिवे
शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्यायनि ।

भीमे भैरवि चण्डि शर्वरि कले कालक्षये शूलिनि
त्वत्पादप्रणताननन्यमनसः पर्याकुलान्पाहि नः ॥ २ ॥
देवि त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्मस्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटाः ।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥ ३ ॥
उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्छा इव
प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव ।
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एवाग्रत-
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति तान्सुभ्रुवः ॥ ४ ॥
ध्यायन्ति ये क्षणमपि त्रिपुरे हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः ।
ते विस्फुरन्ति ललितायतलोचनानां
चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥ ५ ॥
एतं किं नु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः
किं वामुं निगराम्यनेन सहसा किं वैकतामाश्रये ।
तस्येत्थं विवशो विकल्पललिताकूतेन योषिज्जनः
किं तद्यन्न करोति देवि हृदये यस्य त्वमावर्तसे ॥ ६ ॥
विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः
शब्दः शक्तिरिति त्रिलोकजननि त्वय्येव तथ्यस्थितिः ।
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं
त्वद्भक्तानपि न क्षिणोषि च रुषा तद्देवि चित्रं महत् ॥ ७ ॥
इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं
पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ।
वर्षन्तीममृतं भवानि भवतीं ध्यायन्ति ये देहिन-
स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥ ८ ॥

पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव
क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहितार्तितापविपदस्ते संपदं बिभ्रति ॥ ९ ॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं
त्वां ग्रन्थिपञ्चकभिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद्दधति चेतसि तान्मृगाक्ष्यः ॥ १० ॥

लाक्षारसस्नपितपङ्कजतन्तुतन्वी-
मन्तः स्मरत्यनुदिनं भवतीं भवानि ।
यस्तं स्मरप्रतिमम्प्रतिमस्वरूपा
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥ ११ ॥

स्तुमस्त्वां वाचमव्यक्तां हिमकुन्देन्दुरोचिषम् ।
कदम्बमालां बिभ्राणमापादतललम्बिनीम् ॥ १२ ॥

मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं
वर्षन्तीममृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
अच्छिन्ना च मनोहरा च ललिता चातिप्रसन्नापि च
त्वामेवं स्मरतः स्मरारिदयिते वाक्सर्वतो वल्गति ॥ १३ ॥

ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन्व्याधीञ्शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते ॥ १४ ॥

यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय-
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यश्च त्र्यम्बकवल्लभे तव गुणानाकर्णयत्यादरा-
त्तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥ १५ ॥

किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि ख्याप्यते न स्तुतायाम् ।
का का सिद्धिः सुरवरनुते प्राप्यते नार्चितायां
कं कं योगं त्वयि न चिनुते चित्तमालम्बितायाम् ॥ १६ ॥

ये देवि दुर्धरकृतान्तमुखान्तरस्था
ये कालि कालघनपाशनितान्तबद्धाः ।
ये चण्डि चण्डगुरुकल्मषसिन्धुमग्ना-
स्तान्पासि मोचयसि तारयसि स्मृतैव ॥ १७ ॥

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥ १८ ॥

रे मूढाः किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः ।
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यता-
मुन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥ १९ ॥

याचे न कंचन न कंचन वञ्चयामि
सेवे न कंचन निरस्तसमस्तदैन्यः ।
श्लक्ष्णं वसे मधुरमद्मि भजे वरस्त्री-
र्देवी हृदि स्फुरति मे कुलकामधेनुः ॥ २० ॥

नमामि यामिनीनाथलेखालंकृतकुन्तलाम् ।
भवानीं भवसंतापनिर्वापणसुधानदीम् ॥ २१ ॥

इति पञ्चस्तव्यां घटस्तवस्तृतीयः ।

अम्बास्तवः ।

यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।

तामर्धपल्लवितशंकररूपमुद्रां
देवीमनन्यशरणः शरणं प्रपद्ये ॥ १ ॥

अम्ब स्तवेषु तव तावदकर्तृकानि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोतु ॥ २ ॥

व्योमेति बिन्दुरिति नाद इतीन्दुलेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निःस्यन्दमानसुखबोधसुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ॥ ३ ॥

आविर्भवत्पुलकसंततिभिः शरीरै-
र्निःस्यन्दमानसलिलैर्नयनैश्च नित्यम् ।
वाग्भिश्च गद्गदपदाभिरुपासते ये
पादौ तवाम्ब भुवनेषु त एव धन्याः ॥ ४ ॥

वक्त्रं यदुद्यतमभिष्टुतये भवत्या-
स्तुभ्यं नमो यदपि देवि शिरः करोति ।
चेतश्च यत्त्वयि परायणमम्ब तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥ ५ ॥

मूलालवालकुहरादुदिता भवानि
निर्भिद्य षट्सरसिजानि तडिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निःस्यन्दमानपरमामृततोयरूपा ॥ ६ ॥

दग्धं यदा मदनमेकमनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयांचकार ।
धत्ते तदाप्रभृति देवि ललाटनेत्रं
सत्यं ह्रियैव मुकुलीकृतमिन्दुमौलिः ॥ ७ ॥

अज्ञातसंभवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्याः
शंभुं क एव बुबुधे गिरिराजकन्ये ॥ ८ ॥

चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।
वेतालसंहतिपरिग्रहता च शंभोः
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॥ ९ ॥

कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥ १० ॥

जन्तोरपश्चिमतनोः सति कर्मसाम्ये
निःशेषपाशपटलच्छिदुरा निमेषात् ।
कल्याणि देशिककटाक्षसमाश्रयेण
कारुण्यतो भवति शांभववेधदीक्षा ॥ ११ ॥

मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव संध्या ।
एकः स एव भुवनत्रयसुन्दरीणां
कंदर्पतां व्रजति पञ्चशरीं विनापि ॥ १२ ॥

ये भावयन्त्यमृतवाहिभिरंशुजालै-
राप्यायमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिः सुरवरैरपि कालकक्षाम् ॥ १३ ॥

यः स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।

पद्मासनां च हृदये भवतीमुपास्ते
मातः स विश्वकवितार्किकचक्रवर्ती ॥ १४ ॥

बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥ १५ ॥

अर्धेन किं नवलताललितेन मुग्धे
क्रीतं विभोः परुषमर्धमिदं त्वयेति ।
आलीजनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि जडीभवन्ति ॥ १६ ॥

ब्रह्माण्डबुद्बुदकदम्बकसंकुलोऽयं
मायोदधिर्विविधदुःखतरङ्गमालः ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसंततिमहावडवामुखाग्नौ ॥ १७ ॥

दाक्षायणीति कुटिलेति गुहारणीति
कात्यायनीति कमलेति कलावतीति ।
एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ॥ १८ ॥

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥ १९ ॥

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निःसारमेव निखिलं त्वदृते यदि स्यात् ॥ २० ॥

ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं
सूते पयांसि यदहिर्धरणिं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ २१ ॥

संकोचमिच्छसि यदा गिरिजे तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरा भवन्ति ॥ २२ ॥

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रूकिंकरीकृतसरोजगृहासहस्राः ।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥ २३ ॥

हर्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनी किरणसंहतिरेव शक्ता
घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥ २४ ॥

शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥ २५ ॥

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्यानले मरुति शान्तिरतीतशान्तिः ।
व्योम्नीति याः किल कलाः कलयन्ति विश्वं
तासां हि दूरतरमम्ब पदं त्वदीयम् ॥ २६ ॥

यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।

तावद्विकल्पजटिलाः कुटिलप्रकारा-
स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ॥ २७ ॥

यद्देवयानपितृयानविहारमेके
कृत्वा मनः करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २८ ॥

स्थूलासु मूर्तिषु महीप्रमुखासु शंभोः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सासि स्तुता किल मयेति तितिक्षितव्यम् ॥ २९ ॥

कालाग्निकोटिरुचिमम्ब षडध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ॥ ३० ॥

विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनामः
साक्षादपारकरुणां गुरुमूर्तिमेव ॥ ३१ ॥

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभारक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः
सकलजननि मातः संततं संनिधत्ताम् ॥ ३२ ॥

इति पञ्चस्तव्यामम्बास्तवश्चतुर्थः ।

सकलजननीस्तवः ।

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः ।

जगन्मातर्जन्मज्वरमयतमःकौमुदि वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १ ॥

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतितुलितनीलोत्पलरुचे ।
शिवस्याराध्याय स्तनंभरविनम्राय सततं
नमस्तस्मै कस्मैचन भवतु मुग्धाय महसे ॥ २ ॥

अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी
शिवस्यासीर्यत्त्वं परिणयविधौ देवि गृहिणी ।
सवित्री भूतानामपि यदुदभूः शैलतनया
तदेतत्संसारप्रणयनमहानाटकमुखम् ॥ ३ ॥

ब्रुवन्त्येके तत्त्वं भगवति सदन्ये विदुरस-
त्परे मातः प्राहुस्तव सदसदन्ये सुकवयः ।
परे नैतत्सर्वं समभिदधते देवि सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥ ४ ॥

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका-
मुदञ्चद्धर्माम्भःकणगुणितनीलोत्पलरुचम् ।
शिवं पार्थत्राणप्रवणमृगयाकारगुणितं
शिवामन्वग्यान्तीं शबरमहमन्वेमि शबरीम् ॥ ५ ॥

मिथः केशाकेशिप्रधननिधनास्तर्कघटना
बहुश्रद्धाभक्तिप्रणयविषयाः शास्त्रविधयः ।
प्रसीद प्रत्यक्षीभव गिरिसुते देहि शरणं
निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥ ६ ॥

शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं
कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।
अमुष्मिन्विश्वासं विजहिहि ममाह्लाय वपुषि
प्रपद्येथाश्चेतः सकलजननीमेव शरणम् ॥ ७ ॥

तडित्कोटिज्योतिद्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टत्रिंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥ ८ ॥

चतुष्पत्रान्तःषड्दलभगपुटान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियताभद्युतियुते ।
षडस्रं भित्त्वादौ दशदलमथ द्वादशदलं
कलास्रं च द्व्यस्रं गतवति नमस्ते गिरिसुते ॥ ९ ॥

कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः
परे तत्संभेदं समभिदधते कौलमपरे ।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये तत्त्वं तव कथममी निश्चिनुमहे ॥ १० ॥

षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ।
वितन्वानः शैवं किमपि वपुरिन्दीवररुचिः
कुचाभ्यामानम्रस्तव पुरुषकारो विजयते ॥ ११ ॥

प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रविश्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुः शिवमकुलमम्ब प्रविशति ॥ १२ ॥

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेदत्र क्वचन तव मातः करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥ १३ ॥

प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां
समुन्मीलन्मुक्ताफलबहलनेपथ्यसुभगाम् ।

स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥ १४ ॥

षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
र्लसन्मुद्राफेनैर्बहुविधचलद्दैवतझषैः ।
क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदी
भवानि प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥ १५ ॥

महीपाथोवह्निश्वसनवियदात्मेन्दुरविभि-
र्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब महिमा ।
अमून्यालोक्यन्ते भगवति न कुत्राप्यणुतमा-
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥ १६ ॥

कलां मायां प्रज्ञां समयमनुभूतिं समरसं
गुरुं पारम्पर्यं विनयमुपदेशं शिवकथाम् ।
प्रमाणं निर्वाणं प्रकृतिमतिभूतिं परगुहां
विधिं विद्यामाहुः सकलजननीमेव मुनयः ॥ १७ ॥

प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे
ततस्तत्त्वे चाष्टध्वनिवपुरुपाधिन्युपगते ।
श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनां
स्वसंवित्तिं योगी रसयति शिवाख्यां परतनुम् ॥ १८ ॥

परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निराकारां ज्ञानप्रकृतिमपरिच्छिन्नकरुणाम् ।
सवित्रीं लोकानां निरतिशयधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥ १९ ॥

जगत्काये कृत्वा तदपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तमपि वियदाख्ये च गहने ।
तदेतज्ज्ञानाख्ये तदपि परमानन्दगहने
महाव्योमाकारे त्वदनुभवशीलो विजयते ॥ २० ॥

विधे वेद्ये विद्ये विविधसमये वेदगुलिके
विचित्रे विश्वाद्ये विनयसुलभे वेदजननि ।
शिवाज्ञे शूलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥ २१ ॥

विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ।
अलं चक्रे कण्ठं यदपि गरलेनाम्ब गिरिशः
शिवस्थायाः शक्तेस्तदिदमखिलं ते विलसितम् ॥ २२ ॥

विरिञ्चयाख्या मातः सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वर दशाम् ।
भवन्ती नादाख्या विहरसि च पाशौघदलनी
त्वमेवैकानेका भवसि कृतिभेदैर्गिरिसुते ॥ २३ ॥

मुनीनां चेतोभिः प्रमृदितकषायैरपि मना-
गशक्यं संस्प्रष्टुं चकितचकितैरम्ब सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वति पदम् ॥ २४ ॥

तडिद्वल्लीं नित्याममृतसरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यामविनतकुचां विश्वजननी-
मपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ॥ २५ ॥

शरीरं क्षित्यम्भःप्रभृतिरचितं केवलमिदं
सुखं दुःखं चायं कलयति पुमांश्चेतन इति ।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहंकारं तव समयबाह्यो गिरिसुते ॥ २६ ॥

पिता माता भ्राता सुहृदनुचरः सद्म गृहिणी
वपुः क्षेत्रं मित्रं धनमपि यदा मां विजहति ।

तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया संनिधिकरी ॥ २७ ॥

सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य दुहिता ।
अनाद्यन्ता शंभोरपृथगपि शक्तिर्भगवती
विवाहाज्जायासीत्यहह चरितं वेत्ति तव कः ॥ २८ ॥

कणास्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ।
शिवादि क्षित्यन्यं त्रिवलयतनोः सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥ २९ ॥

पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूलं सूक्ष्मं सकुलमकुलं गुह्यमगुह्म् ।
दवीयो नेदीयः सदसदिति विश्वं भगवती
सदा पश्यन्त्याख्यां वहसि भुवनक्षोभजननीम् ॥ ३० ॥

प्रविश्य त्वन्मार्गं सहजदयया देशिकदृशा
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ।
परामाज्ञाकारां सपदि शिवयन्तीं शिवतनुं
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥ ३१ ॥

मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलाः प्रतिहतमहिम्नीव पृषतः ।
उदेत्योदेत्याम्ब त्वयि सह निजैः सात्त्विकगुणै-
र्भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥ ३२ ॥

विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः
स्वभावो जैनेन्द्रः सुगतमुनिराकाशमनिलः ।
शिवः शक्तिश्चेति श्रुतिविषयतां तामुपगतां
विकल्पैरेभिस्त्वामभिदधति सन्तो भगवतीम् ॥ ३३ ॥

शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक्तत्त्वं त्वत्तो भगवति न वीक्षामह इमे ॥ ३४ ॥

त्वया यो जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब त्वमसि निखिला यस्य तनवः ।
गता साम्यं शंभोर्वहति परमं व्योम भवती
तथाप्येवं हित्वा विहरति शिवस्येति किमिदम् ॥ ३५ ॥

असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-
त्कृते जन्मन्यन्ते गुरुवपुषमासाद्य गिरिशम् ।
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवा-
न्नयेयं त्वत्पूजास्तुतिविरचनैरेव दिवसान् ॥ ३६ ॥

यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या
योनिस्तस्याः प्रथितमुदरे यत्तदोंकारपीठम् ।
तस्मिन्नन्तः कुचभरनतां कुण्डलीतः प्रवृत्तां
श्यामाकारां सकलजननीं संततं भावयामि ॥ ३७ ॥

भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमानेऽप्यष्टधा शक्तिरेका ।
वहति कुचभराभ्यां यावनम्रापि विश्वं
सकलजननि सा त्वं पाहि मामित्यवश्यम् ॥ ३८ ॥

इति पञ्चस्तव्यां सकलजननीस्तवः पञ्चमः ।

इति पञ्चस्तवी समाप्ता ।

श्रीदामोदरगुप्तविरचितं[1]

कुट्टनीमतम्[2] ।

स जयति संकल्पभवो रतिमुखशतपत्रचुम्बनभ्रमरः ।
यस्यानुरक्तललनानयनान्तविलोकनं वसतिः ॥ १ ॥
अवधीर्य दोषनिचयं गुणलेशे संनिवेश्य मतिमार्याः ।
कुट्टन्या मतमेतद्दामोदरगुप्तविरचितं शृणुत ॥ २ ॥
अस्ति खलु निखिलभूतलभूषणभूता विभूतिगुणयुक्ता ।
मुक्ताभियुक्तजनता नगरी वाराणसीनाम ॥ ३ ॥
अनुभवतामपि यस्यामुपभोगान्कामतः शरीरवताम् ।
शशधरखण्डविभूषितदेहलयः किल न दुष्प्रापः ॥ ४ ॥

---

१. अयं दामोदरगुप्तकविः कश्मीरमहीपतेर्जयापीडस्य मन्त्रिप्रवर आसीत्. 'स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम् । कविं कविं बलिरिव धुर्यं धीसचिवं व्यधात् ॥' (४ । ४९५) इति राजतरङ्गिणी. आसंश्च तत्सभायामन्येऽपि महाविद्वांसो महाकवयश्च. स्वयं च जयापीडनृपतिः पण्डित आसीत्. 'क्षीराभिधाच्छब्दविद्योपाध्यायात्संभृतश्रुतः । बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥' (४ । ४८८) इति, 'देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः । प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥' (४।४८७) इति, 'अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा । आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेऽद्यापि सूरिभिः ॥' (४ । ५४८) इति, 'विद्वान्दीनारलक्षेण प्रत्यहं कृतवेतनः । भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥' (४ । ४९४) इति, 'मनोरथः शङ्खदत्तश्चटकः संधिमांस्तथा । बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥' (४ । ४९६) इति च राजतरङ्गिणी. स जयापीडमहीपतिः ७५५ मितारिव्रस्तवत्सरादारभ्य ७८६ मितवत्सरपर्यन्तं कश्मीरवसुंधरां बुभोज. अयं ग्रन्थस्तु लुप्तप्राय एवासीत्. पूर्वतरे वर्षे डॉक्टर् पीटर्सनेनैकं तालपत्रलिखितमेतत्पुस्तकं खम्भातनगरादधिगतम्. पूर्ववर्षे च जीर्णपुस्तकद्वयमस्माभिरप्यधिगतम्. किं त्वेतानि त्रीण्यपि पुस्तकान्यसमाप्तान्यशुद्धानि च सन्ति. संपूर्णस्य शुद्धस्य च पुस्तकस्य लाभे निराशा वयमस्यातिदुर्लभप्राचीनमनोहरग्रन्थस्य मूलच्छेदो मा भूदिति तादृशस्यैव मुद्रणं कर्तुं प्रवृत्ताः स्मः. आशास्महे च विकलस्याप्यस्य ग्रन्थस्य खण्डेन्दोरिव विलोकनं मनागपि मनोविनोदावहं भविष्यति सहृदयानाम्. २. 'शम्भलीमतम्' इति पूर्वोक्ततालपत्रपुस्तके नाम वर्तते. शम्भली कुट्टनी च पर्यायशब्दौ.

चन्द्र[1]विभूषितदेहा भूति[2]रताः सद्भुजंग[3]परिवाराः ।
वारस्त्रियोऽपि यस्यां पशुपतितनुतुल्यतां याताः ॥ ५ ॥
अतितुङ्गसुरनिकेतनशिखरसमुत्क्षिप्तपवनचलिताभिः ।
मञ्जरितमिव विराजति यत्र नभो वैजयन्तीभिः ॥ ६ ॥
अविरतसंचरदबलाचरणतलालक्तकद्रवारुणितम् ।
स्थलकमलवतीलक्ष्मीं बिभर्ति वसुधातलं यत्र ॥ ७ ॥
यत्र च रमणीभूषणरवबधिरितसकलदिङ्मोभागे ।
शिष्याणामाचार्यैर्नावद्यं वार्यते पठताम् ॥ ८ ॥
दिव्यधराधरभूरिव या राजति मत्तवारणो[4]पेता ।
बहुलनिशीथवतीव[5] प्रोज्ज्वलधिष्ण्यो[6]पशोभिता या च ॥ ९ ॥
यतिगण[7]गुणसमुपेता या नित्यं छन्दसामिव प्रचितिः ।
वनपङ्क्तिरिव सशाला[8] तुरुष्कसेनेव बहुलगन्धर्वा[9] ॥ १० ॥
तारागणोऽकुलीनः[10] प्रियदोषा[11] यत्र कौशिकाः[12] सततम् ।
गद्ये वृत्तच्यवनं[13] परगृहरोधस्तथाक्षेषु[14] ॥ ११ ॥
शूलभृतो ध्यानस्थाः(?) पदवेदिषु[15] यत्र धातुवादित्वम्[16] ।
सुरतेष्वबला[17]क्रमणं दानच्छेदो मदच्युतौ करिणाम् ॥ १२ ॥
तीव्रकरत्वं भानोरविवेको यत्र मित्रसुहृदानाम् (?) ।
योगिषु दण्डग्रहणं संधिच्छेदः[18] प्रगृह्येषु ॥ १३ ॥

---

१. चन्द्रः स्वर्णं भूषणविशेषो वा; (पक्षे) हिमांशुः. २. भूतिरैश्वर्यं भस्म च. ३. भुजंगाः षिङ्गाः; (पक्षे) सर्पाः. ४. मत्तवारणः प्रासादवीथीनां वरण्डकः; (पक्षे) मत्तगजः. ५. कृष्णपक्षरात्रिरिव. ६. धिष्ण्यानि गृहाणि; (पक्षे) नक्षत्राणि. ७. यतिगणः संन्यासिसमूहः; (पक्षे) यतिः पाठविच्छेदस्थलम्, गणाश्चाष्टौ मगणाद्याः, तद्गुणेन समुपेता. ८. सप्राकारा सगृहा वा; (पक्षे) सवृक्षा सवृक्षविशेषा वा. ९. सगायना साश्वा च. १०. अकुलीनः, न भूमिलीनः, आकाशस्थित इति यावत्; (पक्षे) असत्कुलोत्पन्नः. ११. दोषा रात्रिः; (पक्षे) दुर्गुणाः. १२ उलूकाः. १३. चारित्रभङ्गः; (पक्षे) छन्दोभङ्गः. १४. अष्टापदक्रीडायाम्. १५. वैयाकरणेषु. १६. धातवो भूवादयः; (पक्षे) पारदादीनां धात्वन्तराणामप्यौषधप्रक्षेपेण ये कलधौतत्वं संपादयन्ति ते धातुवादिनः. ते च प्रायो वञ्चका भवन्तीति तात्पर्यम्. १७. नारीणाम्; (पक्षे) दुर्बलस्य. १८. संधिच्छेदश्चौरकृतं संधिभेदनम्; (पक्षे) संधिप्रगृह्यौ व्याकरणप्रसिद्धौ.

छन्दःप्रस्तारविधौ गुरवो यस्यामनार्जवस्थितयः।
वीणायां परिवादो द्विजनिलयेष्वप्रसन्नत्वम् ॥ १४ ॥
अनुरूपवृत्तघटना सत्कविकृतरूपके च लोके च।
रमणीवचने यस्यां माधुर्यं काव्यबन्धे च ॥ १५ ॥
यस्यामुपवनवीथ्यां तमालपत्राणि युवतिवदने च।
नखरप्रहाररणितं तन्त्रीवाद्येषु सुरतकलहेषु ॥ १६ ॥
नन्दनवनाभिरामा विबुधवती नाकवाहिनीजुष्टा।
अमरावतीव यान्या विश्वसृजा निर्मिता जगति ॥ १७ ॥
तस्यां खगपतितनुरिव विलासिनां हृदयशोकसंजननी।
आकृष्टेश्वरहृदया प्रालेयनगाधिराजतनयेव ॥ १८ ॥
संसक्तभोगिनेत्रा मन्दरधरणीभृतो यथा मूर्तिः।
उपरि गता शूलानामन्धासुरगात्रलेखेव ॥ १९ ॥
समुवास वाररामा मानसवसतेः शरीरिणी शक्तिः।
निःशेषवेशयोषिद्विभूषणं मालती नाम ॥ २० ॥ (विशेषकम्)
पेशलवचसां वसतिर्लीलानामालयः स्थितिः प्रेम्णः।
भूमिः परिहासानामावसथो वक्रकवितानाम् ॥ २१ ॥
सा शुश्राव कदाचिद्धवलालयपृष्ठदेशमधिरूढा।
केनापि गीयमानां प्रसङ्गपतितामिमामार्याम् ॥ २२ ॥
'यौवनसौन्दर्यमदं दूरेणापास्य वारवनिताभिः।
यत्नेन वेदितव्याः कामुकहृदयार्जनोपायाः' ॥ २३ ॥

---

१. छन्दःशास्त्रे गुर्वक्षरव्यञ्जकरेखा वक्रा क्रियते. २. प्रसन्ना सुरा. ३. तापिच्छवृक्षः; (पक्षे) तिलकम्. ४. नन्दनं मनोहारि वनम्; (पक्षे) तन्नामकं वनम्. ५. विबुधाः पण्डिता देवाश्च. ६. गङ्गा ७. बिले आसत इति बिलासिनः सर्पाः; (पक्षे) विलसनशीला भोगिनः. श्लेषे बवयोरभेदः. ८. पार्वतीव. ९. संसक्तानि भोगिनां कामिनां नेत्राणि लोचनानि यस्याम्; (मन्दराचलपक्षे तु) संसक्तं भोगिरूपं सर्परूपं नेत्रं मन्थनरज्जुर्यस्याम्. १०. शूलानां पण्यस्त्रीणाम्; (पक्षे) त्रिशूलानाम्. अन्धकासुरशरीरं महादेवेन शूलोपरि स्थापितमिति पुराणम्. ११. 'वक्रकथिकानाम्' इति पाठान्तरम्. १२. 'देवालय–' इति पा०. १३. 'गायमानाम्' इति पा०.

श्रुत्वाथ विपुलजघना मनसीदं मालती चकार चिरम् ।
अतिसांप्रतमुपदिष्टं सुहृदेवानेन साधुना पठता ॥ २४ ॥
तद्गत्वा[1] पृच्छामो विकरालां[2] कलितसकलसंसाराम् ।
यस्याः कामिजनौघो दिवानिशं द्वारमध्यास्ते ॥ २५ ॥
इति मनसि सा निवेश्य द्रुततरमवतीर्य वेश्मनः शिखरात् ।
विकरालाभवनवरं[3] परिजनपरिवारिता प्रययौ ॥ २६ ॥
अथ विरलोन्नतदशनां निम्नहनुं स्थूलचिपिटनासाग्राम् ।
उल्बणचूचुकलक्षितशुष्ककुचस्थानशिथिलकृत्तितनुम् ॥ २७ ॥
गम्भीरारक्तदृशं निर्भूषणलम्बकर्णपालीं[4] च ।
कतिपयपाण्डुरचिकुरां प्रकटशिरासंततायतग्रीवाम्[5] ॥ २८ ॥
सितधौतवसनयुगलां विविधौषधिमणिसनाथगलसूत्राम् ।
तन्वीमङ्गुलिमूले तपनीयमयीं च बालिकां दधतीम् ॥ २९ ॥
गणिकागणपरिकरितां[6] कामिजनोपायनप्रसक्तदृशम् ।
आसन्द्यामासीनां[7] विलोकयामास विकरालाम् ॥ ३० ॥ (कुलकम्)
अथ सा विधाय दूरात्क्षितिमण्डललीनमौलिना प्रणतिम् ।
परिपृष्टकुशलवार्ता समनुज्ञातासनं भेजे ॥ ३१ ॥
अथ विरचितहस्तपुटा सप्रश्रयमासनं समुत्सृज्य ।
इदमूचे विकरालामवसरमासाद्य मालती वचनम् ॥ ३२ ॥
विदधासि हरिमकौस्तुभमहरिं हरिमगजनाथममरेन्द्रम् ।
अद्रविणं द्रविणपतिं नियतं मतिगोचरे पतितम् ॥ ३३ ॥
अयमेव बुद्धिविभवं हृतविभवस्ते पटच्चरावरणः ।
कामुकलोकः कथयति सत्रागारेषु भुञ्जानः ॥ ३४ ॥
उपसंहृतान्यकर्मा धनवर्मा नर्मदाङ्घ्रियुगलस्य ।
सकलसमर्पितसंपद्यदुपेतः पादपीठत्वम् ॥ ३५ ॥

---

१. 'तद्वृद्धाम्' इति पा०. २. 'विकरालीम्' इति पा०. ३. 'विकरालीभवन–' इति पा०. ४. 'पालिं' इति पा०. ५. संनतायत–' इति पा०. ६. 'परिकलिताम्' इति पा०. ७. आसन्द्यां वेत्रासने इत्यर्थः.

यदुपगतो नयदत्तः सागरदत्तस्य मध्यमः पुत्रः ।
प्रीणाति मदनसेनां विधाय पितृमन्दिरं रिक्तम् ॥ ३६ ॥

यल्लीलार्पितचरणौ मञ्जर्या भट्टपुत्रनरसिंहः ।
परितोषं व्रजति परं मृदु मृद्नन्पाणियुगलेन ॥ ३७ ॥

यन्निःशेषितविभवो दीक्षितभवदेवपुत्रशुभदेवः ।
निर्भर्त्सितोऽपि नोज्झति केशवसेनागृहद्वारम् ॥ ३८ ॥

अन्या अपि कामिजनं साधारणयोषितो यदाक्रम्य ।
विदधति कर्पटशेषं विलसितमेतत्तवोपदेशानाम् ॥ ३९ ॥ (कुलकम्)

हीनान्वयजन्मानो गुणहीना रोगिणो निराकृतयः ।
उपसेविता मयापि प्रकटीकृतरागसौष्ठवं पुरुषाः ॥ ४० ॥

मातः किं विदधामो हतधातुर्वामताभियोगेन ।
नासादयाम दृश्यं निजतनुपण्यप्रसारकेणापि ॥ ४१ ॥

तत्कुरु मातरनुग्रहमभिधत्स्व ममापि देहिनो भोग्यान् ।
तेषां च वेशचेष्टितमनसिजशरजालपातनोपायान् ॥ ४२ ॥

इति गिरमुदीरयन्तीं सप्रेमामृश्य पाणिना पृष्ठे ।
रुचिरवचो विकराला रुचिराकृतिमालतीमूचे ॥ ४३ ॥ (कुलकम्)

अयमेव दह्यमानस्मरनिर्गतधूमवर्तिकाकारः ।
चिकुरभरस्तव सुन्दरि कामिजनं किंकरीकुरुते ॥ ४४ ॥

अयमेव ते कृशोदरि मन्दोल्लसितभ्रुविभ्रमाधारः ।
अधरीकरोति धीरान्मधुरस्मितसुभगवीक्षितविशेषः ॥ ४५ ॥

इयमेव दशनकान्ती रतिकान्ताकूतमतितरां कुरुते ।
श्रुतिपथमप्युपयाता नियतं तव कामिनां मनसि ॥ ४६ ॥

इयमेव दशनपङ्क्ती रुचिराचिरकान्तिदामसमकान्तिः ।
उत्पादयति नितान्तं तव मन्मथदाहवेदनां पुंसाम् ॥ ४७ ॥

इदमेव समुल्लपितं लीलावतिविजितपरभृतध्वनितम् ।
तव निःशेषभुजंगव्याकर्षणसिद्धमन्त्र उच्चरितः ॥ ४८ ॥

इदमेव मकरकेतननिकेतनं स्तनयुगं तवाभोगि ।
भोगवति भोगसाधनमपरोऽगायग्रहो व्यर्थः ॥ ४९ ॥
इदमेव बाहुयुगलं मृणालतनुसुन्दरं तवाभोगि ।
कस्य न जनयति मदनं कनकाङ्गदभूषणं सुतनु ॥ ५० ॥
अयमेव मध्यदेशः कंदर्पादेशकरणचतुरस्ते ।
प्रकृशोऽपि शरीरवतो दशमीं प्रापयति मन्मथावस्थाम् ॥ ५१ ॥
इयमेव रोमराजिः संकल्पजचापयष्टिगुणशोभाम् ।
दधती विदधाति तव स्मरसायकशल्यविक्लवान्यूनः ॥ ५२ ॥
इदमेव च[1] पृथुजघनं कलधौतशिलातलाभिरमणीयम् ।
तव तरुणि वशीकरणं यतिसंयतिनाशकारि करभोरु ॥ ५३ ॥
इदमेव तवोरुयुगं रम्भास्तम्भोपमं मनोहारि ।
वद सुन्दरि नाभिमतं मदनज्वरशान्तये कस्य ॥ ५४ ॥
यौवनकल्पतरोस्ते कनकलताविभ्रमं सुवृत्तमिदम् ।
जङ्घायुगलं नेच्छति कामफलप्राप्तये क इह ॥ ५५ ॥
निर्जितदाडिमरागं विजितस्थलकमलिनीविलासमिदम् ।
तव तरुणि चरणयुगलं कस्य न मानसमलंकुरुते ॥ ५६ ॥
ह्रेपयति वारणेन्द्रं हंसं हसति प्रयातमिदमेव ।
तव लीलावति ललितं यूनां हृदयानि मथ्नाति ॥ ५७ ॥
तदपि यदि ते कुतूहलमवधानं [2]संविधाय तनुमध्ये ।
आकर्णय कथयामि स्वबुद्धिविभवानुसारेण ॥ ५८ ॥
स्वीकुरु तावत्प्रथमं नृपसेवकभट्टसूनुमतियत्नात् ।
स्वाधीनामतिविपुलां यदि संपदमीहसे सुतनु ॥ ५९ ॥
प्रत्यासन्नग्रामे स्वयं प्रभुः पितरि नित्यकटकस्थे ।
भट्टसुतश्चिन्तामणिराकृष्टो भवति नियमेन ॥ ६० ॥
शृणु तस्य चारुहासिनि वेषग्रहणं च चेष्टितं चैव ।
निपतति तथा च तूर्णं प्रियसुरभिशरासनप्रसरे ॥ ६१ ॥

---

१. 'पृथुलजघनम्' इति पा०. २. 'संनिधाय' इति पा०.

स्थूलस्थापितचूडः पञ्चाङ्गुलमात्रकेशविन्यासः ।
लम्बश्रवणनिवेशितकरपत्रकघटितदन्तपङ्क्तिश्च[1] ॥ ६२ ॥

करशाखार्पितमुद्रिकचामीकरकण्ठसूत्रिकाभरणः ।
परिमृष्टगात्रकुङ्कुमकिंचित्पिञ्जरितसर्वाङ्गः ॥ ६३ ॥

प्रविलम्बिकुसुमदामकगलमण्डनजातरूपकृतशोभः ।
अन्तर्निविष्टसिक्थकतौरुष्किकखुम्भिकादिचरणत्रः[3] ॥ ६४ ॥

नानावर्णविवेष्टितबहलदशापाशबद्धततकेशः[4] ।
एकस्मिन्दलवीटकमपरस्मिन्सीसपत्रकं कर्णे ॥ ६५ ॥

उच्चण्डकनकगर्भितकुङ्कुमपिञ्जरितवसनपरिधानः[5] ।
स्थूलतरकाचचर्चकमालां च गले दधानेन ॥ ६६ ॥

वृश्चिकरञ्जितकररुहकरमूलनिबद्धशङ्खचक्रेण ।
प्रथमवयस्त्वं भजता ताम्बूलकरङ्कवाहिनानुगतः ॥६७॥(कुलकम्)[6]

श्रेष्ठिवणिग्विटकितवप्रधानरङ्गस्य सुमहतो मध्ये ।
शूलापालस्थापितकतिपयवृद्धोरुपीठिकासीनः ॥ ६८ ॥

उत्सङ्गार्पितखड्गैरयथातथभाषिभिर्मदौद्धत्यम् ।
बिभ्राणैरनुजीविभिरधिष्ठितः पञ्चषैः पुरुषैः ॥ ६९ ॥

चतुरतरसेवकार्पितपृष्ठपरिक्षिप्तपूर्वदेहांशः[7] ।
अन्तर्धृतताम्बूलश्वोच्छूनकपोलकलितकरपर्णः[8] ॥ ७० ॥

अनपेक्षितप्रसङ्गः पुनः पुनः पठति सोन्नतभ्रूकः ।
गाथां श्लोकप्रायां भावितचेता यथातथाधीताम् ॥ ७१ ॥

विसयलोलितमौलिः पार्श्वगतांस्ताडयन्रसावेगात् ।
हा कटु साध्विति वादैरन्तरयति परसुभाषितश्रवणम् ॥ ७२ ॥

---

१. 'दशनपङ्क्तिश्च' इति पा०. २. 'पिञ्जरितवसनसंवीतः' इति पा०. ३. 'सिक्थतौरुष्किकखुम्भिकादिचरणान्तः' इति पा० ४. 'विचेष्टित' इति पा०. ५. 'वस्त्रपरिधानः' इति पा०. ६. पुस्तकान्तरे 'विशेषकम्' इत्यस्ति. ७. देहार्धः. ८. 'ताम्बूलप्रोत्फुल्लकपोलगलित' इति पा०.

इदमुक्तो रहसि रुषा तातेन नृपो नृपेण तातोऽपि ।
इति पितुराविष्कुरुते महीभृतः प्रणयविश्वासौ ॥ ७३ ॥
पत्रच्छेदमजानञ्ज्ञानन्वा कौशलं कलाविषये ।
प्रकटयति जनसमाजे बिभ्राणः पत्रकर्तरीं सततम् ॥ ७४ ॥
ब्रह्मोक्तनाट्यशास्त्रे गीते मुरजादिवादने चैव ।
अभिभवति नारदादीन्प्रावीण्यं भट्टपुत्रस्य ॥ ७५ ॥
वसुनन्दचित्रदण्डकमुग्धायुधखड्गधेनुबन्धेषु ।
त्यजति पुरतोऽस्य नित्यं भार्गवतां परशुरामोऽपि ॥ ७६ ॥
वात्स्यायन[1]मयमबुधं बाह्यान्दूरेण दत्तकाचार्यान्[2] ।
गणयति मन्मथतन्त्रे पशुतुल्यं राजपुत्रं[3] च ॥ ७७ ॥
प्रपलायनैकहृदये यो विक्रममातनोति हरिणेऽपि ।
सिंहस्य तस्य शौर्यं त्रपाकरं भवति भट्टपुत्रस्य ॥ ७८ ॥
आखेटकेऽपि कौतुकमस्त्येव जयश्च चललक्ष्ये ।
भट्टतनयेन खेलति भट्टसुतः किं त्वति[4]प्रकटम् ॥ ७९ ॥
इति निजसेवकनिगदितरमणीयवचःश्रवणपरितुष्टा[5] ।
अन्तर्मुदिता ब्रूते मामेव खलीकरोतीति ॥ ८० ॥ (संदानितकम्)
कतमत्कतमल्लग्नं प्रस्थाने का च नर्तकी भर्ता ।
विटखटके का नृत्यति कोहल[6]भरतोदितक्रियया ॥ ८१ ॥
कीदृक्षो[7] नयमार्गे धेनुकरचिते च तालके[8] कीदृक् ।
प्रेङ्खणकादायेवं पृच्छति नृत्योपदेशकं यत्नात् ॥ ८२ ॥

---

१. कामसूत्रकर्ता वात्स्यायनः प्रसिद्ध एव. २. कामशास्त्राङ्गभूतस्य वैशिकसंज्ञकस्य षष्ठाधिकरणस्य पृथक्कर्ता दत्तकाचार्यो वात्स्यायनादपि पूर्वकाले पाटलिपुत्रनगरे बभूवेति वात्स्यायनीयकामसूत्रतो जयमङ्गलाख्यतट्टीकातश्च ज्ञायते. 'दन्तिलाचार्यान्' इति पा०. ३. राजपुत्रोऽपि कश्चन कामशास्त्राचार्य एव स्यात्. किं तु नाद्यापि ज्ञातः. ४. 'न्वति' इति पा०. ५. 'परितुष्टया' इति पा०. ६. कोहलो नाम कश्चन नाट्यशास्त्राचार्यः. तद्ग्रन्थस्थाः केचन श्लोका मुरारीनाटकादिटीकासूपलभ्यन्ते. भरतस्तु प्रसिद्ध एव. ७. 'ईदृक्षे' इति पा०. ८. 'तानके' इति पा०.

सुमनोमालां कण्ठात्सादरचेता ददाति नर्तक्यै ।
अपनीय सताम्बूलामनवसरे साधुवादं च ॥ ८३ ॥
भुजपतनमात्रसंस्थितिलालित्योद्वहनपार्श्ववलितानि ।
अनयैव निर्मितानि स्थानकशुद्धिश्च [1]चातुरश्र्यं च ॥ ८४ ॥
प्रविभक्तैर्भावरसै[2]रभिनयभक्त्या परिक्रमैश्चित्रैः ।
रम्भामप्यतिशेते किमुतेतरनर्तकीलोकम् ॥ ८५ ॥
इत्यपसारकविरतादविरतमुच्छलितकण्ठमत्युच्चैः ।
वर्णयति भावितात्मा लक्षितपदमात्रया [3]पातम् ॥ ८६ ॥
प्रायेण भट्टतनयो भवतीदृशवेषचेष्टितो भद्रे ।
तं मदनवागुरान्तः पातयसि यथा तथा ब्रूमः ॥ ८७ ॥
चतुरा प्रागल्भ्यवती परचित्तज्ञानकौशलोपेता ।
योज्या तस्मिन्दूती वक्रोक्तिविभूषिता प्रयत्नेन ॥ ८८ ॥
समुपेत्य तयावसरे ताम्बूलं सुमनसश्च दत्त्वे[4]त्थम् ।
अभिधातव्यः सुन्दरि मकरध्वजदीपकैर्वचनैः ॥ ८९ ॥
जन्मसहस्रोपचितैः पुण्यचयैरद्य फलितमस्माकम् ।
यस्त्वं नयनानन्दन नयनावसरं समेतोऽसि ॥ ९० ॥
[5]चाटुक्रममनुरागं प्रणयरुषौ विरहजनितशोकार्तिम् ।
[6]प्रकटयति वाररमणी नटीव शिक्षाभियोगेन ॥ ९१ ॥
प्रवयसि यौवनशालिनि हीनकुले सत्कुलप्रसूते च ।
रोगवति दृढशरीरे समचित्ता योगिनश्च [7]गणिकाश्च ॥ ९२ ॥
उपचरिताप्यतिमात्रं पण्यवधूः क्षीणसंपदः पुंसः ।
पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि ॥ ९३ ॥
[8]इत्थं दृढतरवासितमनसां पुंसामसांप्रतं [9]पुरतः ।
वेशविलासवतीनामशरीरशरव्यथाकथनम् ॥ ९४ ॥ (कुलकम्)

---

१. 'वातुरश्म्यश्च' इति, 'चातुरस्यं च' इति च पा०. २. 'अभिनव' इति पा०. ३. 'यातम्' इति पा०. ४. इदम्' इति पा०. ५. 'चाटूक्ति सानुरागं' इति पा०. ६. 'विदधाति' इति पा०. ७. 'गणिका च' इति पा०. ८. 'युक्तम्' इति पा०. ९. 'कुरुते' इति पा०.

केवलमगणितलाघवदूरपरित्यक्तधीरताभरणा ।
मुखरयति मां दुराशा दग्धवती तेन कथयामि ॥ ९५ ॥
[1]हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया [2]भजता ॥ ९६ ॥
क्षणमुत्कण्टकिताङ्गी क्षणमुल्बणदाहवेदनायत्ता ।
क्षणमुपजातोत्कम्पा स्वेदार्द्रवपुः क्षणं भवति ॥ ९७ ॥
[3]दूरविभावितकार्श्या मुहुरुज्झितधीरभावमत्युच्चैः ।
रोदिति[4] गायति हृष्यति मुह्यति च स्तम्भिनी भवति ॥ ९८ ॥
पतति मुहुः पर्यङ्के मुहुरङ्के परिजनस्य मुहुरवनौ ।
किसलयकल्पिततल्पे मुहुरम्भसि मुहुरनङ्गसंतप्ता ॥ ९९ ॥
महिषीव पङ्कदिग्धा हंसीव मृणालवलयपरिवारा ।
सुभग मयूरीवासौ [5]भुजंगविद्वेषिणी जाता ॥ १०० ॥
कदलीचम्पकचन्दनपङ्केरुहनीर[6]घनसारम् ।
सुन्दर शशधर[7]कान्तं नो शान्त्यै मदनहुतभुजस्तस्याः ॥ १०१ ॥
[8]अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥ १०२ ॥
संकल्पैरुपनीतं त्वामन्तिकमुल्लसन्मनोवृत्तिः ।
दृढमालिङ्गति पश्चात्स्वभुजापीडेन याति वैलक्ष्यम् ॥ १०३ ॥
कुसुमामोदी पवनः पिककूजितभृङ्गसार्थरसितानि ।
इयमियती सामग्री घटिता [9]विधिनैव तद्विनाशाय ॥ १०४ ॥

---

१. 'हृदयम्' इत्याद्यार्या काव्यप्रकाशे दशमोल्लासेऽतिशयोक्तिप्रकरण उदाहृतास्ति. तत्र काव्यप्रकाशटीकाकाराणां प्रायो भ्रम एव जातः. मालतीमाधवस्थामिमां जानन्कमलाकरभट्टो व्याख्यातवान्. 'मालत्याः' इत्यस्य स्थाने 'मालव्याः' इति पाठं कल्पयित्वा मालविकाग्निमित्रस्थामिमां कलयन्महेश्वरो व्याख्याति स्म. एवमन्येऽपि. २. 'व्रजता' इति पा०. ३. 'मुहुरविभावितहास्या' इति पा०. ४. 'रोदिति गायति च पुनः पुनश्च मौनावलम्बिनी भवति' इति पा०. ५. भुजंगाः सर्पा विटाश्च. ६. 'घनसाराः' इति पा०. ७. 'कान्ता' इति पा०. ८. उदाहृतेयमार्या काव्यप्रकाशस्याष्टमनवमोल्लासयोः. ९. 'दैवेन' इति पा०.

अबलां बलिना नीतां दशामिमा मकरकेतुना रक्ष ।
आपद्यबलोद्धृतये[1] भवति हि शुभजन्मनां जन्म ॥ १०५ ॥
नो गृह्णन्ति यथार्थानर्थिजनैर्निगदिता गिरः प्रायः ।
मालत्या गुणलेशं शृणु धृष्टतया तथापि कथयामि ॥ १०६ ॥
आस्फालयतो नूनं धनुरतनोः कौसुमं रजः पतितम् ।
संगृह्य[2] सा सुगात्री विश्वसृजा निर्मिता तेन ॥ १०७ ॥
उपहसति गिरिसुताया लावण्यं येन सततलग्नेन ।
न द्रवतामुपनीतं भोगीन्द्रविभूषणस्य देहार्धम् ॥ १०८ ॥
शशधरबिम्बार्धगतां छायामिव सैंहिकेयवदनस्य ।
अलिपटलनीलकुटिलामलकावलिमलिकसंनिधौ वहति ॥ १०९ ॥
सरसिजमस्थिरशोभं विभ्रमरहितं च मण्डलं शशिनः ।
केन समेतु समत्वं हृदयप्रिय मालतीवदनम् ॥ ११० ॥
अलिरुपरि तदीक्षणयोर्भ्रान्त्वा सौगन्ध्यसूचितविशेषः ।
निपतति कर्णाम्बुरुहे निर्गुणताप्यवसरे साध्वी ॥ १११ ॥
बिभ्राणेऽरुणिमानं सहजं जितबन्धुजीवरुचिमधरे ।
यदलक्तकविन्यसनं तत्तस्या मण्डनक्रीडा ॥ ११२ ॥
चित्रमिदं यदि कृशता तस्या बलिपरिगृहीतमध्यस्य ।
अथवा नो विधिविहिता[3] महताप्यपनीयते तनुता ॥ ११३ ॥
आस्तामपरस्तावत्तस्याः स्मरवेसति[4]पृथुतरनितम्बः ।
श्लथयति कपिलमुनेरपि दृक्पथपतितः समाधानम् ॥ ११४ ॥
तस्या रम्भावपुषो रम्भोपममूरुयुगलमवलोक्य ।
मकरध्वजोऽपि सहसा निजसायकलक्ष्यतां याति ॥ ११५ ॥
जघनभरालसयाता नोयाता[5] सा विलोचनावसरम् ।
तिष्ठति तेन मनोहर शरजन्मा[6] ब्रह्मचर्येण ॥ ११६ ॥

---

१. 'आपत्पतितोद्धृतये' इति पा०. २. 'संहृत्य सा सुमध्या विश्वसृजा निर्मिता जगति' इति पा०. ३. 'निहिता' इति पा०. ४. 'वसतिः' इति पा०. ५. 'नो याता' इति पा०. ६. कार्तिकेयः.

यदि कथमपि मधुमथनः पश्यति तामसमबाणसर्वस्वम् ।
[1]तदसारभारभूतामिव लक्ष्मीमुरसि विनिहितां मनुते ॥ ११७ ॥
यदि पतति सा कथंचिद्वीक्षणविषये[2] हरस्य तदवश्यम् ।
त्रिभुवनमशिवं कुरुते वामेतरदेहभागमासाद्य ॥ ११८ ॥
सौन्दर्यं तत्तादृशमशेषयोषिद्विलक्षणं सृजतः ।
यन्निष्पन्नं धातुस्तन्मन्ये काकतालीयम् ॥ ११९ ॥
सहजविलासनिवासं तस्या वपुरनभिवीक्षमाणस्य ।
मन्ये नाकाधिपतेः सहस्रमपि चक्षुषां विफलम् ॥ १२० ॥
शिथिलयतु कुसुमचापं क्षिपतु शरान्वाणधौ मनोजन्मा ।
संसारसारभूता विचरति भुवि मालती यावत् ॥ १२१ ॥
[3]वात्स्यायनमदनोदयदत्तकविटपुत्र[4]राजपुत्राद्यैः ।
उल्लपितं यत्किंचित्तत्तस्या हृदयदेशमध्यास्ते ॥ १२२ ॥
भरतविशाखिलदन्तिलवृक्षायुर्वेदचित्रसूत्रेषु ।
पत्रच्छेदविधाने भ्रमकर्मणि पुस्तसूदशास्त्रेषु ॥ १२३ ॥
आतोद्यवादनविधौ नृत्ते गीते च कौशलं तस्याः ।
अभिधातुं यदि शक्तो वदनसहस्रेण भोगिनामीशः ॥ १२४ ॥ (कुलकम्)
परिगलदालोलांशुकमपयन्त्रणमु[5]रसि मालती रभसात् ।
निपतति नापुण्यवतां रतिलालसमानसा रहसि ॥ १२५ ॥
रतिरसरभसास्फालनचलवलयनिनादमिश्रितं तस्याः ।
तत्कालोचितम[6]णितं श्रुतिपथमुपयाति नाल्पपुण्यस्य ॥ १२६ ॥
इत्थमभिधीयमानः शुभमध्ये यदि भवेदुदासीनः ।
एवं ततोऽभिधेयः संदर्शितकोपया दूत्या ॥ १२७ ॥
किं सौभाग्यमदोऽयं यौवनलीलाभिरूपतादर्पः ।
सहजप्रेमोपनतां मालतिकां न बहु मन्यसे येन ॥ १२८ ॥

---

१. 'तदसारभूतमेव स लक्ष्मीवपुरुरसि विनिहितं मनुते' इति पा०. २. 'विषयम्' इति पा०. ३. वात्स्यायनादयः कामशास्त्रकाराः. ४. 'विप्रपुत्रेषु' इति पा०. ५. 'उपरि' इति पा०. ६. 'मणितं रतिकूजितम्'. 'भणितम्' इति' 'रणितम्' इति च पा०.

न गणयति या कुलीनान्द्रविणवतः शस्त्रवेदिनः प्रणतान् ।
सा भवदर्थे शुष्यति कुस्थाननिवेशितं धिगनुरागम् ॥ १२९ ॥
कमलवती तीव्ररुचौ बहुभसनि शंभुशिरसि शशिलेखा ।
सा च त्वयि पशुकल्पे यदभिरता तेन मे कृशता ॥ १३० ॥
असरलमरसं[1] कठिनं दुर्ग्रहमस्निग्धमाश्रिता खदिरम् ।
यदुपैति वाच्यपदवीं मालतिका[2] तत्किमाश्चर्यम् ॥ १३१ ॥
अथवा कः खलु दोषो यदतुल्यतयोपजनितवैलक्ष्यः ।
स्वाधीनामपि सरसां परिहरति मृणालिकां ध्वाङ्क्षः ॥ १३२ ॥
मात्र[3] करिष्यसि खेदं निष्ठुरमुक्तोऽसि यन्मया सुभग ।
यूनां हि रक्ततरुणीसुहृदभिहितपरुषमाभरणम् ॥ १३३ ॥
चन्द्रमसेव ज्योत्स्ना कंसासुरवैरिणेव वनमाला ।
कुसुमशरासनलतिका कुसुमाकरवल्लभेनेव ॥ १३४ ॥
मदलीला हलिनेव स्तनयुगलेनेव हारलता[4] ।
रम्यापि सा सुगात्री[5] रम्यतरा भवतु संगता भवता ॥ १३५ ॥
किं बहुना यदि यूनामुपरि विधातुं समीहसे चरणम् ।
तत्कुरु रमणीरत्नं प्रेमोज्ज्वलसंगतं तूर्णम् ॥ १३६ ॥
अथ तद्वचनश्रवणप्रविजृम्भितमदनभट्टदायादः[6] ।
उपचरणीयः सुन्दरि निजवसतिमुपागतस्त्वयाप्येवम् ॥ १३७ ॥
दूरादभ्युत्थानं प्रणमनमात्मासनप्रदानं च ।
प्रविधेयमञ्चलेन प्रस्फोटनमङ्घ्रियुगलस्य ॥ १३८ ॥
ईषदयत्नप्रकटितकक्षोदरबाहुमूलकुचयुगलम्[7] ।
संदर्श्य झटिति यास्यसि नायकदृग्गोचरात्तूर्णम्[8] ॥ १३९ ॥
अथ पर्यङ्कसनाथं दीपोज्ज्वलकुसुमधूपगन्धाढ्यम् ।
विततवितानकरम्यं प्रवेशितो वासकागारम्[9] ॥ १४० ॥

---

१. अलसम्' इति पा०. २. मालतीनाम लताविशेषः. ३. मा-अत्र. ४. 'हारलतिका च' इति पा०. ५. 'साधुगात्री' इति पा०. ६. 'श्रवणात्परिचुम्बितमदन–' इति पा०. प्रविजृम्भितमदनश्चासौ भट्टदायादो भट्टसुतः. ७. 'कुचभागम्' इति पा०. ८. 'दृग्गोचरा तूर्णम्' इति पा०. ९. 'वासकावासम्' इति पा०.

[1]मात्रा ते गुरुजघने सादरमवतारणादिकं कृत्वा ।
अभिनन्दनीय एभिर्वचनविशेषैः प्रयत्नेन ॥ १४१ ॥ (कुलकम्)

अद्याशिषः समृद्धाः परितुष्टा इष्टदेवता अद्य ।
कल्याणालंकारो यदलंकृतवानिदं वेश्म ॥ १४२ ॥

अनुरूपपात्र[2]घटनं कुर्वाणस्याद्य कुसुमबाणस्य ।
[3]सुचिराद्धत संजातः [4]शरासनाकर्षणश्रमः सफलः ॥ १४३ ॥

विन्यस्य शिरसि चरणं सुभगा [5]गणिकाजनस्य सकलस्य ।
सौभाग्यवैजयन्तीं संप्रति वत्सा समुत्क्षिपतु ॥ १४४ ॥

दुहितर एव श्लाघ्या धिग्लोकं पुत्रजन्म[6]संतुष्टम् ।
जामातर आप्यन्ते भवादृशा यदभिसंबन्धात् ॥ १४५ ॥

दृढपरिचया गुणज्ञा भवद्विधा [7]मानदा यदपि ।
तदपि [8]हृदयाभिनन्दन दुहितृस्नेहादहं [9]वक्ष्ये ॥ १४६ ॥

सहजप्रेमोपनता न्यस्ता त्वयि मालती तथा कार्यम् ।
न यथा भवति वराकी त्वद्विप्रियजन्मनां शुचां वसतिः ॥ १४७ ॥

मृदुधौतधूपिताम्बरमग्राम्यं मण्डनं च बिभ्राणा ।
परिपीतधूपवर्तिः स्थास्यसि [10]रमणान्तिके सुतनु ॥ १४८ ॥

सस्नेहं सव्रीडंससाध्वसं सस्पृहं च पश्यन्ती ।
किंचिद्दृश्यशरीरा प्रविरलपरिहासपेशलालापा ॥ १४९ ॥ (युग्मम्)

मातरि निर्यातायां परिजनमुक्ते च वासकस्थाने ।
अभियुञ्जाने रमणे वामाचरणं क्षणं कार्यम् ॥ १५० ॥

रतिसंगरविहितमतावाकर्षति रभसतः [11]पुरस्तस्मिन् ।
[12]कुट्टमितमाचरन्ती जनयिष्यसि किंचिदङ्गसंकोचम् ॥ १५१ ॥

---

१. 'मात्रा ते गुरुलाघवसादरमपवारणं कृत्वा' इति पा०. २. 'घटना[illegible]' इति पा०. ३. 'अचिरात्' इति पा०. ४. 'शरासनस्य श्रमः' इति पा०. ५. 'वेश्याजनस्य' इति पा०. ६. 'परितुष्टम्' इति पा०. ७. 'नार्थनार्हाः स्युः' इति पा०. ८. 'च नयनानन्दन' इति पा०. ९. 'वच्मि' इति पा०. १०. 'रमणे निजे' इति पा०. ११. 'पुनः' इति पा०. १२. 'केशाधरादिग्रहणे मोदमानेऽपि मानसे । दुःखितेव बहिः कुप्येद्यत्र कुट्टमितं हि तत् ॥' इति.

प्रारब्धे सुरतविधौ क्रमदर्शितचित्तयोनि[1]संवेगा[2] ।
अपशङ्कमर्पयिष्यसि निर्व्याजं पुत्रि गात्राणि ॥ १५२ ॥

यावद्वाञ्छति हन्तुं यद्द्रष्टुं यच्च विलिखितुं गात्रम् ।
तत्तदपसारणीयं सावेगं ढौकनीयं च ॥ १५३ ॥

दंशे सव्यथहुंकृतिमामर्दे विविधकण्ठरसितानि ।
नखविलिखने[3] च सीत्कृतिमाघातेषूल्बणं क्वणितम् ॥ १५४ ॥

ह्रस्वायासश्वासान्मुञ्चन्ती पुलकदन्तुरशरीरा ।
खिद्यत्सकलावयवा[4] प्रकरिष्यसि रागवृद्धये पुंसाम् ॥ १५५ ॥ (युग्मम्)

परभृतलावकहंसकपारावततुरगहृदयनिःस्वनितम्[5] ।
अनुकार्यमुचितकाले कलकण्ठि रुतैस्त्वया रसतः ॥ १५६ ॥

मा मा माममतिपीडय मुञ्च क्षणमदय नो समर्थास्मि ।
इति गद्गदास्फुटाक्षरमभिधातव्यस्त्वया कामी ॥ १५७ ॥

अनुबन्धमानुकूल्यं वामत्वं प्रौढता[6]मसामर्थ्यम् ।
सुरतेषु दर्शयिष्यसि कामुकभावं स्वयं[7] बुद्ध्वा ॥ १५८ ॥

असमञ्जसमश्लीलं दूरोज्झितधैर्यमविनयप्रसरम् ।
व्यवहारमाचरिष्यसि वृद्धिमुपेते रसावेगे[8] ॥ १५९ ॥

अविचेतित[9]नखरक्षतिरामीलितलोचना निरुत्साहा ।
नायककार्यसमाप्तौ[10] स्थास्यसि शिथिलीकृतावयवा ॥ १६० ॥

झगिति नितम्बावरणं निःसहतनुतां स्मितं सवैलक्ष्यम् ।
खेदालसां च दृष्टिं जनयिष्यसि मोहन[11]च्छेदे ॥ १६१ ॥

वृत्ते रताभियोगे स्पृष्ट्वा सलिलं विविक्त[12]भूभागे ।
प्रक्षाल्य पाणिपादं स्थित्वा क्षणमासने संमूह्य[13] कचान् ॥ १६२ ॥

---

१. चित्तयोनिः कामः. २. 'संयोगा' इति पा०. ३. 'नखरक्षतेषु सीत्कृतम्' इति पा०. ४. 'सर्वावयवा प्रचरिष्यसि रागमृद्धये' इति पा०. ५. 'निःश्वसितम्' इति पा०. ६. 'प्रौढभावसामर्थ्यम्' इति पा०. ७. 'स्फुटम्' इति पा०. ८. 'रतावसरे' इति पा०. ९. 'आवेदित' इति पा०. १०. 'समाप्त्यै' इति पा०. ११. मोहनं सुरतम्. १२. 'विकृष्टभूभागे' इति पा०. १३. 'समार्य' इति पा०.

उपयुक्त[1]रदनवासा शय्या[2]मारुह्य दर्शितप्रणया ।
इति वक्ष्यसि तं रमणं दृढतरमालिङ्गच रभसतः कण्ठे ॥ १६३ ॥ (युग्मम्)

[3]भट्टसुत नूनमिष्टा [4]तव जाया यदनुरक्तहृदयस्य ।
जनयति परितुष्टिमलं नापररामापरिष्वङ्गः ॥ १६४ ॥

सफलं तस्या जन्म स्पृहणीया सैव सकलललनानाम् ।
गौरी तयैव महिता सुभगंकरणं तपस्तया चरितम् ॥ १६५ ॥

सैवैका गुणवसतिस्तस्या एवान्वयः [5]सदा श्लाघ्यः ।
यस्याः शुभशतभाजः पाणिग्रहणं त्वया विहितम् ॥ १६६ ॥

[6]तिष्ठतु सा पुण्यवती वंशद्वयभूषणं वरारोहा ।
या नापयाति भवतो लक्ष्मीरिव नरकवैरिणो हृदयात् ॥ १६७ ॥

पातयसि कुवलयनिभे कौतुकमात्रेण लोचने यासु ।
ता अपि सत्यं सुन्दर [7]हर्षोच्छलिता न मान्ति गात्रेषु ॥ १६८ ॥ (संदानितकम्)

तनुरपि नाथप्रणयः प्रायो मुखरीकरोति लघुमनसः ।
स्वार्थ[8]निवेशितचित्ता [9]करोमि तेऽभ्यर्थनां तेन ॥ १६९ ॥

तीव्रस्मरतारुण्याच्चापलतः कौतुकेन [10]घृणया वा ।
मद्भाग्यसंपदा वा दूत्या वा कौशलात्स्वभावाद्वा ॥ १७० ॥

योऽयं प्रेमलवांशः प्रदर्शितोऽस्मासु जीवनोपायः ।
बाधा नात्र विधेया गणिकाजन[11]भावमन्यथा बुद्ध्वा ॥ १७१ ॥ (युग्मम्)

येन[12] स्नेहः क्रोधः शाठ्यं दाक्षिण्यमार्जवं व्रीडा ।
एतानि सन्ति तास्वपि जीवद्धर्मोपनीतानि ॥ १७२ ॥

निर्व्याजसमुत्पन्नप्रबलप्रेमाभिभूतहृदयानाम् ।
दयितविरहाक्षमाणां गणिकानां तृणसमाः प्राणाः ॥ १७३ ॥

---

१. 'वदन' इति पा०. २. अधिरुह्य' इति पा०. ३. 'भद्रसुत' इति पा०. ४. 'जाया ते' इति पा०. ५. 'सदा' इति पुस्तकान्तरे नास्ति. ६. 'तिष्ठति' इति पा०. ७. 'हर्षोल्लसिता' इति पा०. ८. 'अर्थे' इति पा०. ९. 'प्रकरोम्यभ्यर्थनाम्' इति पा०. १०. 'प्रणयाद्वा' इति पा०. ११. 'हृदयम्' इति पा०. १२. 'यत्र' इति पा०.

अत्राकर्णय साद्भुतमाख्यानं वर्णयामि यद्वृत्तम् ।
अद्यापि बिभर्ति वटो[1] विशेषणं यदभिसंबन्धात् ॥ १७४ ॥
'अस्ति महीतलतिलकं सरस्वतीकुलगृहं महानगरम् ।
नाम्ना पाटलिपुत्रं परिभूतपुरंदरस्थानम् ॥ १७५ ॥
त्रिभुवनपुरनिष्पादनकौशलमिव पृच्छतो विरिञ्चस्य ।
दर्शयितुं निजशिल्पं वर्णकमिव विश्वकर्मणा विहितम् ॥ १७६ ॥
अश्रेयोभिरनाश्रितमभिभूतं नाभिभूतिदोषेण ।
न[2] स्वीकृतमुपसर्गैः कलिकालमलैरनालीढम् ॥ १७७ ॥
पातालतलं भोगिभिरम्भोधिर्विविधरत्न[3]संघातैः ।
सुरसदनं विबुधगणैर्द्रविणोपचयैः पुरं कुबेरस्य ॥ १७८ ॥
म[4]हिलाभिरसुरविवरं कटकं हि हिमाचलस्य गन्धर्वैः ।
हरिनगरं क्रतुयूपैः शमविभवैर्मुनिजनस्थानम् ॥ १७९ ॥
तिष्ठन्तु सकलशास्त्रव्यालोकनवि[5]मलबुद्धयो विप्राः ।
सदसद्गुणनिर्णीतौ ललना अपि निकषभूमयो यत्र ॥ १८० ॥
कलिकालोदितभीत्या क्रतुहुतवहधूमकम्बलावरणः ।
तिष्ठन्निभृतोऽपि वृ[6]षश्चरितैरनुमीयते यत्र ॥ १८१ ॥
अपहरति पिधातुमिव स्वकलङ्कं शशधरः प्रसार्य करान् ।
रात्रौ यत्र वधूनां लावण्यं वदनकोषेभ्यः ॥ १८२ ॥
तिमिरपटलासिताम्बरमपहरदभिसारिकाजनौघस्य ।
निजतनुकान्तिवितानं वल्लभसंभोगविहि[7]तये यत्र ॥ १८३ ॥
यत्र नितम्बवतीनां वि[8]चलन्नयनान्तशितशरैर्व्रणितः ।
शिथिलयति पथिकलोकः स्वकलत्रसमागमोत्कण्ठाम् ॥ १८४ ॥
यत्र च कुलमहिलानामल्पत्वं वचसि पाणिपादे च ।
स्वच्छत्वमा[9]शये च व्यालोलत्वं विशालनेत्रे च ॥ १८५ ॥

---

१. न्यग्रोधवृक्षः. २. 'अस्वीकृतम्' इति पा०. ३. 'निचयैश्च' इति पा०. ४. 'रमणीभिः' इति पा०. ५. 'शुद्ध' इति पा०. ६. धर्मः. ७. 'विहितये' इति, 'विहतये' इति च पा०. ८. विचलन्नयनांशु' इति पा०. ९. 'आशयेषु' इति पा०.

[1]स्तनजघनचिकुरभारे घनता जीवेशसहज[2]रागे च ।
कुलदेवतार्चनविधौ बलिशोभा [3]मध्यभागे च ॥ १८६ ॥

गम्भीरता स्वभावे चेतोभवबाणतूणनाभौ च ।
विस्तीर्णता नितम्बे गुरुजनपूजानुरक्तचित्ते च ॥ १८७ ॥

हरिणायतेक्षणानां विच्छित्तिः कोषहरणम[4]स्त्रेषु ।
कुटिलत्वमलकपङ्क्तौ बालानां कामचेष्टितं यत्र ॥ १८८ ॥

संयमनमिन्द्रियाणामिनोपघातग्रहस्तमिस्रस्य ।
स्तब्धत्वं तालतरौ हारलतास्तरलसंगता यस्मिन् ॥ १८९ ॥

भुजगाः पररन्ध्रदृशः खण्ड्यन्ते प्रियतमाधरा यत्र ।
[5]सूचीव्यथानुभूतिर्नृत्याभ्यासप्रवृत्तानाम् ॥ १९० ॥

नतवपुरप्यतिसरला मन्थरगमनापि नर्मदा यस्मिन् ।
गुरुजनशास्त्ररतापि स्वभावसुभगाङ्गनाजनता ॥ १९१ ॥

तस्मिन्मखशतपूतः पुरुहूत इव द्विजन्मनां [6]प्रवरः ।
गुरुरिव विद्यावसतिर्वसति स पुरंदरो नाम्ना ॥ १९२ ॥

धर्मात्मजस्य सत्यं त्रिपुररिपोर्विजितकुसुमचापत्वम् ।
[7]हरिनाभिपङ्कजभुवो नियतेन्द्रियतां जहास यः सततम् ॥ १९३ ॥

न्यक्कृतवृष इति शर्वे याचक इति कौस्तुभाभरणे ।
पीडितवसुधासुत इति कपिले न बभूव यस्य बहुमानः ॥ १९४ ॥

[8]मार्गानुगतौ लुब्धो यः प्राणिवपुर्विनाशविमुखोऽपि ।
परिहृतपरदारोऽपि स्वाकाङ्क्षितगुरुजनप्रमदः ॥ १९५ ॥

यस्यान्वये महीयसि सरसीव समस्तसत्त्वनिजवसतौ ।
सच्चरितजन्मभूमौ विनिवारितकलिमलप्रसरे ॥ १९६ ॥

---

१. 'पीनपयोधरभारे' इति पा०. २. 'रागेषु' इति पा०. ३. 'मध्यदेशे च' इति पा०. ४. 'अब्जेषु' इति पा०. ५. 'सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे' इति मेदिनी. ६. 'प्रथमः' इति पा०. ७. 'चरितेन पङ्कजभुवो जितेन्द्रियत्वम्' इति पा०. ८. 'मार्गानुसृतौ' इति पा०; (पक्षे) मार्गस्य मृगसमूहस्य. लुब्धो व्याधः.

पितृतर्पणप्रसङ्गे [1]खङ्गग्रहणं न शौर्यदर्पे च ।
त्रुटनं मेखलिकानां वटुकजने नो रताभिसंमर्दे ॥ १९७ ॥
श्रुतिभेदेषु विवादो नो रिक्थवि[2]भागमन्युना कलितः ।
तेजस्विता हविर्भुजि न शमैकरतेषु भूमिदेवेषु ॥ १९८ ॥
जरतामेव स्खलनं [3]जपतामेवाधरस्फुरणम् ।
यजतामेव [4]समिद्रुचिरेणाजिन एव कृष्णसंपर्कः ॥ १९९ ॥
तस्याभूत्सकलकलोद्भासितपक्षद्वयस्य सुत एकः ।
नाम्ना सुन्दरसेनः कच इव [5]वचसामधीशस्य ॥ २०० ॥
पशुपतिनयनहुताशनभसितमवधार्य यं वपुष्मन्तम् ।
अपरमिव कुसुमचापं रतिरतये निर्ममे धात्रा ॥ २०१ ॥
तिष्ठन्तु तावदन्याः कुलललना यस्य रूपमवलोक्य ।
सापि [6]महामुनिदयिता कृच्छ्रेण ररक्ष चारित्रम् ॥ २०२ ॥
कलधौत[7]फलकशोभां बिभ्राणं यस्य पृथुतरं वक्षः ।
दृष्ट्वा चिराय लक्ष्मीर्हरिहृदये दुःस्थितिं [8]मेने ॥ २०३ ॥
[9]कथमार्द्रता दिनकृतः शशिशकलैरथ कृतः कथं व्यथकः ।
इत्थं यमीक्षमाणो निर्णयमगमन्न कामिनीसार्थः ॥ २०४ ॥
यो जग्राह हिमांशोः प्रसन्नमूर्तित्वमचलतः स्थैर्यम् ।
जलधरत उन्नतत्वं गाम्भीर्यं यादसां पत्युः ॥ २०५ ॥
यो विनयस्य निवासो वैदग्ध्यस्याश्रयः स्थितेः स्थानम् ।
[10]प्रियंवाचामायतनं निकेतनं साधुचरितस्य ॥ २०६ ॥
यो मदनः प्रमदानां तुहिनकरः साधुकुमुदखण्डस्य ।
निकषोपलो गुणानां मार्गतरुः पथिकलोकस्य ॥ २०७ ॥

---

१. गण्डकाख्यप्राणिविशेषशृङ्गनिर्मितपात्रेण पितृतर्पणं कुर्वन्ति. २. 'विभागजनितमन्यूनाम्' इति पा०. ३. 'पठताम्' इति पा०. ४. एधसां युद्धानां चाभिलाषः. ५. बृहस्पतेः पुत्रः कचः. ६. अरुन्धत्यनसूया वा. ७. 'शकलशोभाम्' इति पा०. ८. 'मनुते' इति पा०. ९. 'कथमीदृग्यदि न कृतः' इति पा०. १० 'प्रियवचसाम्' इति पा०.

सज्जनगोष्ठीनिरतः काव्य[1]कथाकनकनिकषपाषाणः ।
प्रणयिजनकल्पवृक्षो लक्ष्मीलीलाविहारभूमिश्च ॥ २०८ ॥
जलधिरिव तुहिनभासः सहवृद्धिपरिक्षयः सुहृत्तस्य ।
सकलोपधाविशुद्धो बभूव गणपालितो नाम्ना ॥ २०९ ॥
तेन समं स कदाचित्तिष्ठन्रहसि प्रसङ्गतः पतिताम् ।
केनापि गीयमानामशृणोदार्यामिमां सहसा ॥ २१० ॥
'देशान्तरेषु वेषस्वभावभणितानि ये न बुध्यन्ते ।
समुपासते न च गुरून्विषाणवि[2]कलास्त उक्षाणः ॥ २११ ॥'
आकर्ण्याथ तमूचे वचनमिदं सुन्दरः सुहृन्मुख्यम् ।
शोभनमेतद्गीतं गुणपालित साधुनानेन ॥ २१२ ॥
साधूनामाचरितं खलचेष्टां विविधलोकहे[3]वाकान् ।
नर्म विदग्धैर्विहितं कुलटाजनवक्रकथितानि ॥ २१३ ॥
[4]गुरुगूढशास्त्रतत्त्वं विटवृत्तं धूर्तवञ्चनोपायान् ।
वारिधिपरिखां पृथ्वीं जानाति परिभ्रमन्पुरुषः ॥ २१४ ॥ (युगलकम्)
अत [5]उज्झित्य गृहस्थितिसुखलेशं विविधला[6]भपरिणामे ।
स्थापय गमनारम्भे वयस्य हृदयं मया सहितः ॥ २१५ ॥
इत्थं निगदितवन्तं सुहृदुत्तरलाभलालसात्मानम् ।
ऊचे सुन्दरसेनं लज्जित इव सहचरो वचनम् ॥ २१६ ॥
अभ्यर्थनानुबन्धो लज्जाकर एव मादृशां किं तु ।
आकर्णय [7]कथयामः पथिकानां यानि दुःखानि ॥ २१७ ॥
कर्पटकावृतमूर्तिर्दूराध्वपरिश्रमावसितशक्तिः ।
पांसूत्करधूसरितो दिनावसाने प्रतिश्रयाकाङ्क्षी ॥ २१८ ॥
मातर्भगिनि दयां कुरु मा मैवं निष्ठुरा भव तवापि ।
कार्यवशेन गृहेभ्यो निर्यान्ति भ्रातरश्च पुत्राश्च ॥ २१९ ॥

---

१. 'कथासार' इति पा०. २. 'रहिताः' इति पा०. ३. अभिलाषानित्यर्थः 'विन्यासान्' इति पा०. ४. 'गुरुगेहशास्त्रचर्यां वृटवचने' इति पा०. ५. 'उत्सृज्य' इति पा०. ६. 'लाभरत्नानि' इति पा०. ७. 'कथयामि च' इति पा०.

किं [1]वयमुत्पाद्य गृहं प्रातर्गन्तार [2]ईदृगेव सताम् ।
भवति निवासो यस्मिन्निज इव पथिकाः प्रयान्ति विश्रामम् ॥ २२० ॥
अद्य रजनीं नयामो [3]यथाकथंचित्तवाश्रमे मातः ।
अस्तं गतो विवस्वान्वद संप्रति कुत्र गच्छामः ॥ २२१ ॥
इति बहुविधदीनवचाः प्रतिगेहद्वारदेशमधितिष्ठन् ।
निर्भर्त्स्यते वराको गृहिणीभिरिदं वदन्तीभिः ॥ २२२ ॥
न स्थित इह गेहपतिः किं रटसि वृथा प्रयाहि देवकुलम् ।
कथितेऽपि नापगच्छति पश्य मनुष्यस्य निर्बन्धम् ॥ २२३ ॥
अथ यदि कथंचिदपरः पुनः पुनर्याचितो गृहस्वामी ।
निर्दिशति सावधीरणमत्र स्वपिहीति [4]जीर्णगृहकोणे ॥ २२४ ॥
तत्र कलहायमाना तिष्ठति गृहिणी विभावरीं [5]सकलाम् ।
अज्ञाताय किमर्थं वासो दत्तस्त्वयेति सह भर्त्रा ॥ २२५ ॥
ईदृगयं सरलात्मा किं कुर्मो भगिनि तावको भर्ता ।
स्थास्यसि गेहेऽवहिता भ्रमन्ति खलु वञ्चका एवम् ॥ २२६ ॥
इति [6]भाजनादियाच्ञां बुद्धौ विनिधाय [7]निकटवर्तिनो गेहात् ।
[8]नारीजनः समेत्य ब्रूते तामाप्तभावेन ॥ २२७ ॥ (युग्मम्)
गृहशतमधिकमटित्वा कलमकुलत्थाणुचणमसूरादि ।
एकीभूतं भुङ्क्ते क्षुधोपतप्तोऽध्वगो भैक्षम् ॥ २२८ ॥
परवशमशनं वसुधा शयनीयं सुरनिकेतनं सद्म ।
पथिकस्य विधिः कृतवानुपधानकमिष्टिकाखण्डम् ॥ २२९ ॥
इति निगदितवति तस्मिन्सुन्दरसेनस्य चोत्तरावसरे ।
इयमुपगीता गीतिः केनापि कथाप्रसङ्गेन ॥ २३० ॥
'निजवरभवनं सुरगृहमुर्वीतलमतिमनोहरं शयनम् ।
कदशनममृतमभीप्सितकार्यैकनिविष्टचेतसां पुंसाम् ॥ २३१ ॥'

---

१. 'स्वयम्' इति पा०. २. 'इह गृहे वसतिम्' इति पा०. ३. 'यथाकथंचिद्दूदास्तु हे मातः' इति पा०. ४. 'शीर्णे' इति पा०. ५. 'प्रहरम्' इति पा०. ६. 'भोजनादि' इति पा०. ७. 'निकटवर्तिगृहात्' इति पा०. ८, 'नारी समभ्युपेता' इति पा०.

तां[1] च श्रुत्वा सुहृदं पौरंदरिरिदमुवाच परितुष्टः ।
मम हृदयगतं प्रकटितमेतेन सहैव गच्छामः ॥ २३२ ॥
अथ सहचरद्वितीयः क्लेशसमुद्रावतरणकृतचित्तः ।
निरगात्सुन्दरसेनः कुसुमपुरादविदितः पित्रा ॥ २३३ ॥
पश्यन्विदग्धगोष्ठीरभ्यस्यन्नायुधानि विविधानि ।
शास्त्रार्थानधिगच्छन्विलोकयन्कौतुकान्य[2]नेकानि ॥ २३४ ॥
जानन्पत्रच्छेदनमौ[3]लेख्यं सिक्थपुस्तकर्माणि ।
नृत्यं गीतोपचितं तन्त्रीमुरजादिवाद्यभेदांश्च ॥ २३५ ॥
वुध्यन्वञ्चकभ[4]ङ्गीर्विटकुलटानर्मवक्रकथितानि ।
बभ्राम सुहृत्सहितः सुन्दरसेनो महीमखिलाम् ॥ २३६ ॥(कुलकम्)
अथ विदितसकलशास्त्रो विज्ञाताशेषजनसमाचारः ।
निजगृहगमनाकाङ्क्षी स शि[5]लोच्चयमर्बुदं प्राप ॥ २३७ ॥
तत्पृष्ठदेशदर्शनलो[6]लमतिं सुन्दरं परिज्ञाय ।
गुणपालितो बभाषे विलोक्यतामद्रिराज इति ॥ २३८ ॥
एष सुतः सानुमतः स्यँ[7]न्दच्छीताच्छसलिलसंपन्नः ।
लोकानुकम्पयेव प्रालेयमहीभृता म[8]रौ न्यस्तः ॥ २३९ ॥
शिशिरकरकान्तमौलिः कं[9]टकस्थितपवनभोजनः सं[10]गुहः ।
विद्याधरोपसेव्यो बिभर्ति लक्ष्मीमयं शंभोः ॥ २४० ॥
अत्र तरुशिखरसंगतसुमनस इति जातविस्मयो मन्ये ।
अभिलषति समुच्चेतुं तारा निशि मुग्धकामिनीलोकः ॥ २४१ ॥
आश्चर्यं यदुपान्ते तिष्ठन्त्येतस्य सप्त मुनयोऽपि ।
अथवा कस्याकर्षं न करोति समुन्नतिर्महताम् ॥ २४२ ॥

---

१. 'समुपश्रुत्य च' इति पा०. २. 'सकलानि' इति पा०. ३. आलेख्यम्' इति पा०. ४. 'वृत्तीः' इति पा०. ५. 'शैलोच्चयनाथमर्बुदम्' इति पा०. 'आबू' इति नाम्ना प्रसिद्धं पर्वतं प्रापेत्यर्थः. ६. 'लोलमलम्' इति पा०. ७. 'स्यन्दत्स्फीताच्छ—' इति पा०. ८. मरुदेशे 'मारवाड' इति प्रसिद्धे. पुस्तकान्तरे 'मरौ' इति नास्ति. ९. कटकेषु नितम्बेषु स्थिताः पवनभोजनास्तपश्चर्यार्थं वातमात्राहारा ऋषयो यस्य; (पक्षे) कङ्कणीकृतसर्पः. १०. गुहाभिर्गुहेन च सहितः.

[1]अवलम्ब्य निरवलम्बनमम्बरमार्गे पतंगतुरगाणाम् ।
अयमवनिधरो मन्ये विश्रान्त्यै वेधसा विहितः ॥ २४३ ॥
इममाश्रित्य हिमांशोरोषधयः [2]संनिकर्षमुपयाताः ।
प्रत्यासत्तिः प्रभुणा प्रायोऽनुग्राहकवशेन ॥ २४४ ॥
सेक्तुमिवाशाकरिणो विसृजत्ययमवनिधरणपरिखिन्नान् ।
निर्झरसलिलकणौघान्भवति हि सौहार्दमेक[3]कार्याणाम् ॥ २४५ ॥
[4]हारीताहितशोभो मुदितशुको व्यासयोगरमणीयः ।
विश्रान्तभरद्वाजः समतामयमेति मुनिनिवासस्य ॥ २४६ ॥
[5]अस्मिन्निःसङ्गा अपि परलोकप्राप्त्युपायकृतयत्नाः ।
गन्धवहभोजना अपि न हिंसकाः [6]फलभुजोऽपि न प्लवगाः ॥ २४७॥
[7]शुभकर्मैकरता अपि षट्कर्मण्यायता अपि स्ववशाः ।
अनभिमतरौद्रचरिताः श्रितप्रिया अपि वसन्ति शमनिरताः २४८ (कुलकम्)
मूर्तिरिव शिशिररश्मेर्हरिणवती [8]सप्तपत्त्रकृतशोभा ।
सरणिरिव [9]चण्डभासः पलाशिनी यातुधानजायेव ॥ २४९ ॥
सोत्कण्ठेव समदना वासकसज्जेव कृततिलकशोभा ।
बहु[10]हरिपीलुसनाथा नरनाथद्वारभूमिरिव ॥ २५० ॥
[11]अर्जुनबाणव्रातैः कुरुनाथवरूथिनीव संच्छन्ना ।
[12]ऋक्षसहस्रोपचिता लक्ष्मीरिव गगनदेशस्य ॥ २५१ ॥
ध्वजिनीव दानवानां मि[13]ष्टकसमधिष्ठिता(?) त्रियामेव ।
उद्घातरोहिणीका रम्येयमुपत्यका भाति ॥ २५२ ॥ (कुलकम्)

---

१. 'अवगम्य' इति पा०. २. 'संनिधानम्' इति पा०. ३. यतोऽयमप्यवनीधर इति भावः. ४. हारीतशुकभरद्वाजाः पक्षिविशेषाः, व्यासो विस्तारः; (पक्षे) हारीतशुकव्यासभरद्वाजाख्या मुनयः प्रसिद्धा एव. ५. 'निःशङ्काः' इति पा०. ६. 'फलभुजोऽपि शमनिरताः' इति पा०. ७. इयमार्या पुस्तकान्तरे नास्ति. ८. सूर्यस्य वाहनभूतैः सप्ताश्वैः कृतशोभा; (पक्षे) सप्तपत्त्रो वृक्षविशेषः. ९. सूर्यस्य. 'चण्डभानोः' इति पा०. १०. हरिरश्वः, पीलुर्हस्ती; (पक्षे) हरिर्वानरः, पीलुर्वृक्षविशेषः. ११. अर्जुनबाणौ वृक्षविशेषौ तत्समूहैः. १२. ऋक्षाणि नक्षत्राणि; (पक्षे) ऋक्षा भल्लूकाः. १३. 'सृष्टाङ्क–' इति, 'अक्षाङ्क–' इति च पा०.

इति दर्शयति वयस्ये सुन्दरसेने च पश्यति प्रीत्या ।
स्वप्रस्तावोपगता गीतिरियं केनचिद्गीता ॥ २९३ ॥
‘अतिशयितनाकपृष्ठं पृष्ठं ये नार्बुदस्य पश्यन्ति ।
बहुविषयपरिभ्रमणं मन्ये क्लेशाय केवलं तेषाम् ॥ २९४ ॥
आकर्ण्य च स बभाषे महात्मनानेन युक्तमुपगीतम् ।
शिखरिशिरः पश्यामो वयस्य रम्यं समारुह्य ॥ २९५ ॥
अथ गिरिवरमारूढो विलोकयन्विविधविबुधभवनानि ।
वापीरुद्यानभुवः सरांसि सरितश्चचार विस्मेरः[1] ॥ २९६ ॥
अचिराभामिव विघनां ज्योत्स्नामिव कुमुदबन्धुना विकलाम् ।
रतिमिव मन्मथरहितां श्रियमिव हरिवक्षसः पतिताम् ॥ २९७ ॥
[2]हस्त्वोलकं विधातुः(?) सारं सकलस्य जन्तुजातस्य ।
दृष्टान्तं रम्याणां [3]शस्त्रं संकल्पजन्मनो जैत्रम् ॥ २९८ ॥
वि[4]कसितकुसुमसमृद्धिं [5]शृङ्गाररसापगैककलहंसीम् ।
लीलापल्लववल्लीं व्रतिनामवधानवर्मणां भल्लीम् ॥ २९९ ॥
विचरन्नुपवनमण्डपपु[6]ष्पप्रकराभिरामभूपृष्ठे ।
रममाणां सह सख्या ललनामालोकयामास ॥ २६० ॥ (कुलकम्)
अवलोकयतस्तस्य स्मरसायकवेध्यतामुपगतस्य ।
इ[7]द[8]मभवन्मनसि चिरं विस्मय[9]भाराभिभूयमानस्य ॥ २६१ ॥
क्वेदं खलु विश्वसृजः कौशलमत्यद्भुतं [10]जातम् ।
येन विरुद्धानामपि घटितैकत्र स्थितिस्तथाहीयम् ॥ २६२ ॥
ललितवपुर्निर्दोषा[11] स्फुरदुज्ज्वलतारकाभिरामा च ।
निर्वाच्यवदनकमला जितवीणा [12]क्वणितवाणी च ॥ २६३ ॥

---

१. ‘जातविस्मेरः’ इति पा०. २. ‘हस्तोच्चयो’ इति, ‘अस्तौव्वये’ इति च पा०. ३. ‘अस्त्रम्’ इति पा०. ४. ‘विलसित–’ इति पा०. ५. ‘शृङ्गारसरोवरैक–’ इति पा०. ६. ‘पुण्य’ इति पा०. ७. ‘द्वयम्’ इति पा०. ८. ‘आसीत्’ इति पा०. ९. ‘भावाभिभूतस्य’ इति पा०. १०. ‘समुपजातम्’ इति पा०. ११. ‘अनिर्दोषा’ इति पा० १२. ‘कलितवाणी’ इति पा०.

प्रकटितविग्रहसंस्थितिरतिशोभाघटितसंधिबन्धा च ।
उन्नतपयोधराढ्या शरदिन्दुकरावदाता च ॥ २६४ ॥
अभिमतसुगतावस्थितिरभिनन्दितचरणयुगलरचना च ।
अतिविपुलजघनदेशा विध्वस्तशरीरविहितशोभा च ॥ २६५ ॥
आविर्भवदनुरागे तस्मिन्नथ वलितलोचना सहसा ।
सापि बभूव मृगाक्षी हस्तगता कुसुमचापस्य ॥ २६६ ॥
तरुमूलमाश्रिताया विस्मृतसकलान्यकर्मणः सपदि ।
तस्या गात्रलतायामङ्कुरितं सात्त्विकैर्भावैः ॥ २६७ ॥
सैवोपवनसमृद्धिस्तस्मिन्नेव क्षणे स्मरं समाश्रित्य ।
तां व्यथयितुमारेभे प्रभोर्हि कृत्यं करोति खलु सर्वः ॥ २६८ ॥
गात्रसिरासंधिभ्यः प्रस्वेदजलं विनिर्ययौ तस्याः ।
अन्तर्ज्वलितमनोभवहव्यभुजा दह्यमानेभ्यः ॥ २६९ ॥
कुसुमशरजालपतिता मुहुर्मुहुर्विदधती विवृत्तानि ।
अनिमेषं पश्यन्ती मत्स्यवधूमनुचकार सा तन्वी ॥ २७० ॥
स्तब्धतनुं सोत्कम्पां पुलकवतीं स्वेदिनीं सनिःश्वासाम् ।
विदधे तामसमशरः क्रीडति हि शठो विशिष्टमासाद्य ॥ २७१ ॥
उच्छ्वासैरुल्लसनं कुचयुगले सौष्ठवं विलसितानि ।
अभिलषितेन प्रेम्णा स्निग्धं वचनं मनोहारि ॥ २७२ ॥
अनुरक्तया वचनरुचिं वचसि च गमने च साध्वसस्खलनम् ।
तस्या मदनः कुर्वन्नुपनिन्ये चारुतामवधिम् ॥ २७३ ॥ (युग्मम्)
पार्श्वगतेऽपि प्रेयसि कामशरासारताड्यमानापि ।
न शशाक साभिधातुं चित्तगतं प्रणयभङ्गतो भीता ॥ २७४ ॥
अथ विदितचित्तवृत्तिः सक्तदृशं प्रियतमे समाकृष्य ।
मदनेन दह्यमानां विहसितविशदं जगाद तामाली ॥ २७५ ॥

---

१. 'कलावदाता' इति पा०. २. 'चरणरचनशोभा च' इति पा०. ३. 'आसितायाः' इति पा०. ४. 'प्राप्य' इति पा०. ५. प्रभवन्नन्यम्' इति पा०. ६. 'गात्रसरसैन्धनेभ्यः' इति पा०. ७. 'विलासानाम्' इति पा०. ८. 'स्निग्धत्वं चक्षुषोः' इति पा०. ९. 'वदनरुचिम्' इति पा०. १०. 'अधिकाम्' इति पा०. ११. 'भीत्या' इति पा०.

अयि हारलते संहर हरहुंकृतिदग्धदेहसंक्षोभम् ।
सद्भावजानुरक्तिर्नहि [1]रम्या पण्यनारीणाम् ॥ २७६ ॥
अवधीरय धनविकलं कुरु गौरवमकृशसंपदः पुंसः ।
अस्मादृशां हि मुग्धे धनसिद्ध्यै रूपनिर्माणम् ॥ २७७ ॥
अभिरामे[2]ऽभिनिवेशं विदधाना विविधलाभनिरपेक्षा ।
उपहस्यसे सुमध्ये विदग्धवाराङ्गनावारैः ॥ २७८ ॥
येषां श्लाघ्यं यौवनमभिमुखतामुपगतो विधिर्येषाम् ।
फलितं येषां सुकृतैर्जीवितसुखितार्थिता येषाम् ॥ २७९ ॥
तेऽवश्यं स्वयमेव त्वामनुबध्नन्ति मदनशरभिन्नाः ।
नहि [3]मधुलिहः कृशोदरि मृग्यन्ते चूतमञ्जर्या ॥२८०॥(युगलकम्)
इति गदितवतीमालीं कामशरासारभि[4]न्नसर्वाङ्गी ।
अव्यक्तस्खलिताक्षरमूचे कृच्छ्रेण हारलता ॥ २८१ ॥
सखि कुरु तावद्यत्नं [5]पटुतरमतिवेदनाप्रतीकारे ।
क्रोडीकृता विपत्त्या न भवन्त्युपदेशयोग्या हि ॥ २८२ ॥
अस्वायत्तः प्रेयान्मृदुपवनः सुरभिमास उद्यानम् ।
[6]इयती खलु सामग्री भवति क्षीणायुषामेव ॥ २८३ ॥
मत्वा मदनाशीविषविषवेगाकुलितविग्रहामालीम् ।
समुपेत्य शशिप्रभया पौरं[7]दरिरभिदधे कृतप्रणतिः ॥ २८४ ॥
यदि नाम रुणद्धि गिरं गणिकाभावोपजनितवैलक्ष्यम् ।
तदपि [8]कथनीयमेव स्निग्धापदि नहि निरूप्यते युक्तम् ॥ २८५ ॥
एतावति संसारे परिगणिता एव ते [9]सुजनाः ।
[10]आपन्नपरित्राणे व्याकुलमनसः स्फुरन्ति ये बुद्धौ ॥ २८६ ॥

---

१. 'पथ्यम्' इति पा०. २. 'विनिवेशम्' इति पा०. ३. 'मधुलेहाः सुन्दरि' इति पा०. ४. 'सिक्तसर्वाङ्गी' इति पा०. ५. 'बहुमतम्' इति पा०. ६. 'इयमियती' इति पा०. ७. सुन्दरसेन इत्यर्थः. ८. 'कथितव्यम्' इति पा०. ९. 'सुजन्मानः' इति पा०. १०. 'आपत्सु परित्राणव्याकुल–' इति, 'आपन्नपरित्राणे कोमल–' इति च पा०.

यस्मिन्नेव[1] मुहूर्ते[2] यदवधि दृष्टोऽसि मे सख्या ।
तत एवारभ्य गता विधेयतां दग्धमदनस्य ॥ २८७ ॥
रोमोद्गमसंनहनं भित्त्वान्तर्विग्रहं परापतिताः ।
तस्या[3] मानससंभवकोदण्डविनिर्गता इषवः ॥ २८८ ॥
किं[4] वा वदतु वराकी कुत्र समाश्वसितु यातु कं शरणम् ।
पीडयति भृशं यस्मान्नित्यं[5] शुचिदक्षिणो मृदुः पवनः ॥ २८९ ॥
वचसि गते गद्गदतामुज्झितमौनव्रताश्चिराय पिकाः ।
दृष्ट्वा व्यथयन्ति सखीं जातावसरा निरर्गलं विरुतैः ॥ २९० ॥
स्खलिताकुलिते गमने तन्वङ्ग्या अगणितश्रमा हंसाः ।
सुचिराल्लब्धावसराः कुर्वन्ति गतागतानि परितुष्टाः[6] ॥ २९१ ॥
उष्णोच्छ्वसितसमीपे विदह्यमानोऽपि मधुकरस्तस्याः ।
अलककुसुमं न मुञ्चति कृच्छ्रेष्वपि दुस्त्यजा विषयाः ॥ २९२ ॥
नो वारयति तथा[7] मां सांप्रतमिति कथयतीव मधुलेहः ।
निःसहवपुषः कर्णे श्रुतिपूरकपुष्पसंगतो गुञ्जन् ॥ २९३ ॥
प्रशिथिलभुजलतिकायास्तस्याः पतितस्य हेमकटकस्य ।
यत्प्रापणं पृथिव्यास्तस्मिन्खलु मुक्तहस्तता हेतुः ॥ २९४ ॥
रशनागुणेन विगलितमेकपदे तन्नितम्बतश्चित्रम्[8] ।
पतनाय नियतमथवा निषेवणं गुरुकलत्रस्य ॥ २९५ ॥
अङ्गीकृत्य मनोभवमुरसि तथा लालितोऽपि हतहारः ।
तापयति सखीं तत्क्षणमन्तर्भिन्नात्कुतः[9] कुशलम् ॥ २९६ ॥
वक्षसि तत्स्वेदजलं कज्जलमलिनाश्रुवारिणा मिश्रम् ।
कुचतटपतितं तस्याः प्रयागसंभेदसलिलमनुकुरुते[10] ॥ २९७ ॥
पिकरुतमलयसमीरणसुमनःस्मरभृङ्गदहनपरिकलिता ।
पञ्चतपश्चरति भवत्परिरम्भणसौख्यलम्पटा बाला ॥ २९८ ॥

---

१. 'अस्मिन्' इति पा०. २. 'मुहूर्ते चक्षुर्विषयोऽसि मम सख्या' इति पा०. ३. 'तस्याम्' इति पा०. ४. 'किं विदधातु' इति पा०. ५. 'यस्या नित्यशुचिर्दक्षिणः पवनः' इति पा०. ६. 'परपुष्टाः' इति पा०. ७. 'यथा' इति पा०. ८. 'यस्मिन्' इति पा०. ९. 'भिन्नार्जवः' इति पा०. १०. संभेदो नदीसंगम इत्यर्थः.

न परापतति वराकी दशमीं[1] यावन्मनोभवावस्थाम् ।
त्रायस्व सुभग तावच्छरणागतरक्षणव्रतं महताम् ॥ २९९ ॥
अथ तद्वचसि कृतादरमुद्भूतमनोभवं[2] समवधार्य ।
अवगीतिभीतचेता ऊचे गुणपालितः सुहृदम् ॥ ३०० ॥
यद्यपि मारप्रसरो दुर्वारः प्राणिनां नवे वयसि ।
चिन्त्यं तदपि विवेकिभिरवसानं वारयोषितां[3] प्रेम्णः ॥ ३०१ ॥
वारस्त्रीणां विभ्रमरागप्रेमाभिलाषमदनरुजः ।
सहवृद्धिक्षयभाजः प्रख्याताः संपदः सुहृदः ॥ ३०२ ॥
ताभिरवदातजन्मा करोति[4] सङ्गं कथं यासाम् ।
क्षणदृष्टोऽपि प्रणयी रूढप्रणयोऽपि जन्मनोऽपूर्वः ॥ ३०३ ॥
प्रद्युम्नः प्रद्युम्नो विरूपकः खलु विरूपकः सततम् ।
सुस्निग्धः सुस्निग्धो रूक्षो रूक्षस्तु गणिकानाम् ॥ ३०४ ॥
यासां जघनावरणं परकौतुकवृद्धये न तु त्रपया ।
उज्ज्वलवेषा[5] रचना कामिजनाकृष्टये न तु स्थितये ॥ ३०५ ॥
मांसरसाभ्यवहारः पुरुषाहतिपीडया न तु स्पृहया ।
आलेख्यादौ व्यसनं वैदग्ध्यख्यातये न तु विनोदाय[6] ॥ ३०६ ॥
रागोऽधरे न चेतसि सरलत्वं भुजलतासु न प्रकृतौ ।
कुचभारेषु समुन्नतिराचरणे नाभिनन्दिते सद्भिः ॥ ३०७ ॥
जघनस्थलेषु गौरवमाकृष्टधनेषु नो कुलीनेषु ।
अलसत्वं गमनविधौ नो मानववञ्चनाभियोगेषु ॥ ३०८ ॥
वर्णविशेषापेक्षा प्रसाधने नो रतिप्रबन्धेषु[7] ।
ओष्ठे मदनासङ्गो[8] नो पुरुषविशेषसंभोगे ॥ ३०९ ॥
या बालेऽपि सरागा वृद्धेष्वपि विहितमन्मथावेगा ।
क्लीबेष्वपि कान्तदृशः साकाङ्क्षा दीर्घरोगेऽपि[9] ॥ ३१० ॥

---

१. मरणरूपामित्यर्थः. २. 'उद्धतचेतोभवम्' इति पा०. ३. 'वेशयोषितः' इति पा०. ४. 'कुर्वीत समागमम्' इति पा०. ५. 'वेषावरणम्' इति पा०. ६. 'विनोदः' इति पा०. ७. 'रतिप्रसङ्गेषु' इति पा०. ८. मदनः कामः; (पक्षे) मधूच्छिष्टमित्यर्थः. ९. 'रोगेषु' इति पा०

स्वेदाम्बुकणोपचिता न[1] चार्द्रता निजनिवासमनसश्च ।
आविष्कृतवेपथवो वज्रोपलसारकठिनाश्च ॥ ३११ ॥
जघनचपला[2] अनार्याः परभृतयः कृतकनेत्ररागाश्च ।
सर्वाङ्गार्पणदक्षा असमर्पितहृदयदेशाश्च ॥ ३१२ ॥
न कुलसमुत्पन्ना अपि भुजंगदर्शनसुवेदनाभिज्ञाः[3] ।
कंदर्पदीपिका अपि रहिताः स्नेहप्रसङ्गेन ॥ ३१३ ॥
उज्झितवृषयोगा अपि रतिसमये नरविशेषनिरपेक्षाः ।
कृष्णैकाभिरता अपि हिरण्यकशिपुप्रियाः[4] सततम् ॥ ३१४ ॥
मेरुमहीधरभुव इव किंपुरुषसहस्रसेवितनितम्बाः ।
नीतय इव भूमिभृतां सुपरिहृतानर्थसंयोगाः ॥ ३१५ ॥
बहुमित्रकरविदारणलब्धाभ्युदयाः सरोरुहिण्य इव ।
डाकिन्य इव च रक्तव्याकर्षणकौशलोपेताः ॥ ३१६ ॥

प्रतिपुरुषं संनिहिताः कृत्यपरा विविधकरणकोपचिताः[5] ।
बहुलार्थग्राहिण्यः प्रकृतय इव दुर्ग्रहा गणिकाः ॥३१७॥ (अर्थचतुष्टयमत्र[6])

सादरमाकृष्य[7] चिरं कुसुमस्तबकं च नरविशेषं च ।
रिक्तीकर्तुं निपुणाः क्षुद्राः[8] क्षुद्राश्च[9] चुम्बन्ति ॥ ३१८ ॥
परमार्थकठोरा अपि विषयगतं लोहकं[10] मनुष्यं च ।
चुम्बकपाषाणशिला रूपाजीवाश्च कर्षन्ति ॥ ३१९ ॥
पुरुषाक्रान्ताः सततं कृत्रिमशृङ्गाररागरमणीयाः ।
आहन्यमानजघनाः करेणवो वारयोषाश्च ॥ ३२० ॥
उचितगुणोत्क्षिप्ता अपि पुरतोऽपि निवेशिते सुवर्णलवे[11] ।
झगिति पतन्ति मुखेन प्रकटप्रमदा यथा[12] च तुलाः ॥ ३२१ ॥

---

१. 'अनार्द्रता' इति पा०. २. जघनचपला आर्या, छन्दोभेद इत्यर्थः. ३. 'भुजंगदशनकृतवेदनाभिज्ञाः' इति पा०. ४. हिरण्यं सुवर्णम्, कशिपुस्त्वन्नमाच्छादनमित्यर्थः. ५. 'विविधविकरणोपेताः' इति पा०. ६. 'अर्थचतुष्टयवाचिनीयमार्या' इति पा०. ७. 'आश्लिष्य' इति पा०. ८. मधुमक्षिका इत्यर्थः. ९. वेश्या इत्यर्थः. १०. लोहमिव पुरुषम्. ११. 'चये' इति पा०. १२. 'कलाधिकाश्च तुलाः' इति पा०.

बहिरुपपादितशोभा अन्तस्तुच्छाः स्वभावतः कठिनाः ।
वेश्याः समुद्गिका इव [1]क्वणन्ति यन्त्रप्रयोगेण ॥ ३२२ ॥
बध्नन्ति येऽनुरागं दैवहतास्तासु वारवनितासु ।
ते निःसरन्ति नियतं पाणिद्वयमग्रतः कृत्वा ॥ ३२३ ॥
[2]इदमुपदिशति वयस्ये सुन्दरसेने च मन्मथव्यथिते ।
प्रस्तावा[3]दुपगातुं गीतित्रयमभ्यधायि केनापि ॥ ३२४ ॥
'तरुणीं रमणीयाकृतिमुपनीतां स्मृतिभुवा वशीकृत्य ।
परिहरति यो जडात्मा प्रथमोऽसौ [4]नालिको विना भ्रान्तिम् ॥ ३२५ ॥
इदमेव हि जन्मफलं जीवितफलमेतदेव यत्पुंसाम् ।
[5]ऽडहनितम्बवतीजनसंभोगसुखेन याति तारुण्यम् ॥ ३२६ ॥
सुमनो[6]मार्गणदहनज्वालावलिदह्यमानसर्वाङ्ग्यः ।
प्रबलप्रेमप्रवणाः प्रमदाः स्पृहयन्ति नाल्पपुण्येभ्यः ॥ ३२७ ॥'
[7]एवमुपश्रुत्य वचः समुवाच पुरंदरात्मजः सुहृदम् ।
मम हृदयादिव कृष्ट्वा गीतमिदं साधुनानेन ॥ ३२८ ॥
[9]तदतनुसायकविकलां हारलतां हरिणशावतरलाक्षीम् ।
आश्वासयितुं यामो गुणपालित किं विकल्पितैर्बहुभिः ॥ ३२९ ॥
अथ तत्र कापि गणिका[10]गणयन्ती परिचितं हृतद्रविणम् ।
प्रविशन्तमेव मन्दिरमीर्ष्याव्याजेन निरुरोध ॥ ३३० ॥
काचिद्बन्धकदत्तं [11]पुञ्जीकृतजीर्णवसनमवलोक्य ।
वेश्या विषीदति स्म क्षपाक्षये व्यर्थकर्तव्या ॥ ३३१ ॥
दैवस्मृत्या पतितं दृष्टिपथं भग्नमूल्यविटमे[12]कं ।
ज्वलिता रुषा भुजिष्या जग्राह जवेन धावित्वा ॥ ३३२ ॥

---

१. 'भणन्ति' इति पा०. २. 'इत्युपदिशति' इति पा०. ३. 'उपजातम्' इति पा०. ४. मूर्ख इत्यर्थः. ५. मनोहरयुवतिरमणविनोदेनेत्यर्थः. ६. 'मार्गणमार्गण–' इति पा०. ७. 'अथ समुपश्रुत्य वचः समुवाच पुरंदरानुजः' इति पा०. ८. 'गीतिरियं केनचिद्गीता' इति पा०. ९. 'तदसमबाणसमर्पितहारलताम्' इति पा०. १०. 'गणयन्ती कापि' इति पा०. ११. 'लुण्डीकृत्य' इति पा०. १२. 'विटमेकम्' इति पा०.

अन्तःस्थितकामिगृहद्वारगतं लुप्तवित्तनरमन्या।
समुवाच कुट्टनी व्रज कल्लोलाकल्पदेहेति ॥ ३३३ ॥
प्रकटितदशननखक्षतिरभिदधती राजपुत्ररतियुद्धम्।
अपरा पुरः सखीनां वारवधूराततान सौभाग्यम् ॥ ३३४ ॥
अन्या कामिस्पर्धावर्धितभाटी संमुत्सुका चण्डी।
सौभाग्यगर्वदर्पं समुवाह विलासिनीमध्ये ॥ ३३५ ॥
एकगणिकानुबन्धे क्रोधोद्यतशस्त्रकामिनोः कापि।
संभ्रमतो धावित्वा निवारयामास कुट्टनी कलहम् ॥ ३३६ ॥
धनमाहृत्य बहुभ्यो भुज्यत एकेन केनचित्सार्धम्।
इति धनवन्तं कामिनमावर्जयति स्म वारवधूः ॥ ३३७ ॥
गायन्मात्रागाथा द्विपदिकया सौष्ठवेन विट एकः।
बभ्राम पुरो दास्या विदधद्विकृतीरनेकविधाः ॥ ३३८ ॥
कश्चित्पण्यस्त्रीणां विभवोपचितान्यपुरुषयोजनया।
विदधाति स्माराधनमधनत्वमुपागतः कामी ॥ ३३९ ॥
त्वयि सक्तेन मया गृहमुज्झितमधुना परेव जातासि।
इति ढौकमलभमानः कश्चिद्गणिकामुपालेभे ॥ ३४० ॥
उषितामपरेण समं वृद्धविटानां पुरः पराजित्य।
त्याजयति स्म भुजंगं कश्चिद्गणिकां द्विगुणभाटीम् ॥ ३४१ ॥
दृष्टा त्वया विशेषकवलयकलापी शशिप्रभाभुजयोः।
बाढं भण भण कीदृक्क्वानु तरः सोमया दत्तः ॥ ३४२ ॥
अद्य चतुर्थो दिवसश्चित्राम्बरयुगलकस्य दत्तस्य।
तदपि परुषाभिधाना वद मदनक किं करोम्यत्र ॥ ३४३ ॥
स्नेहपरा मयि केली कलहंसक किंतु राक्षसी तस्याः।
माता नात्मीकर्तुं वर्षशतेनापि शक्यते पापा ॥ ३४४ ॥

---

१. 'समुच्छ्रिता' इति पा०. २. 'योजयति' इति पा०. ३. 'गणिकाद्विगुणभाटीं' इति पा०. ४. 'क्वातुतरः सोमया दत्ता' इति पा०. ५. 'खिन्नाम्बर' इति पा० ६. 'किंनरी तस्याः' इति पा०.

सुमनः कुङ्कुमवासः सज्जीकुरु किमिति तिष्ठसि विचिन्तः[1] ।
अद्य तव दयितिकायाः किंजल्कक नर्तनावसरः ॥ ३४५ ॥
यदि नाम पञ्चदिवसांस्त्वयि कुरुते प्रेम धनलवं दृष्ट्वा ।
तदपि न रागवती[2] सा कंदर्पक किं वृथा गर्वः ॥ ३४६ ॥
जीवन्नेव विलासक परिहर दूरेण मूढ हरिसेनाम् ।
बद्धावेशस्तस्यां व्यापृतपुत्रो[3] महाविषमः ॥ ३४७ ॥
केसरया[4] क्षणदत्तं कृत्वांशुकमुपरि कामिजालस्य ।
स्तब्धग्रीवं भ्रमतश्चन्द्रोदय पश्य माहात्म्यम् ॥ ३४८ ॥
कौमारकं विहन्तुं[5] रतिसमये मदनसेनायाः ।
इच्छामि किं तु तस्या मात्रातीव प्रसारितं वदनम् ॥ ३४९ ॥
विभ्रम कियतस्तपसः फलमेतद्यदुपभुज्यते मदिरा ।
स्वकरेण पीतशेषा मदघूर्णित मदनसेनया दत्ता ॥ ३५० ॥
कुवलयमालानिलयो लीलोदय किमिति संप्रति त्यक्तः ।
किं विदधामस्तस्मिन्भ्रातर्दास्या विना मूल्यम् ॥ ३५१ ॥
मुषिताशेषविभूतेरिन्दीवरकस्य यामिनी याति ।
संवाहयतः संप्रति मञ्जीरक तिलकमञ्जरीचरणौ ॥ ३५२ ॥
अद्यापि बालभावं निखिलं न जहाति बालिका तदपि ।
प्रौढिम्ना मकरन्दक सकलां ललनामधः कुरुते ॥ ३५३ ॥
कुब्जे गत्वा वक्ष्यसि तं निर्दयचित्तनर्तनाचार्यम् ।
हारा सुकुमारतनुः किमियं[6] संमर्दकारिता भवताम् ॥ ३५४ ॥
निःसारो[7]ऽभिनिवेशः शुकशावकपाठने सुरतदेवि ।
तिष्ठति बहिरुपविष्टः प्रतीक्षमाणस्तव प्रेयान् ॥ ३५५ ॥
वीणावादनखिन्ना पतितास्ते वासभवनपर्यङ्के ।
उत्थापयतां त्वरितं स्मरलीलां मत्त[8] आयातः ॥ ३५६ ॥

---

१. 'विचित्तः' इति पा०. २. 'रङ्गवती' इति पा०. ३. 'व्यावृतपुत्रो' इति पा०. ४. 'केशवया' इति पा०. ५. 'विद्दातुम्' इति पा०. ६. 'किमिति श्रममद्य कारिता' इति पा०. ७ 'निःसरको' इति पा०. ८. 'भट्टपुत्र आयातः' इति पा०.

किमिदं यथास्थितत्वं तव माधवि यन्मुहुर्वदन्त्या मे ।
परिधत्से नाभरणं श्रीविग्रहराजसूनुना दत्तम् ॥ ३५७ ॥
ईदृक्शून्यमनस्त्वं किं कुर्मो मातरिन्दुलेखायाः ।
पानक्रीडासक्त्या पतितापि न चेतिता कनकनाडी ॥ ३५८ ॥
नकुलः पयो न पायित इति रोषवशादियं हि दुःशीला ।
नाश्नाति [1]कामसेना पुनः पुनर्याच्यमानापि ॥ ३५९ ॥
श्रीवलसुतपरिपालित ऊर्णायुः किमनया विजेतव्यः ।
मुकुला मुक्तसुखस्थितिरहर्निशं मे[2]षपोषणे लग्ना ॥ ३६० ॥
आताम्रतां [3]समुपगतमुच्छूनं करतलं च तव ललिते ।
मा पुनरतिचिरमेवं प्रविधास्यसि कन्दुकक्रीडाम् ॥ ३६१ ॥
अभिराम कनकभाटी प्रथममियं गृह्यते समुत्पन्ने ।
स्नेहे तु कुसुमदेव्यास्त्वं प्रभवसि जीवितस्यापि ॥ ३६२ ॥
ग्रहणकमर्पय तावद्यदि कौतुकमुपरि चन्द्रलेखायाः ।
निर्वर्तितकर्तव्यो दास्यसि किंचिद्यथाभिमतम् ॥ ३६३ ॥
न परमदाता मातः सूनुरसौ वासुदेवभट्टस्य ।
निर्लज्जः शठवृत्तिः पुनः पुनर्वार्यमाणोऽपि ॥ ३६४ ॥
क्षपयति वसनानि सदा हठेन सकलानि सुरतसेनायाः ।
न ददात्येकामूर्णा[4]मुरणः परमत्ति कर्पासम् ॥ ३६५ ॥ (युग्मम्)
भगिनि न मुञ्चति वेश्म क्षणमपि पटराजपुत्रोऽसौ ।
[5]भग्नान्यतरासङ्गो नग्नेनाधिष्ठितं तीर्थम् ॥ ३६६ ॥
इत्थंप्राया वाचः शृण्वन्विटकुट्टनीसमुद्गीर्णाः ।
तं वेशसंनिवेशं पश्यन्प्रविवेश दारिकावेश्म ॥ ३६७ ॥(कुलकम्)
आकृष्टमिवोत्कतया स्नपितमिव स्निग्धचक्षुषः प्रसरैः ।
तमुपागतम[6]त्यन्तं हारलता पूजयामास ॥ ३६८ ॥

---

१. 'रामसेना' इति पा०. २. 'नैष' इति पा०. ३. 'उपगतं प्रोच्छूनम्' इति पा०. ४. मेष इत्यर्थः. लौकिकोक्तिरियम्. ५. 'भग्नान्यनरावसरः' इति पा०. ६. 'अत्यर्थम्' इति पा०.

सुविहितसमुचितसंस्थितिरवनतशिरसा प्रणम्य तत्सख्या ।
इदमभिदधेऽतिनम्रं सुन्दरसेन शुभावसरे ॥ ३६९ ॥
प्रियदर्शन किं बहुभिः स्मरपीडनवचनचाटुसंदर्भैः ।
इयमास्ते हारलता जीवनमस्यास्त्वदायत्तम् ॥ ३७० ॥
निर्यन्त्रकेलिविशदं सहजप्रेमानुबन्धरमणीयम् ।
[1]कार्यान्तरान्तरायैरपरिहृतं यातु यौवनं युवयोः ॥ ३७१ ॥
निर्दयमविरतवाञ्छं स्वस्तत्रपमव्यवस्थित[2]ोवरणम् ।
उपचीयमानरागं सततं भूयाद्भवत्सुरतम् ॥ ३७२ ॥
इति दत्त्वाशिषमन्तर्निर्याते परिजने तदङ्गेषु ।
विस्रम्भविविक्तरसो ववृधे कुसुमायुधः सुतराम् ॥३७३॥ (विशेषकम्)
यदमन्द[3]मन्मथोचितमनुरूपं यत्तथानुरागस्य ।
यद्यौवनाभिरामं यच्च फलं जीवितव्यस्य ॥ ३७४ ॥
अविनय एव विभूषणमश्लीलाचरणमेव बहुमानः ।
निःशङ्कतैव सौष्ठवमनवस्थितिरेव गौरवाधानम् ॥ ३७५ ॥
केशग्रहणमनुग्रह उपकारस्ताडनं मुदे दंशः ।
नखविलिखनमभ्युदयो दृढदेहनिपीडनं समुत्कर्षः ॥ ३७६ ॥
विगलल्लोलं चुम्बनमवयवनिष्पेषनि[4]ःस्पृहो मर्दः ।
अन्तः[5]प्रवेशमिच्छन्निर्भरपरिरम्भणं यस्मिन् ॥ ३७७ ॥
यदनङ्गैरिव [6]विहितं रागैरिव दीप्तिमत्त्वमुपनीतम् ।
प्रेमभिरिव निस्खलितं शृङ्गारैरिव विकासमानीतम् ॥ ३७८ ॥
अप्रागल्भ्यं [7]व्यसनं धैर्यमकार्यं विवेक उपघातः ।
ह्रेपणमगुणो यस्मिंस्तत्सुरतं प्रस्तुतं ताभ्याम् ॥३७९॥ (कुलकम्)
प्रारम्भ एव तावत्प्रज्वलितो धगिति मनसिजो यस्मिन् ।
तस्य विशेषावस्था वक्तुमशक्याः प्रवृद्धस्य ॥ ३८० ॥

---

१. 'आर्यान्तरान्तरायैः' इति पा०. २. 'आचरणम्' इति पा०. ३. 'मन्मथोदित' इति पा०. ४. 'सस्पृहः' इति पा०. ५. 'प्रवेशनेत्थम्' इति पा०. ६. 'पिहितम्' इति पा०. ७. 'वसनम्' इति पा०.

सहजरसेन जडीकृतमिति यूनोः कामशास्त्रनिर्णीतौ ।
नानाकरणग्रामे लालित्यमियाय[1] पाण्डित्यम् ॥ ३८१ ॥
अभिधेयमनाख्येयं प्रविचार्यं छादनीयमविषह्यम् ।
न बभूव तयोस्तस्मिन्नारब्धे सुरतपरिमर्दे ॥ ३८२ ॥
अत्यभ्यस्ता यान्या[2] सुरतविधौ विविधचाटुपरिपाटी ।
तामालूनविशीर्णां चकार सहजः स्मरावेगः ॥ ३८३ ॥
सद्भावरागदीपितमदनाचार्योपदिष्टचेष्टानाम् ।
कः परिगणनं कर्तुं रतिचक्राविष्टरमणयोः शक्तः ॥ ३८४ ॥
बाला मृदुगात्रलता दृढपुरुषाक्रान्तविग्रहा न परम् ।
न व्यथिता मुदमाप प्रभवति खलु चित्तजन्मनः शक्तिः ॥३८५॥
किं रमणीं रमणोऽविशदुत रमणं[3] सा न जानीमः ।
स्वावयवावगमस्त्वप्रकाश[4]मगमत्तयोस्तदा निपुणम् ॥ ३८६ ॥
तस्या निमीलितदृशो निस्पन्दतनोर्बभूव सुरतान्ते ।
लिङ्गमनङ्गच्छाया[5]जीवितसत्तानुमानेन[6] ॥ ३८७ ॥
श्रमजलबिन्दूपचिता वृत्तस्मरणेन जातवैलक्ष्या ।
सा शुशुभे विपरीता[7] पर्याकुलकेशभूषणा नितराम् ॥ ३८८ ॥
निर्व्याजार्पितवपुषोर्निर्वृतिमयमेव गणयतोर्विश्वम् ।
क्षणदा विरराम तयोरक्षीणाकाङ्क्षयोरेवम् ॥ ३८९ ॥
मोहनविमर्दखिन्ना[8] विजृम्भमाणा स्खलद्गतिर्मन्दम् ।
निद्राकषायिताक्षी हारलता वासवेश्मनो निरगात् ॥ ३९० ॥
'परिचितपार्श्वगताहं तेन समं पानभोजनं कृत्वा ।
नीता निशा कथाभिर्मोहनकार्यं च यत्किंचित् ॥ ३९१ ॥
अविदग्धः श्रमकठिनो दुर्लभयोषिद्युवा जडो विप्रः ।
अपमृत्युरुपक्रान्तः कामिव्याजेन मे रात्रौ ॥ ३९२ ॥

---

१. 'अवाप' इति पा०. २. 'प्रत्यभ्यस्तायान्यम्' इति पा०. ३. 'रमणमिति न जानीमः' इति पा०. ४. 'तु प्रकाशम्' इति पा०. ५. 'अनङ्गावस्था' इति पा०. ६. 'मानेऽस्य' इति पा०. ७. 'रतविरतौ' इति पा०. ८. 'दौर्बलविमर्दे' इति पा०.

नेच्छाविरतिः क्षणमपि न च शक्तिर्वस्तुशून्यरतियत्नैः ।
केवलमलमद्याहं कदर्थिता वृद्धपुरुषेण ॥ ३९३ ॥

मद्यवशादभियोक्तरि मृतकल्पे तल्पभागमग्नायाः ।
अविरोधितनिद्रायाः सुखेन मे यामिनी याता ॥ ३९४ ॥

सुकुमारसंप्रयोगः पेशलवचनः सवक्रपरिहासः ।
कुशलवशेन समेतो मम सखि रमणो मनोहराकारः ॥ ३९५ ॥

पल्यङ्काङ्कनिलीनः[1] पराङ्मुखो मुक्तमन्दनिःश्वासः ।
मद्याचनया[2] नितरां निःस्वेदः स्वेदसलिलसंसिक्तः ॥ ३९६ ॥

पर्यस्तमितानङ्गोऽप्यपगतनिद्रः क्षपाक्षयाकाङ्क्षी ।
ग्रामोषितः प्रहीणो निष्प्रतिपत्तिः स्थितोऽद्य सखि मनुजः॥३९७॥(कुलकम्)

शृणु सखि कौतुकमेकं ग्रामीणककामिना यदद्य कृतम् ।
सुरतरसमीलिताक्षी मृतेति भीतेन मुक्तास्मि ॥ ३९८ ॥

अविदितदेशप्रकृतेः शठात्मकाद्दुर्विदग्धतोऽस्माभिः ।
अनुभूतो राजसुतादधि[3] भाण्डविडम्बनावेशः ॥ ३९९ ॥

प्रियसखि लोकसमक्षं नगरप्रभुणा हठेन नीतास्मि ।
एवं तु नो[4] कदाचिद्द्विगुणार्थप्रार्थने कृतोऽन्यायः ॥ ४०० ॥

आकर्षन्ती जघनं व्रजसि[5] यथा विलिखिता नखैस्तिलशः ।
मन्ये तथोपभुक्ता केरलि केनापि दाक्षिणात्येन ॥ ४०१ ॥

अधरे[6] बिन्दुः कण्ठे मणिमाला स्तनयुगे शशप्लुतकम् ।
तव सूचयन्ति केरलि कुसुमायुधशास्त्रपण्डितं रमणम् ॥ ४०२ ॥'

इति शृण्वन्नुषसि गिरो निर्वृत्तनिशाभियोग[7]गणिकानाम् ।
सोऽपि यथाक्रियमाण प्रविधातुं निर्जगाम कर्तव्यम् ॥ ४०३ ॥

---

१. 'पर्यङ्क' इति पा०. २. 'मद्यादनया' इति पा०. ३. 'अवभाण्डविडम्बनाविलेशः' इति पा०. ४. 'एवं तु ननु' इति पा०. ५. 'व्रजति पथा' इति पा०. ६. इयमार्या कविकण्ठाभरणे क्षेमेन्द्रेणोदाहृता. विन्दुमणिमालादीनां लक्षणानि कामसूत्रे प्रसिद्धान्येव. ७. 'नियोग' इति पा०.

स्वरुचितरागोपचितैः स्वीकृतमनसस्तया समं तस्य ।
यौवनसुखमनुभवतो जगाम संवत्सरः सार्धः ॥ ४०४ ॥
विस्रम्भकथाः कुर्वन्विचरन्नुद्यानवेदिकापृष्ठे ।
सहचरकरसक्तकरः सुन्दरसेनः किल कदाचित् ॥ ४०५ ॥
स्थूलघनतन्तुसंततितोलि[1]ततूलाम्बरावरणम् ।
यष्टिप्रान्तनियन्त्रितदलवृन्तककुतुपतुम्बिककटित्रम् ॥ ४०६ ॥
त्रुटितचरणत्रसंगतसं[2]स्फुटिताभ्यक्तपादमलिनतनुम् ।
त्वरितगतिलेखवाहकमारादायान्तमद्राक्षीत् ॥ ४०७ ॥ (कुलकम्)
प्रत्यासन्नीभूतं क्रमेण पौरंदरिः परिज्ञाय ।
साकूतमना ऊचे वयस्य हनुमानयं प्राप्तः ॥ ४०८ ॥
अवनितललीनशिरसा कृतनतिना तेन विनिहितं भूमौ ।
उत्क्षिप्य झटिति लेखं सुन्दरसेनस्तु वाचयामास ॥ ४०९ ॥
'स्वस्तिश्रीकुसुमपुरात्पुरंदरः सुन्दरं समभिधत्ते ।
अन्तर्जृम्भितशोकग्रस्ताविस्पष्टवर्णपदम् ॥ ४१० ॥
कुलमकलङ्कं न गणितमवधीरितमग्रजन्मनामुचितम् ।
[3]नावेक्षितमवगीतं शठसेवितवर्त्मनि त्वया पतता ॥ ४११ ॥
[4]वंशेऽकुटिलगतीनां द्विजिह्वतादोषरहितचरितानाम् ।
अपरविनाशरतानामुत्पन्नः कथमसि भुजंगः ॥ ४१२ ॥
क्व पुरोडाशपवित्रितवेदपदोद्गारगर्भवदनं ते ।
क्व च मदि सववासितवारवधूमुखरसास्वादः ॥ ४१३ ॥
क्व कुशविपाटनजन्मा सहसोदितवेदनाचमत्कारः ।
क्व च दासीरतसंगरनिर्दयनखरक्षतिः प्रीत्यै ॥ ४१४ ॥
क्व त्रेतानलधूमक्षोभितनयनाम्बुधौतवदनत्वम् ।
क्व च गणिकानिर्भर्त्सनशोकभरायातबाष्पसलिलौघः ॥ ४१५ ॥

---

१. 'तोनितताम्बरा' इति पा०. २. 'स्फुटिताभ्यक्तान्त' इति पा०. ३. 'नापेक्षित' इति पा०. ४. 'वंशेऽमलवर्णानाम्' इति पा०.

क्व वषट्कारध्वानः सत्कर्मविभूषणश्रवणपूरः ।
क्व च साधारणवनितारति[1]मणिताकर्णनौत्सुक्यम् ॥ ४१६ ॥
क्वाचार्यप्रतनुलताताडनसंक्षोभसंभवः कम्पः ।
क्व च कुपितवारललनानिष्ठुरपादप्रहारविषहत्वम् ॥ ४१७ ॥
क्व हरिणचर्मावरणं स्मृतिशास्त्रनिवेदितं व्रतं चरतः ।
क्व च पण्यस्त्रीगात्रस्पृष्टाम्बरधारणेषु बहुमानः ॥ ४१८ ॥
समिधामेव च्छेदनमभ्यस्तं शैशवात्समारभ्य ।
शठवनिताधरखण्डन उत्पन्नं कौशलं कुतो भवतः ॥ ४१९ ॥
शुश्रूषणमेव गुरोः परिशीलितमचलचेतसा सततम् ।
कुटिलमतयो भुजिष्याः कथं त्वयाराधिता निपुणाः[2] ॥ ४२० ॥
आम्नायपाठ एव स्फुटतरपदसौष्ठवं तव ख्यातम् ।
प्रकुपितवेश्यानुनये क्व शिक्षितं वचनचातुर्यम् ॥ ४२१ ॥
अथवा किं क्रियतेऽस्मिन्नवदातकुलेऽपि लब्धजन्मानः ।
सदसंस्तुता भवन्ति प्रागुपचितकर्मदोषेण ॥ ४२२ ॥
त्वयि विनिवेश्य कुटुम्बं परलोकहितार्जनैकविहि[3]तास्थः ।
स्थास्यामीति समीहितमनुदिवसं तद्विसंवदितम् ॥ ४२३ ॥
इत्यवगतलेखार्थे सुन्दरसेने विधेयसंमूढे ।
आर्यामगायदन्यः स्वावसरे गीतिपरिकलिताम् ॥ ४२४ ॥
'विषयतिमिरावृताक्ष्णामवटे पततामदृष्टमार्गाणाम् ।
पुंसां गुरुजनवचनद्रव्यशलाकाञ्जनं शरणम् ॥ ४२५ ॥
उद्वेजयति तदात्वे सुखसंवृ[4]द्धिं करोति परिणामे ।
कटुकौषधप्रयोगो गुरुनिगदितकार्यनिष्ठुरं वचनम् ॥ ४२६ ॥'
लब्ध्वा[5] वचसोऽवसरं मित्रमवादीत्पुरंदरापत्यम् ।
पुनरपि नहि खिद्यन्ते प्रियजनहितभाषणे सन्तः ॥ ४२७ ॥

---

१. 'रणित' इति पा०. २. 'निपुण' इति पा०. ३. 'विहिताशः' इति पा०. ४. 'संवृत्तिम्' इति पा०. ५. 'लब्ध्वापि वचोऽवसरम्' इति पा०.

अगणितसहचरवचसो दुर्व्यसनमहाब्धिमग्नवपुषस्ते ।
मन्युव्यथितस्य पितुर्यदि परमवलम्बनं वचनम् ॥ ४२८ ॥

निजवंशदीपभूतः कृतचरितालंकृतो महासत्त्वः ।
सुन्दर संप्रति तातः स्पृष्टो दुष्पुत्रदोषेण ॥ ४२९ ॥

पुत्राभावः श्रेयान्न कुसुतता पुत्रिणः कुलीनस्य ।
अन्तस्तापयति भृशं सच्चरितकथाप्रसङ्गेन ॥ ४३० ॥

सांव्यवहारित एव प्रायो लोके गुणः सुखानियतः ।
येन तु सुतेन जननी वन्ध्यात्वं श्लाघते स पापीयान् ॥ ४३१ ॥

विफलं शास्त्रज्ञानं गुरुगृहसेवापि नोपकाराय ।
नियतिवशीकृतमनसो न्याय्यं पन्थानमुत्सृजतः ॥ ४३२ ॥

[1]जीवन्नेव मृतोऽसौ यस्य जनो वीक्ष्य वदनमन्योन्यम् ।
कृतमुखभङ्गो[2] दूरात्करोति निर्देशमङ्गुल्या ॥ ४३३ ॥

नोपनिहन्तुं विषयाः शक्याः सत्यं तथापि निपुणधियः ।
अभिधेयतां न गच्छन्त्यपवादविशेषिताभिधानस्य ॥ ४३४ ॥

गुरुपरिचर्या जाया गुणोन्नता[3] स्निग्धबन्धुसंपर्कः ।
ब्राह्मे कर्मणि सक्तिर्लोकद्वयसाधनं सुधियाम् ॥ ४३५ ॥

सुलभा तस्य विभूतिस्तस्य गुणा यान्ति जगति विस्तारम् ।
बहु मनुते तं सुजनस्तस्मै स्पृहयन्ति बान्धवाः सततम् ॥ ४३६ ॥

नासादयति य एकः सत्सेवितमार्गतः परिस्खलनम् ।
मण्डयति चान्ववायं स निवासः शर्मनामशेषाणाम् ॥ ४३७ ॥ (युग्मम्)

स भवति विनयाधारो युक्तायुक्ते विवेकिता तस्य ।
वृद्धोपदेशवाचः श्रवणोदरपूरणं सदा यस्य ॥ ४३८ ॥

प्राक्तनकर्मविपाकः क्षुद्रासु शरीरिणां यदासक्तिः ।
आयतनं तु सुखानां संसारभुवां कुलोद्गता दाराः ॥ ४३९ ॥

---

१. प्रसिद्धेयमार्या शार्ङ्गधरपद्धत्यादिषु. २. 'भङ्गम्' इति पा०. ३. 'कुलोद्गता' इति पा०.

निर्विण्णे निर्विण्णा मुदिते मुदिता समाकुलाकुलिते ।
प्रतिबिम्बसमा कान्ता संक्रुद्धे केवलं भीता ॥ ४४० ॥
यावद्वाञ्छितसुरतव्यायामसहाविरुद्धसंपर्का ।
चित्तानुवृत्तिकुशला पुण्यवतामेव जायते जाया ॥ ४४१ ॥
सद्भावप्रेमल····संवलयावलि························ ।
ईदृक्कोऽप्यनुबन्धो यस्य विपाकोऽप्रतीकारः ॥ ४४२ ॥ (संदानितकम्)[1]
परुषं यदभिहितासि प्रणयरुषाशङ्कितेन नर्मणि वा ।
सुदति न तत्स्मरणीयं दुर्भाषणकीर्तनोद्धाते ॥ ४४३ ॥
तव हृदये हृदयमिदं विन्यस्तं न्यासपालनं कष्टम् ।
यत्नात्तथा विधेयं स्थानभ्रंशो यथा न स्यात् ॥ ४४४ ॥
अथ विरतवचोदयितं बाष्पभराश्लिष्टवर्णपदयोगम् ।
इति कथमपि हारलता संमूर्च्छितवर्णभारतीमूचे ॥ ४४५ ॥
अविशुद्धकुलोत्पन्ना देहार्पणजीविका शठाचरणा ।
काहं रूपाजीवा क्व भवन्तः श्लाघनीयजन्मगुणाः ॥ ४४६ ॥
यत्त्वं विषयविलोकनकुतूहलादागतोऽसि विश्रान्तः ।
इयतो दिवसानस्मिंस्तन्मम परजन्मसुकृतफलम् ॥ ४४७ ॥
गुरुसेवां बन्धुजनं स्वदेशवसतिं कलत्रमनुकूलम् ।
अनुषङ्गदृष्टपरिचित आस्थां प्रविधाय कः परित्यजति ॥ ४४८ ॥
यौवनचापलमेतद्यन्मादृशि भवति कौतुकं भवताम् ।
यत्तु सुखमनवगीतं तस्य स्थानं निजा दाराः ॥ ४४९ ॥
ते मधुराः परिहासास्ता वक्रगिरः स वामतासमयः ।
नो हृदये कर्तव्यो रहसि क्षेमार्थिना भवता ॥ ४५० ॥
लाघवतो यन्महतः प्रणयाद्वासाधु येन्नवाचरितम्[2] ।
प्रतिकूलं तत्र मया नाथाञ्जलिरेष विरचितो मूर्ध्नि ॥ ४५१ ॥
दुःसंचारा मार्गा दूरे वसतिर्विसंष्ठुलं हृदयम् ।
गुणपालित तव सुहृदा भवितव्यमतोऽप्रमत्तेन ॥ ४५२ ॥

---

१. संदानितकादग्रे किंचित्त्रुटितं भाति. पुस्तकद्वयेऽप्येवमेव वर्तते. २. 'यत्र' इति पा०.

हृदयद्वय एकत्वं याते यूनोर्वियोगजं क्लेशम् ।
अनुभवतोरपरेण प्रसङ्गतः पठ्यते पथ्या ॥ ४५३ ॥
'अन्योन्यगूढचेष्टितसद्भावस्नेहपाशबद्धस्य ।
विच्छेदकरोर्मृत्युर्धीराणां वा परिच्छेदः ॥ ४५४ ॥'
अथ तच्छ्रवणानन्तरमस्निग्धं दयितिके व्रजामीति ।
अभिधाय याति सुन्दरसेनेऽपि विवर्तितग्रीवम् ॥ ४५५ ॥
वटशाखालम्बिभुजां श्वसितोष्णसमीरशुष्यदधरदलाम् ।
पर्यस्तां बिभ्राणां तन्मार्गविलोकनानिमेषदृशम् ॥ ४५६ ॥
लोलायमानवेणीतिर्यक्कृतकण्ठभूषणविशेषाम् ।
गलदश्रुवारिपूर्णां पतितां संशुष्कनिःसहाङ्गलताम् ॥ ४५७ ॥
रुन्धानामिव हृदयं स्फुटदितरकरेण कुचयुगाश्रयिणा ।
परिशोषितां विलासैरुत्सृष्टां जीवलोककर्तव्यैः ॥ ४५८ ॥
अङ्गीकृतां विपत्त्या वशीकृतां मर्मघट्टनैर्विषमैः ।
हारलतामपि रिक्तामन्तः परिकृष्यमाणभारत्या ॥ ४५९ ॥
मा मा तावद्यात क्षणमेकं यावदेष निष्करुणः ।
वनगुल्मैर्न तिरोहित इत्यभिदधतीं जहुः प्राणाः ॥ ४६० ॥ (कुलकम्)
अथ वर्त्मनि समुपेतं पप्रच्छ पुरंदरात्मजः पथिकम् ।
दृष्टा शोकव्यथिता निवर्तमाना वराङ्गना भवता ॥ ४६१ ॥
स उवाच वटतरोरध उर्व्यां पतिता विनिश्चलावयवा ।
तिष्ठति वनिता नान्या नयनावसरं गतास्माकम् ॥ ४६२ ॥
इति तद्वचनास्त्रहतो विह्वलमूर्तिः पपात भूपृष्ठे ।
उत्थापितश्च सुहृदा सोऽभिदधे तेन शोकविकलेन ॥ ४६३ ॥
भवतु कृतार्थस्तातस्त्वमपि सुमित्रात्र सांप्रतं प्रीतः ।
समकालमेव मुक्ता पापेन मयासुभिश्च हारलता ॥ ४६४ ॥
हा हा हाव हतोऽसि ध्वस्ता लीला विलास किं कुरुषे ।
उच्छिन्ना विच्छित्तिर्भ्रम विभ्रम दशदिशो निराधारः ॥ ४६५ ॥

---

१. परिच्छेदो विवेक इत्यर्थः. २. अग्रे किंचित्त्रुटितमिव भाति.

किलकिञ्चित गच्छ वनं मोट्टायितमशरणत्वमुपयातम् ।
कुट्टमित प्रव्रज्यां गृहाण बिव्वोक विश भुवो विवरम् ॥ ४६६ ॥
ललितमनाथीभूतं विहृतस्य गतिर्न विद्यते कापि ।
शशधरबिम्बद्युतिमुषि[1] यातायामन्तकस्यान्तः ॥ ४६७ ॥
विनिवृत्त्य यामि दग्धुं मद्विरहात्त्यक्तवल्लभप्राणाम्[2] ।
भवतु वराक्यास्तस्याः सप्तार्चिर्दानमात्रमुपकारः ॥ ४६८ ॥
गत्वाथ तमुद्देशं यस्मिन्सा पञ्चभावमापन्ना ।
विललाप मुक्तकण्ठं विलुठन्भुवि सहचरेण धृतमूर्तिः ॥ ४६९ ॥
एते वयं निवृत्ता मुञ्च रुषं देहि कोपने वाचम् ।
उत्तिष्ठ किमिति तिष्ठसि भूमितले रेणुरूषितशरीरा ॥ ४७० ॥
विनिमील्य दृशौ कस्मादप्रतिपत्त्या स्थितासि शुभवदने ।
त्वद्वारितगमनविधेरपराधितया न मेऽस्ति संयोगः ॥ ४७१ ॥
नाकाधिपतिपुरस्त्रीरभिभवितं त्वयि दिवं प्रयातायाम् ।
सत्स्वपि शरेषु पञ्चसु निरायुधः सांप्रतं मदनः ॥ ४७२ ॥
वञ्चकवृत्ता वेश्या इत्यपवादो जनेषु यो रूढः ।
अपनीतोऽसौ निपुणं त्वया प्रिये जीवमोक्षेण ॥ ४७३ ॥
वर्ण्यः सद्व्रत एकस्त्रिपुरान्तकनन्दनो महासेनः ।
हृदयं यस्य स्पृष्टं न मनागपि वामलोचनाप्रेम्णा ॥ ४७४ ॥
मन्येऽभीष्टवियोगं निमेषमपि दुःसहं समालोक्य ।
हरिणा वक्षसि लक्ष्मीर्विधृता गौरी हरेण देहार्धे ॥ ४७५ ॥
अयि लोकपाल सा भुवि ललामभूता तया विना शून्यम् ।
विश्वमिति किं न चिन्तितमात्मस्थानं प्रियां नयता ॥ ४७६ ॥
भगवन्हुतवह मा मा लावण्यसमुद्रसारमुद्धृत्य ।
कथमपि विहितां धात्रा धक्ष्यस्येनां जगद्भूषाम् ॥ ४७७ ॥
इति विलपन्तं बहुविधमवधीर्य[3] सुहृत्पुरंदरस्य सुतम् ।
काष्ठैर्विरचय्य चितां तामकरोदग्निसाद्गणिकाम् ॥ ४७८ ॥

---

१. 'मुखि' इति पा०. २. 'विरहे मुक्त' इति पा०. ३. 'अवधार्य' इति पा०.

तस्मिन्निद्धहुताशनविनिपतने कृतमतौ शुचा कलिते ।
मनसि स्फुरितामार्यां पपाठ कश्चित्प्रसङ्गेन ॥ ४७९ ॥
'अनुमरणे व्यवसायं स्त्रीधर्मे कः करोति सविवेकः ।
संसारमुक्त्युपायं दण्डग्रहणं व्रतं हित्वा ॥ ४८० ॥'
श्रुत्वा सुन्दरसेनः सुहृदमवोचद्व्यपेतवैक्लव्यः ।
प्रतिबोधितं मनो मे धीरेणानेन युक्तमुपदिशता ॥ ४८१ ॥
क्षणदृष्टनष्टवल्लभजन्मजराव्याधिमरणपरिभूते ।
परिवर्तिनि संसारे कः कुर्यादाग्रहं मतिमान् ॥ ४८२ ॥
यातु भवान्कुसुमपुरं वयमप्यन्त्याश्रमे समाश्रयणम् ।
अङ्गीकुर्मोऽविद्याप्रहाणसंसिद्धये नियतम् ॥ ४८३ ॥
सोऽवददभिजातजनो[1] बाल्यात्प्रभृति त्वया न मुक्तोऽस्मि ।
संन्यसनबुद्धिरधुना कथमुज्झति विषयनिःस्पृहं सुहृदम् ॥ ४८४ ॥
एवमिति सोऽभिधाय स्थिरमतिनियमैस्तपोधनैर्जुष्टम् ।
गुणपालितेन सहितः सुन्दरसेनो जगाम वनम् ॥ ४८५ ॥"
एवं भवन्ति वेश्याः स्वार्थैकरता व्यपेतसद्भावाः ।
अभिलषितविषयसिद्धेः का हानिस्तदपि युष्माकम् ॥ ४८६ ॥
रमणहृदयानुवर्तनचतुरचतुःषष्टिकर्मकुशलानाम् ।
न स्पृशति तत्त्वचर्चा पण्यवधूनां विदग्धचेतांसि ॥ ४८७ ॥
वलितप्लुतचित्रगतिस्थितिबोधैश्चोदनानुवृत्त्या च ।
रागस्पर्शेन विना विशति मनः सादिनां तुरगः ॥ ४८८ ॥
गन्धोऽपि कुतः प्रेम्णः परभृतहारीतगृहकपोतानाम् ।
उज्ज्वलयन्त्यसमेषुं विरुतविशेषैस्तथापि ते यूनाम् ॥ ४८९ ॥
आहितमुक्ताहार्यः[2] सम्यक्सकलप्रयोगसंपत्त्या ।
भावविहीनोऽपि नटः सामाजिकचित्तरञ्जनं कुरुते ॥ ४९० ॥
येऽपि धनक्षयदोषं पश्यन्ति जडा विलासिनीश्लेषे ।
प्रष्टव्यास्ते भवता किमकृतकशिपुव्ययया दाराः ॥ ४९१ ॥

१. 'जने' इति पा०. २. 'युक्ताहार्यः' इति पा०.

न च लाभ एक एव प्रवर्तते कारणं मनुष्येषु ।
बाणादयोऽपि(?) तासां वैशेषिकशास्त्रवेदिभिः कथिताः[1] ॥ ४९२ ॥
का वा विभूतिराप्ता सुन्दरसेनात्तया तपस्विन्या ।
यद्विरहकुलिशभिन्ना मुमोच या जीवितं क्षणार्धेन ॥ ४९३ ॥
उत्तमतरुणप्रकृतिः पुलकादिकसूचितान्यतरशक्तिः ।
स्फुटसंनिहितविभावो निवार्यते केन शृङ्गारः ॥ ४९४ ॥
अन्तःकरणविकारं गुरुपरिजनसंकटेऽपि कुलटानाम् ।
जानन्ति[2] तदभियुक्ता भ्रूभङ्गापाङ्गमधुरदृष्टेन ॥ ४९५ ॥
अन्या विहाय पतिगृहमविचिन्तितकुलकलङ्कजनगेहाः ।
रागोपरक्तहृदया यान्ति दिगन्तं मनुष्यलाभाय[3] ॥ ४९६ ॥
अपमानः पतिविहितो गुरुपरिकरतीव्रता गृहे दौःस्थ्यम् ।
शीलक्षतये यासां तासामतिरागतोऽन्यनरसक्तिः ॥ ४९७ ॥
या अप्यचलितवृत्ता भर्तुश्चरणाब्जतत्पराः प्रमदाः[4] ।
ता अपि रागविमुक्तास्तिष्ठन्त्यौचित्यमात्रेण ॥ ४९८ ॥
तस्मादात्माभिगमनविविधनिमित्तं विधार्यते केन ।
निजपरपण्यस्त्रीणां रागाधीनं तु हृदयनिर्वहणम् ॥ ४९९ ॥
एवंविधदृष्टान्तैरुपपत्तियुतैस्तथेदृशैर्वाक्यैः ।
अन्यैरपि चाटुपदैरावर्जितमानसं गम्यम् ॥ ५०० ॥
विहितस्वापरबोधं किंचित्प्रकटीकृतश्रमं दाक्ष्यात् ।
उत्पादितजृम्भिकया परिरभ्य घनं निशापगमे ॥ ५०१ ॥
विघटितविनिमुद्रदृशा विलोक्य ककुभः सुदीर्घनिःश्वासम् ।
वक्तव्यमिति भवत्या रजनि खले किं प्रभातासि ॥ ५०२ ॥
अबला[5] विषहेत कथं दृढशक्तिममुष्य रतिरसप्रसरम् ।
मदनतुलितानुरागो न विदध्याद्यदि बलाधानम् ॥ ५०३ ॥

---

१. 'कथितम्' इति पा०. २. 'बुध्यन्ति' इति पा०. ३. 'आसाद्य' इति पा०.
४. 'कुलप्रमदाः' इति पा०. ५. 'अवशा' इति पा०.

चक्राह्ववधू[1]प्रियतमसंघट्टनसमयसंप्राप्त्या ।
शशिना वियुज्यमाना कुमुदिनि किं क्षीणपुण्यासि ॥ १०४ ॥
विकसितसुरभिमनोहरसंस्थानं कुसुममप्राप्तम् ।
न करोति तथा पीडामास्वादितविच्युतिं[2] यथा भृङ्गः ॥ १०५ ॥
विज्ञापयाम्यतस्त्वां रचिताञ्जलिमाविधाय नतिम् ।
परिचारकजनमध्ये गणनीयाहं प्रसादेन ॥ १०६ ॥ (युग्मम्)
अथ दीपितरागाङ्गैरपहस्तितमार्गसंभ्रमोपचितैः ।
मृदुभिश्चित्रानुगतैरुपचारैः पातितस्य विश्वासे ॥ १०७ ॥
अवलोकितोऽसि लम्पट किमपि वदन्कर्णसंनिधौ नियतम् ।
संकटसेना[3]धात्र्या अद्य मया जालमार्गेण ॥ १०८ ॥
मालत्या सह किंचिदभिदधासि सखे ममेति न विरोधः (?) ।
यत्तु चिरं स्निग्धदृशा पश्यसि तां तत्र मे शङ्का ॥ १०९ ॥
त्वामागता न वीक्षितुमनुबध्य न याचितः प्रयत्नेन ।
आहूय वद किमर्थं ताम्बूलं ग्राहिता कमलदेवी ॥ ११० ॥
कञ्चुकमपकर्षन्त्याः प्रकटीभवदङ्ग[4]कुचपार्श्वम् ।
साभिनिवेशं दृष्टं भवता किं कुन्दमालायाः ॥ १११ ॥
परिहासेन गृहीता यद्यंशुकपल्लवे त्वया रामा ।
आच्छिद्यापक्रान्ता किं त्वामवलोक्य पृष्ठतः सहसा ॥ ११२ ॥
विज्ञानेन ख्यातां कुसुमलतां त्वं तु वर्णयस्यनिशम् ।
नृत्यन्तीं मृगदेवीं विस्फारितलोचनः पश्यन् ॥ ११३ ॥
कारणमत्र न वेद्म्यहमृजुपन्थानं प्रसिद्धमुत्सृज्य ।
वक्रेण यदेषि सदा माधवसेनागृहाग्रेण ॥ ११४ ॥
इति सेर्ष्योपन्यासैरन्यैश्चामर्मवेधिलघुकोपैः ।
प्रणयप्रभवैर्विहिते क्षामोदरि गूढरागत्वे ॥ ११५ ॥

---

१. 'वधूः' इति पा०. २. 'विच्युतं तथा भृङ्गाः' इति पा०. ३. 'शंकरसेना' इति पा०. ४. 'अंसकुच' इति पा०.

श्रुतिविषयेऽन्तरिततनुर्जनितस्थितिरायताक्षि सह मात्रा ।
परुषगिरा त्वं कुर्या इत्थं मिथ्यावचः कलहम् ॥ ९१६ ॥ (अन्तःकुलकम्)

अक्लेशोपनतधनः प्रेमप्रह्वो निरर्गलत्यागः ।
भट्टानन्दस्य सुतो निधिभूतोऽभव्यया त्वया त्यक्तः ॥ ९१७ ॥

व्यसनोपहतविवेको दानैकरतिः स्वदारविद्वेषी ।
मामविगणय्य मूढे निर्भर्त्सित एव केशवस्वामी ॥ ९१८ ॥

अगणितराजापायोऽविच्छिन्नायः स्वभावतस्त्यागी ।
स्वकरेण परित्यक्तो वामधिया शौण्डिकाध्यक्षः ॥ ९१९ ॥

पितुरेक एव पुत्रस्तृतीयवयसो गदाभिभूतस्य ।
द्रविणवतः प्रभुरातो निराकृतो भूरिकामया सोऽपि ॥ ९२० ॥

स्वकरेण परित्यक्ता त्वया विभूतिः करोमि किं पापा ।
सर्वभरेणोपनतं वसुदेवमनादरेण पश्यन्त्या ॥ ९२१ ॥

पुरुषान्तरसंघर्षात्प्रोत्साहितचित्तवृत्तिनिरपेक्षम् ।
वसु विसृजति यो रभसात्तस्य न वार्ता त्वया पृष्टा ॥ ९२२ ॥

चित्रादिकलाकुशलः स्मरशास्त्रविलक्षणो वृषप्रकृतिः ।
उपकुर्वन्नपि सर्वो विद्वेषिगणे त्वया क्षिप्तः ॥ ९२३ ॥

चन्द्रवतीमाभरणं दत्तं मधुसूदनस्य पुत्रेण ।
पश्यन्ती बिभ्राणा मयि रागिणि किं न ह्रीतासि ॥ ९२४ ॥

ग्रामोत्पत्तिमशेषां पश्यन्ती सिंहरागविनियोगात् ।
मन्मथसेनावासे लघयति ते रूपसौभाग्यम् ॥ ९२५ ॥

आस्तामपरो लाभो भट्टाधिपनन्दिसेनतनयेन[1] ।
शिवदेव्या उपचारः क्रियते यत्नेन पर्याप्तम् ॥ ९२६ ॥

पश्येदं धवलगृहं पाशुपताचार्यभावशुद्धेन ।
कारितमनङ्गदेव्या विभूषणं पत्तनस्य सकलस्य ॥ ९२७ ॥

आपणिकार्थस्य कुतो राजा लभते चतुर्थमपि भागम् ।
हट्टपतिरामसेनप्रसादतो नर्मदा यमुपभुङ्क्ते ॥ ९२८ ॥

---

१. 'नन्दिषेण' इति पा०.

पुंस्त्वाख्यापनकामो न स्त्री न पुमान्किल प्रभुस्वामी ।
अनुबध्नन्नुपहसितस्त्वया जडः[1] स्वार्थमनपेक्ष्य ॥ १२९ ॥

वाजीकरणैकमतिर्नरनाथानुग्रहेण विख्यातः ।
प्रत्याख्यातः स तथा रविदेवः किंकरत्वमाकाङ्क्षन् ॥ १३० ॥

किं कंदर्पकुटुम्बे जातोऽसावुत वशीकरणयोगात् ।
कामप्यवैति सिद्धिं येनाकृष्टासि सर्वभावेन ॥ १३१ ॥

बाल्ये तावदयोग्या पश्चादपि वृद्धभावपरिभूता ।
तारुण्ये रागहृता यदि गणिका भ्रमतु तद्भिक्षाम् ॥ १३२ ॥

उपनय भाण्डकमेतद्यदर्जितं मामकेन देहेन ।
विदधामि तीर्थयात्रामाःस्व सुखं प्रेयसा सार्धम् ॥१३३॥ (अन्तःकुलकम्)

आर्यजननिन्दितानां पापैकरसप्रकाशनैकनारीणाम् ।
एतावानेव गुणो यदभीष्टसमागमो निरावरणः ॥ १३४ ॥

नो धनलाभो लाभो लाभः खलु वल्लभेन संयोगः ।
अक्षिगतादर्थाप्तिर्न[2] भवति मनसः प्रसादाय ॥ १३५ ॥

गाढानुरागभिन्नं तारुण्यसुखामृतेन संसिक्तम् ।
न भजति सहृदयहृदयं विभवार्जनसंभवा चिन्ता ॥ १३६ ॥

लाभः स एव परमः पर्याप्तं तेन तृप्तास्मि ।
विनिवेश्य यदुत्सङ्गे निक्षिपति मुखे स ताम्बूलम् ॥ १३७ ॥

सुरतश्रमवारिकणान्परिमार्ष्टि निजांशुकेन गात्रेषु ।
यदुरसि निधाय षैङ्गंस्तस्य[3] न मूल्यं वसुंधरा सकला ॥ १३८ ॥

शिथिलितनिजदाररतिर्मयि सक्तमना अनन्यकर्तव्यः ।
यदसौ जितनलरूपस्तिरस्कृतं तेन गाणिक्यम् ॥ १३९ ॥

बहुकुसुमरसास्वादं कुर्वाणा मधुकरीव[4] विधियोगात् ।
ईदृक्पुरुषविशेषं लभते खलु येन भवति कृतकृत्या ॥ १४० ॥

---

१. 'जडे' इति पा०. २. दृष्ट्यादित्यर्थः. ३. 'सङ्गस्तस्य' इति पा०. ४. 'मधुकरी विधिनियोगात्' इति पा०.

अयि सरले तावदिमा उपदेशगिरो वसन्ति कर्णान्तः ।
यावन्नान्तर्भूतं तच्चेतसि मामकं चेतः ॥ ९४१ ॥
श्रीरस्तु दुर्गतिर्वा वेश्मनि वासो भवत्वरण्ये वा ।
स्वर्लोके नरके वा किं बहुना तेन मे सार्धम् ॥ ९४२ ॥
इदमास्तेऽलंकरणं दुर्जननि गृहाण किं ममैतेन ।
तेनैव भूषिताहं गुणनिधिना भट्टपुत्रेण[4] ॥ ९४३ ॥
उचितस्थाननियुक्तान्यपनीय विभूषणानि सावेगम् ।
एवमभिधाय यास्यसि मातुः पुरतः समुत्सृज्य ॥९४४॥ (कुलकम्)
इति रागात्स श्रुत्वा चेतसि कुरुते कदाचिदेवमिदम् ।
स्नेहाधिष्ठितमनसामविधेयं नास्ति नारीणाम् ॥ ९४५ ॥
जननीं जन्मस्थानं बान्धवलोकं वसूनि जीवं च ।
पुरुषविशेषासक्ताः सीमन्तिन्यस्तृणाय मन्यन्ते ॥ ९४६ ॥
रणशिरसि हते वज्रे वज्रोपमयन्त्रनिर्गतप्राण्णा ।
प्राणान्मुमोच दयिता न मन्त्रविधिना कृतानुयारामा[1] (?) ॥९४७॥
कालवशेनायासीत्पञ्चत्वं दाक्षिणात्यमणिकण्ठः ।
प्रेमोपगता वेश्या तेनैव समं जगाम पञ्चत्वम्[2] ॥ ९४८ ॥
भास्करवर्मणि याते सुरवसतिं वारितापि भूपतिना ।
तद्दुःखमसहमाना प्रविवेश विलासिनी दहनम् ॥ ९४९ ॥
ज्वालाकरालहुतभुजि नग्नाचार्यः पपात नरसिंहः ।
तस्मिन्नेव शरीरं निजमजुहोच्छोकपीडिता दासी ॥ ९५० ॥
प्रीतिभराक्रान्तमतिस्त्रिदशालयजीविकां क्रमोपगताम्[3] ।
अङ्गीचकार मुक्त्वा जीर्णा खलु मिश्रपुत्रमा मृत्योः ॥ ९५१ ॥
देशान्तरादुपेता प्रसादमात्रेण वीक्षिता वनिता ।
तत्याज न पादयुगं समरे निहतस्य वामदेवस्य ॥ ९५२ ॥

---

१. 'कृतानुयागमा' इति पा०. २. 'भस्मत्वम्' इति पा०. ३. 'क्रमोपनताम्' इति पा०. ४. 'भट्टपुत्रम्' इति पा०.

भट्टकदम्बकतनये याते वसतिं परेतनाथस्य ।
चक्रे देहत्यागं रणदेवी वारयोषितां मुख्या ॥ ९९३ ॥

अस्यामेव नगर्यां द्रविणमदात्कालसंचितमशेषम् ।
प्रेम्णाकृष्टा गणिका मिश्रात्मजनीलकण्ठाय ॥ ९९४ ॥

इयमपि विहितास्था मां मातृवचःकलुषिता क्व गता ।
त्यक्त्वाभरणं सर्वं परिवर्धितमन्युसंवेगा ॥ ९९५ ॥

उत्सृष्टालंकरणां परिशेषितमातृमुक्तपरिवाराम् ।
संतर्पयामि संप्रति सर्वस्वेनापि हरिणाक्षीम् ॥ ९९६ ॥

गेहेन किं प्रयोजनमन्यैरपि बन्धुदारपरिवारैः ।
संसारग्रहकारणमेका खलु मालती मम हि ॥ ९९७ ॥

अमृतकरावयवैरिव घटिता या दृढतरं परिष्वक्ता ।
चेतो नयति समत्वं ब्रह्मण आनन्दरूपस्य ॥ ९९८ ॥

आविर्भवदात्मभवक्षोभक्षतधीरताद्य धृतरभसा ।
विगलितकुचयुगलावृतिरालिङ्गति मालती धन्यम् ॥ ९९९ ॥

निर्दयतरौष्ठखण्डनसव्यथहुंकारमूर्छितं सुरते ।
अहहेति वचस्तस्या अपुण्यभाजो न शृण्वन्ति ॥ ९६० ॥

स्मृतिजन्मजनितविकृतिव्रततिच्छन्नं करोति संसारम् ।
आबद्धसुरतसंगरविमर्दसंक्षोभिता दयिता ॥ ९६१ ॥

गाढतराश्लिष्टवपुर्भजते कान्ता प्रमोदसंमोहम् ।
शिथिलीकृता तु किंचिद्विविधविकारं समुच्छ्वसिति ॥ ९६२ ॥

सन्त्यन्या अपि सत्यं पुरुषोचितकर्मपण्डिता वेश्याः ।
सृष्टानया तु नियतं विपरीतरतक्रियागोष्ठी ॥ ९६३ ॥

तन्त्रीवाद्यविशेषादुद्दामानन्यजन्मनस्तस्याः ।
कुहरितरेचितकम्पितसंपादननैपुणं करोति रुजम् ॥ ९६४ ॥

---

१. दत्तवतीत्यर्थः. २. 'भट्टात्मज' इति पा०. ३. 'नु गता' इति पा०. ४. 'घनरभसान्' इति पा०. ५. 'तया' इति पा०.

ललिताङ्गहारजृम्भितवलितस्मितवेपनानि मालत्याः ।
पश्यञ्जहाति कामो रतिमोहनचेष्टितेषु बहुमानम् ॥ ९६५ ॥
न ग्राम्यं परिहसितं नाविभ्रमतरलिताक्षिविक्षेपः ।
[1]सुरतानुद्योगविधौ दोहददानं न पुष्पबाणस्य ॥ ९६६ ॥
नार्थपरो नयनरसो न पराशयवेदने विचक्षणता ।
नासौष्ठवं प्रसङ्गे न [2]चान्यगुणकीर्तनेषु भारत्याः ॥ ९६७ ॥
नापरपुरुषश्लाघा न त्यागः कालदेशवेषस्य ।
वैदग्ध्यजन्मभूमेर्गुरुजघनभरेण मन्दयातायाः ॥९६८॥ (विशेषकम्)
चक्राह्वपरिष्वजनं हंससमाश्लेषनकुलपरिरम्भम् ।
पारावतावगूहनमाचरति सुमध्यमा यथावसरम् ॥ ९६९ ॥
तद्वक्त्रवदनहास्यव्यवहृतिहृतमानसस्य जायन्ते ।
अनुकूलसुन्दरा अपि भरणीयाः केवलं दाराः ॥ ९७० ॥
सूचयति पृथक्करणं भ्रातॄणां वक्ति विषमशीलत्वम् ।
विवृणोति गृहविसंस्थामभिनन्दति पितृकुलस्य गुणवत्ताम् ॥९७१॥
अन्यसुतपक्षपातं कथयति मातुस्तिरस्करोति पतिम् ।
पार्श्वनिमग्नां जायां मानयति विमुच्य कामुकं मदनः ॥ ९७२ ॥
एवं कृतेऽपि सुन्दरि यदि तिष्ठति नायकः प्रकृत्यैव ।
इत्थं पथि परिमोषस्त्वत्सख्या नैपुणेन वक्तव्यः ॥ ९७३ ॥
गृहकार्यव्यग्रतया [3]चित्तग्रहणाय वा कुलस्त्रीणाम् ।
[4]नायाते भवति सखी प्रावृड्घनकलुषिते दिशां चक्रे ॥ ९७४ ॥
प्राग्ग्रीवकशयनगता स्फारीभवदात्मसंभवविकारा ।
त्वद्वर्त्मनिहितनेत्रा गीतामन्येन गीतिकामशृणोत् ॥ ९७५ ॥
'यदि जीवितेन कृत्यं संभावय विरहिणि प्रियं तूर्णम् ।
घनरसितस्य हि पुरतः कदलीदलकोमलः कुलिशपातः ॥ ९७६ ॥'

---

१. 'सुरतावुद्योगविधौ' इति; 'सुरतोद्योगनिधौ' इति च पा०. २. 'वा' इति पा०. ३. 'वित्तग्रहणाय' इति पा०. ४. 'नायाता' इति पा०.

आकर्ण्य मामवादीद्धन्यास्ता युवतयः सखि कठोराः ।
या विषहन्ते दीर्घप्रियतमविरहानलासारम्[1] ॥ १७७ ॥
मम तु दिनान्तरितेऽपि प्रेयसि लब्ध्वा सहायसामग्रीम् ।
विदधाति मकरकेतन उत्कलिकाविधुरितं हृदयम् ॥ १७८ ॥
उत्कण्ठयति नितान्तं समीरणो बकुलकुसुमसंनाहः[2] ।
प्रच्यावयन्ति धैर्यान्मधुरध्वनिभिः कलापभृतः ॥ १७९ ॥
सतडिन्मिलद्बलाकामसिताम्बुधरावलीं समुद्यन्तीम् ।
उत्सहते सा वीक्षितुमविरलमा[3]लिङ्गितो यया कान्तः ॥ १८० ॥
स्वेच्छागमनलघुत्वं बहुलापायं[4] निशासु पन्थानम् ।
न विचारयन्ति महिला अभीष्टजगसंगतावुत्काः ॥ १८१ ॥
क्रियतां भूषणशोभा त्वरयति मे मानसं मनोजन्मा ।
रञ्जयति मनो नितरां कलधौतनिवेशितं रत्नम् ॥ १८२ ॥
घनजलदावृतककुभि प्रदोषसमये प्रदोषगमनाय ।
विदधानया कुबुद्धिं रागान्धे किमिदमारब्धम् ॥ १८३ ॥
वचनप्रपञ्चसारं जायाश्रितमन्यदेशसंबन्धम् ।
पुरुषमभिगन्तुकामा नवेयमभिसारिका दृष्टा ॥ १८४ ॥
जलधौततिलकरचनां गलदम्भोलुलितकेशान्ताम् ।
तिस्यत्तनुलीलावृतिचण्डानिलसलिलपातकण्टकिताम् ॥ १८५ ॥
अविभावितसमविषमप्रस्खलदङ्घ्रिं सहायकरलग्नाम् ।
पुरतोऽध्वनः प्रमाणं मुहुर्मुहुः साध्वसेन पृच्छन्तीम् ॥ १८६ ॥
अन्यस्त्रीषु[5] च पत्यौ व्यग्रे कृच्छ्रेण कथमपि प्राप्ताम् ।
तत्कालयोग्यपरिजननिवेदितामिति विकल्पसदृशविधौ ॥ १८७ ॥
किं प्रेम्णोऽयं महिमा किमुतात्यन्तं धनप्रलोभस्य ।
किं वान्यतः प्रवृत्ता प्रवेपिता वातवर्षेण ॥ १८८ ॥

---

१. 'अनलासङ्गम्' इति पा०. २. 'संवाहः' इति पा०. ३. 'अविरतम्' इति पा०.
४. 'बहुलापं ये' इति पा०. ५. अन्यस्मिन्प्रेतपतौ' इति पा०.

संनिहितकलत्राणामनुचितमिति बाह्यलोकसंवदनात् ।
अन्यस्मिन्नुदवसिते विसर्जितामिष्टमालतीकेन ॥ ९८९ ॥
लोकेन हास्यमानां बिभ्राणं वाससी जलक्लिन्ने ।
रूपमदमुत्सृजन्तीं वैलक्ष्याद्विहसितेन नतवदनाम् ॥ ९९० ॥
पश्चात्तापगृहीतां कण्टकदर्भाग्रभिन्नपादतलाम् ।
अस्मद्वचः स्मरन्तीं द्रक्ष्यन्त्यभिसारिकां सुकर्माणः ॥ ९९१ ॥
इति परुषमभिदधानां मातरमवधीर्य युष्मदभ्याशम् ।
चौरहतका व्रजन्तीं विद्रावितरक्षिणः सुखीं मुमुषुः ॥९९२॥ (महाकुलकम्)
एषा प्रपञ्चरचना यदि भवति वृथा पुरस्तस्य ।
वणिगिदमुपेत्य वक्ष्यति सहायसंचोदितो भवतीम् ॥ ९९३ ॥
पूर्वं दत्तस्योपरि मुक्ताहारस्य केदरास्त्रिंशत्[1] ।
परिचारिकयानीता अन्यानपि मृगयते वयस्यकृते[2] ॥ ९९४ ॥
यत्तु घनसारकुङ्कुमचन्दनधूपादि मुक्तकं दत्तम् ।
तत्संपुटके लिखितं शृणु पिण्डलिकां करोमि ते पुरतः ॥ ९९५ ॥
एतावन्तं कालं नावसरे[3]ऽत्यर्थिता मया त्वमसि ।
रिक्तं भाण्डस्थानं सांप्रतमिति याचनं क्रियते ॥ ९९६ ॥
एवंवादिनि तस्मिन्किंचिल्लज्जानतेक्षणं दृष्ट्वा ।
प्रियपूर्वं प्रश्रितया वाचा वाच्यः सवैलक्ष्यम् ॥ ९९७ ॥
हारस्तवैव तिष्ठतु मध्यस्थस्थापितेन मूल्येन ।
शेषं ततो यदन्यत्तद्दिवसैः पूरयिष्यामि ॥ ९९८ ॥
इयमपि कपटग्रथना पूर्वसमा चेत्तदेदमभिधेयम् ।
आशङ्कन्तेऽनिष्टं कातरहृदया हि योषितः प्रायः ॥ ९९९ ॥
अपटुशरीरे स्वामिनि विज्ञप्ता भगवती मया गत्वा ।
भवतु निरामयदेहो जीवितनाथस्तव प्रसादेन ॥ ६०० ॥

---

१. केदर इति नाणकविशेषस्य संज्ञा इति भाति. 'केदाराः' इति पा०. २. 'य एष कृते' इति पा०. ३. 'नाचष्टे' इति पा०.

संपन्नवाञ्छितार्था बल्युपहारेण पूजयिष्यामि ।
सामग्रीविरहेण तु न वितीर्णं तत्र मे शङ्का ॥ ६०१ ॥ (विशेषकम्)
अस्मिन्व्यर्थीभूते रिक्तीकृतशून्यवेश्मनो दाहम्[1] ।
उत्पाद्य मन्दगामिनि सर्वविनाशः प्रकाशमुन्नेयः ॥ ६०२ ॥
स्निग्धत्वमलं बुद्ध्वा सहभोजनशयनवसनलिङ्गेन ।
एभिरुपायद्वारैर्नातिविरक्तस्त्वया कार्यः ॥ ६०३ ॥
वार्धुषिक[2]कदर्थनया भोगध्वंसात्सहायवचनैर्वा ।
अवधारिते[3]ऽपि निपुणं वरगात्रि विलुप्तसारत्वे ॥ ६०४ ॥
परुषवचोनिर्धारणमावल्यासोहठोपघातीनि[4] (?) ।
यत्नादमी विधेया गम्यस्य विमोक्षणोपायाः ॥ ६०५ ॥
पृथगासननिर्देशः प्रत्युत्थानादिकेऽपि शैथिल्यम् ।
सासूयसोपहासा आलापा मर्मवेधि परिहसितम् ॥ ६०६ ॥
तत्प्रतिपक्षश्लाघा तदधिकगुणरागकीर्तनावृत्तिः ।
वदति[5] प्रियमाभीक्ष्णं बहुप्रलापिस्त्वदूषणाख्यानम् ॥ ६०७ ॥
वचनान्तरोपघातैस्तत्प्रस्तुतसंकथासमाक्षेपः[6] ।
तद्व्यवहारजुगुप्सा सव्यपदेशस्तदन्तिकत्यागः ॥ ६०८ ॥
व्याजेन कालहरणं स्वापावसरे विवर्तनं शयने ।
निद्राभिभवस्वापनमुद्वेगः संमुखीकरणे ॥ ६०९ ॥
गुह्यस्पर्शनिरोधः स्वभावसंस्थापनानुयोगेषु[7] ।
चुम्बति वदन[8]विकम्पनमालिङ्गति कठिनगात्रसंकोचः ॥ ६१० ॥
असहिष्णुत्वं प्रहणनकररुहदशनक्षतिप्रसङ्गेषु ।
दीर्घरते निर्वेदः स्वपिहीति रताभियोजके[9] भूयः ॥ ६११ ॥
तदशक्तावनुबन्धो वैदग्ध्यविनाशने तथा हासः ।
रात्र्यवसानस्पृहया पुनः पुनर्यामिकप्रश्नः ॥ ६१२ ॥

१. 'दाहात्' इति पा०. २. वृद्ध्याजीवी वणिग्वार्धुषिक इत्युच्यते. ३. 'अवधीरिते' इति पा०. ४. 'मां हतोपघातीनि' इति पा०. ५. 'तदति' इति पा०. ६. 'शङ्कया' इति पा०. ७. 'नियोगेषु' इति पा०. ८. 'वदनवियोजन' इति पा०. ९. 'रतानि योजके' इति पा०.

निःसरणं वासगृहादुषसि समुत्थाय तल्पतस्त्वरया ।
सरभसमुदीरयन्त्या निशा प्रभाता प्रभातेति ॥ ६१३ ॥
उभयेच्छया प्रवृत्तं निरुपाधि प्रेम भवति रमणीयम् ।
अन्योन्यसमासक्तौ संस्थानमिवाभिजातमणिहेम्नोः ॥ ६१४ ॥
यस्त्वेकाश्रयरागः परिभवदौर्बल्यदैन्यनाशानाम् ।
स निदानससंदिग्धं सीता प्रति दशमुखस्येव ॥ ६१५ ॥
यानि हरन्ति मनांसि च ललितस्मितवीक्षितानि रक्तानाम् ।
तान्येव विरक्तानां प्रतिभान्ति विवर्तितानीव ॥ ६१६ ॥
विदधातु किमपि कथमपि निगृह्यमाणा मुहूर्तमासिष्ये ।
इति यत्र मनः स्त्रीणां तत्रापि रमन्त एव पशुतुल्याः ॥ ६१७ ॥
यत्र न मदनविकाराः सद्भावसमर्पणं न गात्राणाम् ।
तस्मिन्मुद्रितभावे पशुकर्मणि पशव एव रज्यन्ते ॥ ६१८ ॥
[1]अवधीरणयोपहतः प्रतिदिवसं हीयमानसद्भावः ।
अभिमानवान्मनुष्यो योषितम्[2]ऊढामपि त्यजति ॥ ६१९ ॥
साक्षिनिकोचं सख्याः पाणितलं पाणिना समाहत्य ।
यन्नरमुपहसति स्त्री ददातु तस्मै मही रन्ध्रम् ॥ ६२० ॥
पुरुषान्तरगुणकीर्तनमन्योद्देशेन चात्मनो निन्दाम् ।
शृण्वन्नपि यः स्वस्थः स्वस्थोऽसौ कालपाशबद्धोऽपि ॥ ६२१ ॥
अवगम्याभिप्रायं स्वामिन्याः परिजनो[3]ऽपि यं पुरुषम् ।
[4]अवहसति तिरस्कार्यं तस्य न मूल्यं वराटिकाः पञ्च ॥ ६२२ ॥
[5]तत्त्वातत्त्वसमुत्थव्यवहृत्योर्योऽन्तरं न जानाति ।
स्थानं भवति स पशुपतिरपसंशयमर्धचन्द्रलाभस्य ॥ ६२३ ॥
क्रमकृशितगौरवांशो रिक्ततया लाघवं परापतितः ।
अप्राप्तपरिच्छेदः प्लवतेऽसौ युवतिसरिति कुमनुष्यः ॥ ६२४ ॥

---

१. 'अवधारण–' इति पा०. २. विवाहितापीत्यर्थः. ३. 'अप्रियम्' इति पा०. ४. 'व्यवहरति' इति पा०. ५. 'तत्त्वावहासमुग्धव्यवहृतयोः' इति पा०. ६. 'हसित' इति पा०.

यत्नेन कपटघटिताञ्शृङ्गारोद्दीपनार्थमनुभावान् ।
रतिशिल्पजीविकाभिर्मूढास्तत्त्वेन गृह्णन्ति ॥ ६२५ ॥
या धनहार्या नार्यो निर्मर्यादाः स्वकार्यतात्पर्याः ।
सह ताभिरपीहन्ते बत मन्दाः संगतमजर्यम् ॥ ६२६ ॥
अपरोक्षधनो गम्यः श्रीमानपि नान्यथेति निर्दिष्टम् ।
कंदर्पशास्त्रकारैः कुतः कथा लुप्तविभवस्य ॥ ६२७ ॥
व्यासमुनिनापि गीतौ द्वावेव नराधमौ लोके ।
धर्मः परो न विहितः कामकलायां मतिः स्थिरा यस्य ॥ ६२८ ॥
कामनवाभिनवर्गुणवद्भिः[1] स्वस्य मदनरोगवतः ।
अर्थोऽनर्थवतोऽभिगमकामः समरतनरोपभोगेन (?) ॥ ६२९ ॥
यस्तु न धर्मप्राप्त्यै नार्थाय न कामसाधनोपायः ।
स पुमान्स्वैच्चरितनरैः[2] पर्यनुयुक्तः किमाचष्टे ॥६३०॥ (संदानितकम्)
कामोद्वेगगृहीतं[3] धूर्तैरुपहस्यमानशृङ्गारम् ।
दारिद्र्यहतं यौवनमबुधानां केवलं विपदे ॥ ६३१ ॥
व्यपगतकोषे रागिणि याति लयं पानमात्रलोभकृते[4] ।
क्षुद्रामधुकरिकाब्जे न तु गणिका चिन्तितस्वार्थे ॥ ६३२ ॥
यासां कार्यापेक्षा सकटाक्षनिरीक्षणेऽपि वेश्यानाम् ।
दर्शनमात्रक्षुभितैर्वञ्च्यन्ते ताः कथं पुरुषैः ॥ ६३३ ॥
क्लेशाय दुर्भगानां मानस्तुतिगात्रभङ्गविन्यासः ।
गणिकाभिनयचतुष्टयमाकृष्टयै स्वापतेयपुष्टानाम्[5] ॥ ६३४ ॥
किं धक्ष्यति[6] भौमोऽपि ज्वलनः खलु तादृशं कुलाङ्गारम् ।
यो दह्यते न[7] विरसं विरक्तदासीतिरस्कारैः ॥ ६३५ ॥
गृहमेतदीश्वराणां कान्तारं दुष्प्रवेशमन्येषाम् ।
फूत्कृतमिदं सभुजया न मालती कामसत्रदानपरा ॥ ६३६ ॥

---

१. 'गुणवान्निःस्वस्य' इति पा०. २. 'सत्वरितनरैः' इति पा०. ३. 'कामोद्वेगि.' इति पा०. ४. 'लाभहृते' इति पा०. ५. धनवतामित्यर्थः. ६. 'वक्ष्यति' इति पा०' ७. 'अतिविरसम्' इति पा०.

इति तूदितनिजचेटीनिगदितकटुकाक्षराण्यकृतलक्ष्मा (?) ।
आकर्णयतो वाचो दैवोपहतस्य मर्मरुजः ॥ ६३७ ॥
एवमभिधीयमानो बुध्यति यदि नो पशुर्नराकारः ।
तदिदं सुन्दरि वाच्यः प्रश्रितवचसा त्वया कामी[1] ॥ ६३८ ॥
प्रीयत एव तवोपरि हृदयं मे किं तु गुरुजनाधीना ।
मातृवचोगतिक्रमणं न समर्था संविधातुमहम् ॥ ६३९ ॥
अर्हसि तावदतस्त्वं गन्तुमितः कतिपयान्यपि दिनानि ।
पुनरपि भवतैव समं भोक्तव्यं जीवलोकसुखम् ॥ ६४० ॥
निर्वासितेऽपि तस्मिन्यः कामी पूर्वमुज्झितोऽभूत्ते[2] ।
तस्य प्राप्तविभूतेर्युक्तिरियं भिन्नसंधाने[3] ॥ ६४१ ॥
उपवनलीलाविहरणहावोज्ज्वलमञ्जुलस्य सह तेन ।
वर्णनमितिवृत्तस्य सरजविकाराश्च वीक्षिते तस्मिन् ॥ ६४२ ॥
इदमुपवनमतिधन्यं निर्भरमालिङ्गितं सुरभिलक्ष्म्या ।
मत्कण्ठाश्रितपाणिर्विभ्राम स यत्र जीविताधीशः ॥ ६४३ ॥
सख्य इतो भ्रमरकुलत्रासितया प्रियतमो मया सहसा ।
वक्रीभवत्पयोधरमुपगूढो धीरसीत्कारम् ॥ ६४४ ॥
रणदिन्दिन्दिरवृन्दे[4] कूजत्कलकण्ठवार[5]रमणीये ।
अत्रातिमुक्तकगृहे मरुदीरणविततकुसुमसंछन्ने ॥ ६४५ ॥
मयि जाताधिकरागो बलवति मदने सहायसामग्र्या ।
कान्तः पल्लवशयने नो तृप्तिमगाद्विविक्तकार्येषु ॥ ६४६ ॥
प्रेङ्खत्प्रहरणयुक्त्या विध्यन्पार्श्वद्वयं नखैर्धूर्तः ।
चक्रे मां मदनमयीं व्रतपुङ्खमिमां समधिरूढाम् (?) ॥ ६४७ ॥
स्पृहणीयोऽयमशोकः स्पृष्टो यद्दुर्लभेन हस्तेन ।
असदवतंसकार्थं नूतनदलपल्लवान्विचारयता ॥ ६४८ ॥

---

१. 'कामम्' इति पा०. २. 'भुङ्क्ते' इति पा०. ३. 'संरागे' इति पा०. ४. शब्दायमानभ्रमरकुले इत्यर्थः. ५. वारः समूहः.

अस्मिन्सहकारतले तस्योत्सङ्गे सलीलमासीना[1] ।
अश्रृणवमहमिति वाचः पश्यन्ती विलसितानि तरुणानाम्[2] ॥ ६४९ ॥
उत्थापय मानवशे दयितं चरणाग्रनिपतितं तूर्णम् ।
अत्याकृष्टं त्रुट्यति सुदृढमपि प्रेमबन्धनं मूढे ॥ ६५० ॥
उत्तिष्ठन्नपि यातः किं तेन निवारितेन सखि पशुना ।
यामीति निष्प्रकम्पा विनिःसृता यस्य साधरे वाणी ॥ ६५१ ॥
आयुःसारं यौवनमृतुसारः कुसुमसायकवयस्यः[3] ।
सुन्दरि जीवितसारो रतिभोगरसामृतस्वादः ॥ ६५२ ॥
रम्यं कुसुमस्तबकं कुरु मे प्रिय कैङ्किरातमवतंसम्[4] ।
तिष्ठतु वा किमनेन प्रत्यग्रमशोककिसलयं चारु ॥ ६५३ ॥
आस्तामास्तामेतत्प्रापय मां सिन्दुवारमभिरामम् ।
नहि नहि राजति सुतरां चूतद्रुममञ्जरी कर्णे ॥ ६५४ ॥
धिक्तारुण्यमकान्तं धिक्कान्तं यौवनेन रहितं च ।
धिक्तद्द्वयमपि मन्मथशास्त्रविकासं विना सुरतम् ॥ ६५५ ॥
जनितोऽप्यपराधशतैर्वामे तस्मिंश्चिरप्ररूढोऽपि ।
अधिगतमधुना सख्या तव सत्त्वमतीत्य[5] वर्तते मानः ॥ ६५६ ॥
वर्षशतस्य हि सारः कलेवरः प्रथममेलकस्थानम् ।
सचकितमागच्छन्ती सोत्कलिकैर्यत्र दृश्यते रमणी ॥ ६५७ ॥
किं निर्मितोऽसि धात्रा नवोऽपरः किमु वसन्तगुण एषः[6] ।
कुसुमशरपूर्णतूंणः[7] किमुताभवदन्य एष[8] कंदर्पः ॥ ६५८ ॥
नो पश्यसि यदि ककुभः प्रचुरोद्दलकुसुमसुरभिरमणीयः ।
परभृतकूजनमिश्रं न श्रृणोषि यदि द्विरेफझंकारम् ॥ ६५९ ॥
गन्धं यदि च न लभसे वासितदिग्व्योम सुमनसो हृद्यम् ।
अनुभवसि यदि स्पर्शं नो शीतलदाक्षिणात्यपवनस्य ॥ ६६० ॥

---

१. 'आसीनाम्' इति पा०. २. 'तरुणीनाम्' इति पा०. ३. वसन्त इत्यर्थः. ४. रक्ताम्लानपुष्पनिर्मितमित्यर्थः. ५. 'सत्यम्' इति पा०. ६. 'एव' इति पा०. ७. 'तूर्णः' इति पा०. ८. 'एव' इति पा०.

वसने स्त्रियैकशेषः खल पञ्चार्यो गुणेन परिभूतः (?) ।
नार्हसि तदिति त्यक्तो निजाश्रमं गन्तुमन्यतो नितराम् ॥६६१॥
अस्मिन्सरसि सलीलं करयन्त्रविनिर्यदम्बुधाराभिः ।
दयितेन ताडिताहं मयाप्यसावाहतो मृणालिकया ॥ ६६२ ॥
पुनरन्तर्जलमग्नो मामुपगम्याविभावितः सहसा ।
उच्चिक्षेप सहासं हासितसंनिहितपरिवारः ॥ ६६३ ॥
संसक्तार्द्रावरणं जघनं ननु पश्यतस्तदा तस्य ।
प्रथमाकाङ्क्षाकूतं भेजे संभोगशृङ्गारम् ॥ ६६४ ॥
कालप्रदेशभोगव्यापारस्थितिविशेषघटनाभिः ।
चिररूढोऽपि हि यूनां नवत्वमुपनीयते रागः ॥ ६६५ ॥
सादरमर्पयतोऽङ्गं गोत्रस्खलनापराधिनस्तस्य ।
सख्यः स्मरामि सहसा विलक्ष्यतां क्लिष्टहसितस्य[1] ॥ ६६६ ॥
प्रत्यग्रनखव्रणितस्तनान्तरे स्पृशति लोचने स्पृहया ।
प्रेमसिताच्छादनमकरवमहमब्जिनीपत्रम् (?) ॥ ६६७ ॥
क्षिप्त्वातर्कितमम्भो गर्भितनलिनीपलाशपटभावात् ।
आहतया यद्विरुतं स्वस्थधिया नैव शक्यते कर्तुम् ॥ ६६८ ॥
सुश्लिष्टो दूरविधिर्मदनालसगात्रजृम्भितं ललितम् ।
गूढस्थानप्रकटनमङ्गुलिविस्फोटनं स्मितं सुभगम् ॥ ६६९ ॥
नीवीबन्धविमोक्षो मुहुर्मुहुः केशपाशविश्लेषः ।
स्वाधरदशनग्रहणं बालकपरिचुम्बनं रतोत्सुकता ॥ ६७० ॥
साकाङ्क्षितं क्षिपन्त्या तरलायतलोचनं मुहुः कान्ते ।
उद्दिश्य तद्वयस्यकमिति शोकग्रस्तवर्णशिरः ॥ ६७१ ॥
एकीभावं गतयोर्जलपयसोर्मित्रचेतसोश्चैव[2] ।
व्यतिरेककृतौ शक्तिर्हंसानां दुर्जनानां च[3] ॥ ६७२ ॥
येन तदा मा भूवुः (?) परिजनमुत्सार्य विधृतनटमन्युः ।
दर्शितहितस्वरूपः परपीडाकरणपण्डितः प्रथमः ॥ ६७३ ॥

१. 'क्लष्ट' इति; 'धृष्ट' इति च पा०. २. 'च तथा' इति पा०. ३. 'वा' इति पा०.

अतिकोमलमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।
परमार्थतः सहृदयं दहति पुनः कालकूटघटित इव ॥ ६७४ ॥
अविदितगुणान्तराणां नो दोषः[1] प्राप्तदेशवासानाम् ।
स्वाधीनकुङ्कुमा अपि यद्विदधति बहुमतिं[2] नीले ॥ ६७५ ॥
क्व महीतलरम्भात्वं न्यक्कृतचन्द्रप्रभा स्वदेहरुचा ।
मिन्नलता क्व वराकी नीचैरुपसेवितारोहा ॥ ६७६ ॥
यस्या न खलु विगणिताः प्रह्वात्मानो महाधनाः कुलजाः ।
सोऽद्य हृदयेन तस्यां त्वयि तिष्ठति बाह्यवृत्तेन ॥ ६७७ ॥
तामेव समाचरणां सद्भावेन प्रवर्तितां निपुणाः ।
विन्दन्ति तत्र कुशलाः स्नेहविरूपे प्रभेदेन ॥ ६७८ ॥
भवतु विरूढप्रेम्णः सत्कर्मविवेचने मनोवृत्तिः ।
मारोहतीति सैवं निवेदितं परिजनेन[3]······· ॥ ६७९ ॥
इति दुर्जनाभिनिःसृतवागभिदूषितसमस्तवपुषो मे ।
ईर्ष्यारुषः प्रवृद्धाश्चिररूढप्रणयखण्डनप्रभवाः ॥ ६८० ॥
लघुहृदयतया तस्माद्दुर्भाषितवज्रपातविहतानाम् ।
वर्त्मविशेषवितर्कों न स्पृशति प्रायशो मनः स्त्रीणाम् ॥ ६८१ ॥
प्रियमपि वदति दुरात्मा क्षिपति विपक्षस्वश्वनुधारे ।
आसाद्य प्राणहतो मृतये परिलेढि जिह्वया रवहम् (?) ॥ ६८२ ॥
हितमधुराक्षरवाणीव्यवहारमनुप्रविश्य तन्मानम् ।
सरला दुराशयानामुपघातं फलत एव विन्दन्ति ॥ ६८३ ॥
परसंतापविनोदो यत्राहनि न प्रयाति निष्पत्तिम् ।
अन्तर्मना असाधुर्न गणयति तदा सुखोमध्ये (?) ॥ ६८४ ॥
दिवसांस्तानभिनन्दति बहु मनुते तेषु जन्मनो लाभम् ।
ये यान्ति दुष्टबुद्धेः परोपतापाभियोगेन ॥ ६८५ ॥
विकसितवदनः पिशुनः प्रोत्फुल्लविलोचनस्तथा भ्रमति ।
मन्ये यथा नराणां परहितकरणे श्रमो वन्ध्यः ॥ ६८६ ॥

१. 'नोद्देशः' इति पा०. २. 'बहुमतिर्लीने' इति पा०. ३. 'परिचयेन' इति पा०.

शठमृगयुः कुसृतिशतैरज्ञातप्रतिविधीन्साधुमृगान् ।
अभ्यस्तलक्ष्यवेधः संनिश्चये परिश्रमं व्रजति (?) ॥ ६८७ ॥
अनुकूलवरपुरंध्रिषु पुरुषाणां बद्धमूलरागाणाम् ।
नयति मनो दुःशीलः कुसुमास्त्रो हीनपात्रेषु ॥ ६८८ ॥
सावरणं व्रजतोऽन्यान्कौतुकदृष्ट्या प्रसङ्गतो दयितान् ।
बुद्ध्वापि विदग्धधियो वर्तन्ते नाद्य[1] धर्मेण ॥ ६८९ ॥
सत्यं प्रेमणि वृद्धे व्यथयति हृदयं मनागपि स्खलितम् ।
अवहृतनिजमाहात्म्यास्तथापि[2] धीरा न मुह्यन्ति ॥ ६९० ॥
स्वच्छन्दः पिबतु रसं भ्रान्त्वा[3] नानावनानि कुसुमेषु ।
अनुभूतगुणविशेषः पुनरेष्यति मालतीं मधुपः ॥ ६९१ ॥
मालत्यां गुणवार्तां नो सम्यग्वेत्ति मधुकरस्तावत् ।
अनुभवमेति न यावत्सुमनोन्तरसंगमास्वादे ॥ ६९२ ॥
कोमलमानकदम्बां भजमानो भजति दीप्ततामधिकाम् ।
संचाल्यमानदारुः पावक इव सुप्रभः स्नेहः ॥ ६९३ ॥
यः पुनरतिकोपानलसंतापवशेन[4] दूरमाकृष्टः ।
काचमणिः खलु स यथा परिणामं खण्डखण्डमुपयाति ॥६९४॥
वेतनलाभाद्बहवः सेव्यन्ते सौष्ठवेन पञ्चजनाः[5] ।
विश्राम्यति यत्र मनः स तु दुष्प्रापः सहस्रेषु ॥ ६९५ ॥
मन्वादिमुनिवरैरपि कालत्रयवेदिभिः सुदुर्ज्ञेयम् ।
तत्सुकृतं यस्य फलं रभसागतवल्लभाश्लेषः ॥ ६९६ ॥
यातेऽपि नयनमार्गे प्रेयसि यस्याः स्मृतिर्व्यलीकेषु ।
मन्ये तां प्रति नियतं कुण्ठितशरपञ्चको मदनः ॥ ६९७ ॥
जीव्यत एव कथंचिद्धिग्वृत्तिमिमां महद्भिरवगीताम् ।
विजहाति यन्न गणिका तद्वाञ्छितरमणलाभलोभेन ॥ ६९८ ॥

---

१. 'नाद्य' इति; 'नाद्य' इति च पा०. २. 'तदपि न धीरा विमुह्यन्ति' इति पा०.
३. 'भ्रान्त्वा भ्रान्त्वा वनानि' इति पा०. ४. 'संतप्तश्वासदूरमाचष्ट' इति पा०.
५. पुरुषा इत्यर्थः.

कण्टकिनः कटुकरसान्करीरबदरादिविटपतरुगुल्मान् ।
उपभुञ्जाना करभी दैवादाप्नोति मधुरमधुजालम् ॥ ६९९ ॥
का[1] स्त्री न प्रणयिवशा का विलसितयो मनोभवविहीनाः ।
को धर्मो निरुपशमः किं सौख्यं वल्लभेन रहितानाम् ॥ ७०० ॥
स्वाच्छन्द्यफलं बाल्यं तारुण्यं रुचिरसुरतभोगफलम् ।
स्थविरत्वमुपशमफलं परहितसंपादनं च जन्मफलम् ॥ ७०१ ॥
अभिदधतीमिदमालीमवगम्य गृहीतयौवनभृतेन ।
यौवनसुखेन सार्धं[2] तनयैरेध गृहपरिच्छिन्नाः (?) ॥ ७०२ ॥
अधुनाशु (?) तापपावकमध्यगता पच्यमानसर्वाङ्गी ।
निष्फलजन्मप्राप्तिर्जीवत्युच्छ्वसितमात्रेण ॥ ७०३ ॥
स्थानेषु येषु युष्मत्संगत्या क्रीडितं चिरं धृत्या[3] ।
तानि खलु वीक्षमाणा भवामि कण्ठस्थितप्राणा ॥ ७०४ ॥
अन्यवपु[4]ष्येना विसंज्ञा कृतभूषणवस्त्रपत्रसंचारा ।
दारुमयीव प्रतिमा विदधामि विडम्बना बह्वीः ॥ ७०५ ॥
यदि नामोदरभरणप्राप्त्यै कुरुतेऽन्यपुं[5]ष्पसंश्लेषम् ।
तदपि न पुष्टिर्भृङ्ग्या अपिबन्त्या मधुरवृन्दमकरन्दम् ॥ ७०६ ॥
आस्तामपरो लोक क्रीडा[6]पेक्षापरो यदि प्रीतिः ।
व्यसनान्तरे पतन्ती न वारिता परिजनेनापि ॥ ७०७ ॥
किं वा बहुभिः कथितैः संप्रति हि मयापि नियमिता बुद्धिः ।
स्थास्यामि संनियुक्ता भवद्गृहे प्रेष्यभावेन ॥ ७०८ ॥
इति नेत्रादिविकारैर्वशमुपनीतं प्रलीनधैर्यस्य ।
सारग्रहाभिभूतं परिमृष्टप्राङ्गिराकृतिस्मरणम् ॥ ७०९ ॥
प्रा[7]दुर्भूतरिरंसं क्षणे क्षणे जघनदेशगतदृष्टिम् ।
पक्वाम्रमिव विमोक्ष्यसि पूर्ववदावूष्य निःशेषम् ॥ ७१० ॥

१. 'काश्मीरप्रणयिवशा' इति पा०. २. 'सार्धं नयैव गृह्यम्' इति पा०. ३. 'धृत्वा' इति पा०. ४. 'वशेन' इति पा०. ५. 'पुष्ट' इति पा०. ६. 'क्रीडापेक्षी परा यदि प्रीतः' इति पा०. ७. 'प्रादुर्भूतं नितराम्' इति पा०.

अशरीरामिषदिग्धं चङ्क्रमितदृष्टिपातमस्खलितम् ।
प्रक्षिप्य क्षिप्रतरं स्फुरणेन विवर्जितं सुपरिपुष्टम् (?) ॥ ७११ ॥
हस्तद्वयान्तरागतमुपचारय येन संत्कृत्य (?) ।
भुक्त्वा यावन्मांसं त्यक्ष्यति चर्मास्थिशेषितं मत्स्यम् ॥ ७१२ ॥
शृणु सुश्रोणि यथास्मिन्कमलेश्वरपादमूलमञ्जर्या ।
प्रवराचार्यदुहित्रा राजसुतश्चर्वितश्च मुक्तश्च ॥ ७१३ ॥
"आसीच्छ्रीसिंहपटो नाम्ना नृपतिर्महीयसां श्रेष्ठः ।
तस्यात्मजोऽधितस्थौ निवेशनं देवराजसंबद्धम् ॥ ७१४ ॥
स कदाचिद्वृषभध्वजदिदृक्षया परिमिताप्तपरिवारः ।
अनुवर्तमान आगात्तारुण्योदीर्णवेशचरितानि ॥ ७१५ ॥
पूर्वत्रिभागसंस्थितबृहदम्बरचीरकेशसंयमनः ।
अल्पतररागसान्द्रो घनकुङ्कुमलिप्तकर्णकेशाग्रः ॥ ७१६ ॥
सिद्धार्थबीजदन्तुरललाटतिलकोपयुक्तताम्बूलः ।
श्रवणनिवेशितकुण्डलटिट्टिभकप्रायकंधराभरणः ॥ ७१७ ॥
केयूरस्थानगतसुवर्णभृतमन्त्रगर्भजतुगुडकः ।
मणिबन्धनविन्यस्तप्रचलाङ्कुरजातरूपमणिमालः ॥ ७१८ ॥
धृतवेत्रदण्डकूर्चकपरिवेष्टितसासिधेनुखड्गश्च ।
मृदुतरपटिकावरणः शब्दोल्बणचुँर्चुराङ्कचरणान्तः ॥ ७१९ ॥
गम्भारेश्वरदास्यां नम्रं किल तर वयस्य को ं वीरः (?) ।
प्राप्स्यति सापि दुराशा वर्षत्रितयेन यन्मया प्राप्तम् ॥ ७२० ॥
दर्शयति दिशः फलिता अमृतगभस्ति करेण वारयति ।
सुरतकृतिचन्द्रवर्त्मा निर्वर्णकवाक्प्रपञ्चेन ॥ ७२१ ॥
त्वामनुयान्तं संप्रति यामि कुरङ्गाक्षि वसुशेषम् ।
अनुरूपिका भविष्यसि विषमं गुडजिह्विका तस्य ॥ ७२२ ॥

---

१. 'जडम्' इति पा०. २. 'संकुला' इति पा०. ३. 'निदेशनरदेवसंबद्धम्' इति पा०. ४. 'विषमध्वज' इति पा०. ५. 'वरणः' इति पा०. ६. 'प्रवला' इति पा०. ७. 'बुर्बु-राङ्कचरणत्रः' इति पा०. ८. 'कोवारः' इति पा०. ९. 'तारयति' इति पा०. १०. 'धर्मा' इति पा०.

वञ्चयति जनं योऽसौ हरिनिर्हतो[1] भूर्लताभिमानेन ।
लिखति शुभं दशवृद्धया स निमज्जति तरलिकावर्ते ॥ ७२३ ॥
गृह्णासि यत्पटान्ते मम पश्यत एव मन्द मदिराक्षीम् ।
अत आवयोरवश्यं सा वेक्ष्यसि[2] नोक्तमन्तरं भवता ॥ ७२४ ॥
योऽयं गृहीतभूमिः कुमुदाकर्णो विधृतदण्डकाषायः[3] ।
लोकस्य सा शशाङ्का कृतावसरो विलोकयन्पार्श्वे (?) ॥ ७२५ ॥
कुर्वाणो मौनव्रतसमुत्पादितसकलवैष्णवप्रीतिः ।
हरिशासनं प्रपन्नस्त्रिपुरान्तकदर्शनापदेशेन[4] ॥ ७२६ ॥ (अन्तर्विशेषकम्)
स्त्रैणं पश्यति युक्त्या साकाङ्क्षं वर्जितान्यजनदृष्टिः ।
कुमुदिनि मम हृदयगतं भवितव्यं व्याजलिङ्गिनानेन ॥ ७२७ ॥
पश्यत्यदृश्यमानो निरीक्षितो वीक्षते परां ककुभम् ।
ब्रूते किंचित्सस्पृहमभियुक्तो भवति कीलितध्वानः ॥ ७२८ ॥
न जहाति समासन्नं नोत्सहते पार्श्वगोचरे स्थातुम् ।
एष मनुष्यो मन्ये निष्प्रतिभः साभिलाषश्च ॥ ७२९ ॥ (अन्तर्युगलकम्)
ते नीता दिवसाः खलु क्रियते नर्म[5] त्वया समं येषु ।
अधुनाचार्याणीत्वं पाशुपताचार्यसंबन्धात् ॥ ७३० ॥
भ्रमसि यथेष्टं तावत्कुर्वाणो युवतिपल्लवग्रहणम् ।
लोलिकदासतया[6] च द्रविणकुलं पाशिकां विशति ॥ ७३१ ॥
एवं प्रकामवाम्यप्रसक्तविटवीटिकासमाकीर्णम् ।
सेवाचतुरपुरःसरविजनीकृतधर्मदेवकुलम् ॥ ७३२ ॥
उत्पादितहरपूजो निष्ठुरयाष्टीकनियमिते लोके ।
त्वरितनियोगिस्थापितमध्याप्रसमरतत्त्वसंपूर्णम् (?) ॥ ७३३ ॥
अग्रोपविष्टनर्तकमंशिग्राहप्रकाशयुवतिगणः ।
श्रेष्ठिप्रमुखवणिग्जनढौकितताम्बूलकुमुदपटवासः ॥ ७३४ ॥

---

१. 'णिहतो भूर्नता' इति पा०. २. 'वक्षसि' इति पा०. ३. 'दण्डकोषो यः' इति पा०. ४. 'प्रथयन्' इति पा०. ५. 'नर्मक्रिया' इति पा०. ६. 'यासनया' इति पा०.

विविधविलेपनखराटित्कचक्रकधरखङ्गधारिणाशून्यः (?) ।
पृष्ठत आत्तकृपाणैः शिरोभिरक्षैश्च विश्वस्तैः ॥ ७३५ ॥
ताम्बूलकरङ्कभृता संदंशगृहीतवीटिकाग्रहणे ।
ईषत्पृष्ठं कुर्वन्मन्दं [1]खटकामुखेन वामेन ॥ ७३६ ॥
पार्श्वावस्थितनर्मप्रियसचिवन्यस्तपूर्वतनुभागः ।
पृच्छंश्च कुशलवार्तां सवणिग्जननर्तकप्रभृतीन् ॥७३७॥(चक्कलकम्)

अथ वैतालिक उच्चैरुपसंहृतलोककलकले धीरम् ।
अभितुष्टाव तमित्थं प्रसन्नगम्भीरया वाचा ॥ ७३८ ॥

जय देव परबलान्तक गुरुचरणाराधनैकशुभचित्त ।
वरवनिताजनमोहन दारिद्र्यतमःप्रचण्डकरदाम ॥ ७३९ ॥

रणवीरवंशभूषण गुरुवसुधादेवपूजनप्रह्व ।
शरणागताभयप्रद हितबान्धवबन्धुजीवकामार्गस्त्वम् ॥ ७४० ॥

तादृक्प्रतापदहनः स तावको व्याप्तगगनदिक्चक्रः ।
दृष्टो जलावसानो रिपुवनितातिलकशोभासु ॥ ७४१ ॥

एष विशेषः स्पष्टो वह्नेश्च त्वत्प्रतापवह्नेश्च ।
अङ्कुरति तेन दग्धं दग्धस्यानेन नोद्भवो भूयः ॥ ७४२ ॥

श्रीफलभुक्पत्त्रवृतो विग्रहरसिको विमुक्तशस्त्ररतिः ।
राज्यस्थितिं न मुञ्चति हृतलक्ष्मीकोऽपि तव विपक्षगणः ॥७४३॥

ददतो वाञ्छितमर्थं [2]दाने रक्तस्तु तव गृहं त्यक्त्वा ।
स्त्रीचापलेन कीर्तिर्नग्नासक्ता गता ककुभः ॥ ७४४ ॥

[3]भवतो भवतो धैर्यं तेन हि भिन्नोऽन्तको रिपुः प्रणतः ।
मुक्तास्त्वयेति बहवो रिपवस्तु प्रेक्षका समरे ॥ ७४५ ॥

अटता धात्रीमखिलामिदमाश्चर्यं मया परं दृष्टम् ।
धनदोऽपि नयननन्दन परिहरसि यदुग्रसंपर्कम् ॥ ७४६ ॥

---

१. खटकामुखो हस्तविन्यासविशेषो भरतशास्त्रप्रसिद्धः. २. 'सदनुरक्त' इति सुभाषितावलिमुद्रितपाठस्तु छन्दोभङ्गदूषितः. ३. शिवादित्यर्थः.

इदमपरमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य ।
वृद्धिर्भवति न हानिर्यत्तव सौभाग्यकोषस्य ॥ ७४७ ॥
अपरं विस्मयजननं धवलत्वं नोपयाति यद्भवतः ।
ललनालोचनकुवलयदलत्विषा शबलितस्यापि (?) ॥ ७४८ ॥
हृदयेषु कामिनीनामेकोऽनेकेषु वससि येन त्वम् ।
जनकः कुसुमास्त्रभृतस्तेन त्वं विश्वरूपोऽसि ॥ ७४९ ॥
किं वहसि वृथा गर्वं प्रियोऽहमिति योषितां नराधीश ।
काङ्क्षन्ति स्म मुरारिं षोडशगोपीसहस्राणि ॥ ७५० ॥
कार्पण्येन ययाचे मखसमये यो बलिं हृषीकेशः ।
न स भवति समो भवता दानैकनिषण्णहृदयेन ॥ ७५१ ॥
भूमिभृतामुपरिस्थित उन्नतये सकलजीवलोकस्य ।
दृष्टः संतापहरो मेघवदासारदानदक्षस्त्वम् ॥ ७५२ ॥
बहुमार्गो भद्रयुतः कुस्मृतिपरो गोत्रभेदकरणपटुः ।
गङ्गाजलप्रवाहः पूज्यदिशा केवलं तव समानः ॥ ७५३ ॥
दुर्व्यवहारोत्पत्तिर्मौग्ध्यप्रसरो विवेकिताप्रसहः ।
एकस्त्वं दोषज्ञः कृतीकृतो येन कलिकालः ॥ ७५४ ॥
सुगतोऽपि नाजिविमुखो वृषध्वजोऽपि न विषादितायुक्तः ।
उद्यतशस्त्रोऽपि रिपौ [1]कथमसि संधासिको जातः (?) ॥ ७५५ ॥
सन्मणिरर्थकभोगो गुरुतारहः स्थिरात्मता स्थाने (?) ।
नरदेव चित्रमेतद्यदशेषगुणैस्त्वमाश्लिष्टः ॥ ७५६ ॥
प्रकृतिलघोर्येन कृता जघन्यवर्णस्य गौरवापत्तिः ।
जघनचपला [2]यदार्या स पिङ्गलस्ते कथं तुल्यः ॥ ७५७ ॥
कस्य न जातिर्नात्मा नात्मज्ञानं न मानसे [3]प्रशमः ।
भवसि भवसार न त्वं केन द्वयवादिना सदृशः ॥ ७५८ ॥
तत्रापि वृद्धियोगस्तस्मिन्नपि पुरुषगुणगणस्योक्तिः ।
परिभाषा तत्रापि व्याकरणान्नातिरिच्यते तेन ॥ ७५९ ॥

---

१. 'कथमपि' इति पा०. २. 'अपि चार्या' इति पा०. ३. 'प्रेम' इति पा०.

निर्व्याजस्तवनोऽपि त्यक्ताक्षेपोऽपि निरुपमानोऽपि ।
संज्ञापकजातिगुणैर्नाथ त्वं गामलं कुरुषे ॥ ७६० ॥
अन्यैव वर्णनैषा दूराल्लोकान्तरास्थिता कापि ।
वामो यथैव शत्रुषु मित्रेषु तथैव वामोऽसि ॥ ७६१ ॥
पूजयसि येन गुरुजनमभिनन्दसि येन साधुचरितानि ।
प्रीणयसि येन विप्रान्नृपनन्दन तेन वृषभस्त्वम् ॥ ७६२ ॥
दैन्यमिदं यच्छ्लाघा क्रियते ते रक्षसापि न समस्य ।
न स बलमकरोद्योषिति भवांस्तु भुङ्क्ते प्रसह्य रिपुलक्ष्मीम् ॥७६३॥
[1]लावणिका चाटुवचस्तवनं [2]पल्लाभहेतुरस्माकम् ।
उत्पातितिस्वरूपे [3]यां नीतः सन्तु सो स्वामी (?) ॥ ७६४ ॥
श्रुत्वोत्तरमवदत्तं बन्दिनमभिनन्द्य साधुवादेन ।
अस्ति किमाकुलता ते यास्यसि तुष्टो मया प्रहितः ॥ ७६५ ॥
पुनरपि पठ तद्युगलं गीतिकया यत्पुरा पठितम् ।
कक्षान्तरितेन मम स्थितस्य कुलपुत्रिकारामे ॥ ७६६ ॥
त्वयि वदति साधुवादं वागियमुन्मुद्रिता बुधसमाजे ।
अभिधायेति पपाठ त्रिस्थानविशुद्धनादेन ॥ ७६७ ॥
एका खण्डनकुपिता विरसान्या गेयभङ्गवैलक्ष्यात् ।
काचिन्निकटतरासनमप्राप्य बिभर्ति निर्वेदम् ॥ ७६८ ॥
अन्या कलहान्तरिता नवपरिणयलज्जया परा सहिता ।
रमणीगणमध्यगतः [4]स्मरातुरः किं करोतु बहुजानिः ॥७६९॥(संदानितकम्)
अभ्युपपत्त्यवबोधकमस्तक[5]चलनं विधाय विकृतभ्रूः ।
नृत्याचार्यमवादीदेतस्मिन्किं नु संगीतम् ॥ ७७० ॥
सोवाच[6]जंतवो वणिग्जने नेतरोपत्रपात्राणि ।
गाथायनं [7]दासास्ये तत्र कुतः सौष्ठवं नाट्ये (?) ॥ ७७१ ॥

---

१. 'रामणिका' इति पा०. २. 'नयनाल्लोभ–' इति पा०. ३. 'यानीनः सन्तु सौ-खानि' इति पा०. ४. 'स्मरातुरोऽपि' इति पा०. ५. 'वलनम्' इति पा०. ६. 'ततो ववणिजौते नेतरो' इति पा०. ७. 'दास्यम्' इति पा०.

काचिद्वलिना क्रान्ता काचिन्न जहाति कामिनं रुचिरम् ।
अन्या पानकगोष्ठ्यां नयति दिनं प्रीतकैः सार्धम् ॥ ७७२ ॥
नोत्सृजति सततमेका पुरुषागमनाशया गृहद्वारम् ।
शूलपालः कथयति लब्धोत्कोचो रजस्वलामपराम् ॥ ७७३ ॥
रङ्गगतापि क्षुद्रा शृणोति यत्परिचितं गृहायातम् ।
उद्दिश्य चापि कार्यं व्रजति ततः प्रकृतमुत्सृज्य ॥ ७७४ ॥
आतारुण्योद्भेदात्कान्ते दृष्टिर्यथा न्यस्ता ।
सामाजिकमध्यस्था कथमन्या समुपयाति परभागम् ॥ ७७५ ॥
चेतोन्तरा स सत्त्वं सत्त्वे सति चारुता प्रयोगस्य ।
न भवति सा वेश्यानामल्पापि पुरुषहृतहृदयानाम् (?) ॥ ७७६ ॥
वयमपि देवनिकेतनमनङ्गहर्षे गते त्रिदिवलोकम् ।
अश्रितवन्तो गत्वा तीर्थस्थानानुरोधेन ॥ ७७७ ॥
इह तु कदाचित्किंचिद्वृत्ति निरोधाभिशङ्कया निरुत्साहा ।
रत्नावल्यामेता विदधति करपादविक्षेपम् ॥ ७७८ ॥
[1]वत्सेश्वरभूमिकयोर्द्वयमनुकुरुते नरेश्वर वयस्यः ।
वासवदत्ताद्वितयप्रयोगमेषा[2] विडम्बयति ॥ ७७९ ॥
[3]श्वसमादिष्वेवं शोभातिशयेन मदनुबन्धेन (?) ।
अनया प्रसिद्धिराप्ता सिंहलराजात्मजानुकृतौ ॥ ७८० ॥
विविधस्थानकरचनापरिक्रमं गात्रवलनलालित्यम् ।
काकुविभक्तार्थगिरो रसपुष्टिं वासनास्थैर्यम् ॥ ७८१ ॥
सात्त्विकभावोन्मीलनमभिनयमनुरूपवर्तनाभरणम् ।
मिश्रामिश्रे नाट्ये लयच्युतिं वर्णयेच्च मञ्जर्याः ॥ ७८२ ॥
एषाभिधानकीर्तनगुणितस्वशरीरकुसुमशररोषा ।
सहसोद्भिन्नमनोभवभावदशा सिन्दुवारविवरेण ॥ ७८३ ॥

---

१. इतः प्रभृति श्रीहर्षदेवकृतरत्नावलीनाटिकावर्णनम्. २. 'एषो' इति पा०. ३. 'उच्चसमादित्येव वशाच्छोभा–' इति पा०.

पश्यन्ती वत्सेश्वरमनुकार्याकृतिरमन्दपरितोषम्[1] ।
साधुध्वनिमुखराननसामाजिकजनमनःसु विदधाति ॥ ७८४ ॥ (युगलकम्)

वत्सपतिमालिखन्ती कामावस्थाक्रमेण भजमाना ।
वेपथुपुलकस्वेदैरावहति विसंष्ठुलं हस्तम् ॥ ७८५ ॥

सदृशेऽप्यनुभावगणे करुणरसं विप्रलम्भतो भिन्नम् ।
दर्शयति निरभिकाङ्क्षितसौख्यं[2] ननु गोचरापन्ना ॥ ७८६ ॥

अस्मिन्दर्शयतीत्थं मञ्जरिकां साभिलाषमवलोक्य ।
पस्पर्श राजपुत्रः किमु[3] मामिति वेत्रदण्डेन ॥ ७८७ ॥

बुद्ध्वाथ तस्य भावं संशमयन्[4]युवतिसंकथाकेलिम् ।
न्यक्कुर्वन्वारवधूः सचिवः प्रशशंस बन्धकीगमनम्[5] ॥ ७८८ ॥

दाररतिः संततये व्याधिप्रशमाय[6] चेटिकाश्लेषः ।
तत्खलु सुरतं सुरतं कृच्छ्रप्राप्यं यदन्यनारीषु ॥ ७८९ ॥

स्वव्यापारैकमतिः परवित्तार्था न काचिदप्यस्ति ।
पश्यन्त्यास्त्वामीदृशमद्य तु मे मानसं व्यथितम् ॥ ७९० ॥

यदि वेद्मि तस्य वसतिं सामर्थ्यं यदि भवेत्ततोऽप्यधिकम् ।
तद्गत्वा दग्धविधिं न शुभैः (?) संचूर्णयाम्यधुना ॥ ७९१ ॥

वपुरिदमनुपममीदृग्यदि विहितं तेन[7] ते धात्रा ।
अधुनापि रमणविरहात्किमिति कृतं वन्ध्यजन्मफलम् ॥ ७९२ ॥

शैशवमस्तु जरा वा व्याधिर्बाह्येन्द्रियप्रणाशो वा ।
आकाराज्ञारुण्यं (?) न तु कुपति कदर्थनाग्रहस्तम् ॥ ७९३ ॥

केलिः प्रदहति मज्ञः[8] शृङ्गारोऽस्थीनि चाटवः[9] प्राणान् ।
न करोति मनस्तुष्टिं दानमभव्यस्य गृहभर्तुः ॥ ७९४ ॥

कुत आगतासि कस्मिन्वेलामियतीं स्थिता किमर्थमिति ।
पृच्छन्नस्वस्थमना जनयति [10]रोगी शिरःशूलम् ॥ ७९५ ॥

---

१. 'परिपोषम्' इति; 'परिमोषम्' इति च पा०. २. 'सत्त्वम्' इति पा०. ३. 'किमसाविति' इति पा०. ४. 'प्रसारयन्' इति पा०. ५. 'वञ्चकागमनम्' इति पा०. ६. 'कण्डूप्रशमाय' इति लोकप्रसिद्धः पाठः. ७. 'ते हि ते' इति पा०. ८. 'लज्जाम्' इति पा०. ९. 'कटवः' इति पा०. १०. 'गेही' इति पा०.

यदि भवति दैवयोगाच्चक्षुर्विषयः समुज्ज्वलस्तरुणः।
तत्रात्मानं कृशयति जायां च रटन्गृहस्वामी ॥ ७९६ ॥

सविवादे परलोके जनापवादे च जगति बहुवादे।
दैवाधीने प्रणये न विदग्धा हारयन्ति तारुण्यम् ॥ ७९७ ॥

दुर्भर्तृकरास्फालनमलिनीक्रियमाणशोभमनुदिवसम्।
तुङ्गमपि पतितकल्पं स्तनशालिनि तत्पयोधरद्वन्द्वम् ॥ ७९८ ॥

पर्यङ्कः स्वास्तरणः पतिरनुकूलो मनोहरं सदनम्।
तुलयति नहि [1]लक्षांशं त्वरितक्षणचौर्यसुरतस्य ॥ ७९९ ॥

सहसा संकटवर्त्मन्यवितर्कितसंमुखागतेनापि।
अभिलषितेनो[2]द्धृष्टकमनन्यशुभकर्मणा लभ्यम् ॥ ८०० ॥

[3]प्रीतिः किल निरतिशया [4]नेर्दुः (?) परलोकचिन्तकै[5]र्गदिता।
तस्यास्तु जन्मलाभो हृदयेप्सितपुरुषसंयोगात् ॥ ८०१ ॥

[6]अतटस्थस्वादुफलग्रहणव्यवसायनिश्चयो येषाम्।
ते शोकक्लेशरुजां केवलमुपयान्ति पात्रतां मन्दाः ॥ ८०२ ॥

किं प्रतिकूला ग्रहगतिरुत परिणतमात्मदुश्चरितम्।
स्वानुष्ठानव्यसनं किं वा तस्यात्मयोनिहतकस्य ॥ ८०३ ॥

येन वरस्त्रीषु [7]युवा स्तौति शरीरं त्वदङ्गसंस्पृष्टम्।
त्वत्पादाक्रान्तभुवे स्पृहयति ककुभं त्वदीप्सितां नमति ॥ ८०४ ॥

ध्यायति युष्मद्रूपं त्वन्नामकमन्त्रमालिकां जपति।
एकात्मीकृतचेतास्त्वदङ्गतः सौख्यसिद्धिमभिकाङ्क्षन् ॥ ८०५ ॥

(अन्तर्युगलकम्)

[8]उत्सृज्य सकलकार्यं तिर्यग्ग्रीवं विलोकयन्[9]भवति।
कुरुते गृहाग्ररथ्यां यातायातैः शतावर्ताम् ॥ ८०६ ॥

---

१. 'संकाशं' इति पा०. २. उद्धृष्टकमालिङ्गनविशेषो वात्स्यायनादिकामशास्त्रप्रसिद्धः. ३. 'नीतिः' इति पा०. ४. 'न्नेदुः' इति पा०. ५. 'गदितः' इति पा०. ६. 'प्रपातस्त्वतटो भृगुः' इत्यमरः. ७. 'स युवा' इति पा०. ८. 'उत्सृष्ट' इति पा०. ९. 'अवति' इति पा०.

दृष्टोऽसि तया सुचिरं गेहाभ्याशे परिभ्रमन्स्पृहया ।
संदेश एष दत्तः प्राभृतमेतत्त्वया[1] दत्तम् ॥ ८०७ ॥
शुष्यति सालभमाना भवत्कृते वेश्मनिर्गमावसरम् ।
इति चतुरशठस्त्रीभिर्विलुप्यते त्वदपदेशेन ॥ ८०८ ॥ (अन्तर्युगलकम्)
किं वा कथितैरधिकैरस्थानाविष्टचेतसस्तस्याः[2] ।
अनुतिष्ठ यथायुक्तं शोभा[3] शठ जीवरक्षा च ॥ ८०९ ॥
(दूतीवचनं महाकुलकम्)
कुलपतनं जनगर्हां नरकगतिं प्राणितव्यसंदेहम् ।
अङ्गीकरोति तत्क्षणमबला परपुरुषमभियान्ती ॥ ८१० ॥
स तु लिखति दासपत्रं त्यजति कुटुम्बं ददाति सर्वं[4] च ।
यावन्न भवति पुरतः परयुवतिः प्रोज्झितावरणा[5] ॥ ८११ ॥
दृष्टं यद्द्रष्टव्यं व्यपयातं कौतुकं विदितमन्तः ।
इति याति मनसि कृत्वा विहितविधेयस्ततस्तूर्णम् ॥ ८१२ ॥
सापि च्छिन्नाच्छोटनगृहीतमुक्ता विलोकयन्त्याशाः ।
विशति गृहं संत्रस्ता सर्वत आशङ्किता सवैलक्ष्यम् ॥ ८१३ ॥
नवचारित्रभ्रंशा सुरचितकुलटोदितेषु नो निपुणा ।
पृष्टा क्व गतासि त्वं न क्वचिदिति संभ्रमाद्ब्रूते ॥ ८१४ ॥
मितदोषे बहुरोषाः पुरुषा अपि चपलकौतुकप्रायाः ।
त्वं च ग्रहेण लग्ना कार्यविमूढात्र तिष्ठामि ॥ ८१५ ॥
इति दोलायितहृदया स्थिरीकृता न्यस्तकर्मणा दूत्या ।
दृष्टाभिशङ्कमाना पदे पदे चलति पर्णेऽपि ॥ ८१६ ॥
अनुदिक्षु विक्षिपन्ती पदे पदे चकिततरलिते नेत्रे ।
प्राप्ता संकेतभुवं शतगुणितमनोरथाकृष्टा ॥ ८१७ ॥
भयशृङ्गारव्रीडामिश्रीभूतानुभावसंदेहम् ।
जनयन्ती[6] लोलांशुकधृतकृतिकृष्टा सकुचनाभिः ॥ ८१८ ॥

---

१. 'त्वया' इति पा०. २. 'तस्य' इति पा०. ३. 'त्वन्नोना शश्वत्' इति पा०.
४. 'सर्वस्वम्' इति पा०. ५. 'चरणा' इति पा०. ६. 'जनयंल्लोलांशुक—' इति पा०.

नीवीश्लथनारम्भे निरुन्धती तं न यामि यामीति ।
निहि[1]तास्फुटाभिधानैः पल्लवयन्ती स्मरस्य कर्तव्यम् ॥ ८१९ ॥
नयतीवालेर्विनयं (?) ग्रसमाने वार्धसर्वगात्राणि ।
संश्लिष्यतेऽन्ययोषा तिक्तं तस्यामृतं पुरतः ॥ ८२० ॥
(नायिकावचनमहाकुलकम्)

न कृतं तव रहसि पुरो वा तो वा विवृतकं[2]म्पया वाचा (?) ।
गेहस्वामितिरस्कृतिनिष्पादितदुःखवेगनिर्वहणम् ॥ ८२१ ॥
उपधानीकृत्य भुजावन्योन्यं निर्विशङ्कमावाभ्याम् ।
सं[3]वरितोरु न सुप्तं शिथिलाङ्गं रतिविमर्दखिन्नाभ्याम् ॥ ८२२ ॥
आत्मगृहादानीतं प्रच्छाद्य स्वादुभोजनं विजने ।
स्वकरेण मया दत्तं निर्वृतहृदयेन नाँ[4]शितं भवता ॥ ८२३ ॥
न कृता चरित्ररक्षा न च भुक्तं मच्छरीरपर्यन्तम् ।
दृष्टादृष्टभ्रष्टा क्व यामि किं वा करोमि दुर्जाता ॥ ८२४ ॥
अवगुण्ठननयविरतिं (?) स्वैरालापं च मन्दसंचारम् ।
संप्रति मम पापायाः करपिहितमुखा हसन्ति तत्त्वज्ञाः ॥ ८२५ ॥
यासामासीत्सख्यं मया समं समवयःकुलस्त्रीणाम् ।
ता वारयन्ति मत्तः कुसंगतिं तन्नियन्तारः ॥ ८२६ ॥
धिग्वादान्परिजनतः सहमाना मुहुरथाप्यधोवदना ।
तिष्ठामि निरभिमाना निजनिर्मितदोषदौर्बल्यात् ॥ ८२७ ॥
सद्भिर्विधीयमानं प्रसङ्गपतितं पतिव्रतास्तवनम् ।
हृदयेन दूयमाना मूढा सीदामि शृण्वन्ती ॥ ८२८ ॥
आसन्न उपविशन्तीं मां दाक्षिण्यान्नियन्तुमसमर्थाः ।
अन्योन्यमीक्षमाणा ज्ञातिजनाः संकुचन्ति भुञ्जानाः ॥ ८२९ ॥
प्रकटीकृतास्त्वयैवं क्षणमात्रमुमुञ्चता गृहोपान्तम् ।
अस्मान्सुदृशां मध्ये प्रेमस्निग्धाननुद्धरता ॥ ८३० ॥

---

१. 'निहता' इति पा०. २. 'कण्ठया' इति पा०. ३. 'संछादितोरु' इति पा०.
४. न अशितं न भुक्तमित्यर्थः.

परगृहविनाशपिशुनाः सुभगंमन्याभिरूपकृतदर्पाः ।
कृकलासतुल्यभागा भवन्ति युष्मद्विधा एव ॥ ८३१ ॥
अनभीष्टव्यवहारप्रभवरुषा पीडिताक्षरा इत्थम् ।
सोपालम्भा वचनं (?) धन्याः शृण्वन्ति बन्धकीवाचः ॥८३२॥ (कुलकम्)
परतरुणीसंभारस्नेहार्पितनयनभागदृष्टस्य ।
वेश्यारचितविलासाः कथिताः पुरतः पुराणतृणकल्पाः ॥ ८३३ ॥
उपनयति रतिमहोत्सवमाराधितदेवताविशेषाणाम् ।
वचनमपि प्रेमार्द्रं स्वैरिण्याः श्रवणमेति पुण्यवताम् ॥ ८३४ ॥
का गणना विषयवशे पुंसि वराके वराङ्गनास्पृहया ।
व्याजेन वीक्षमाणा ध्यानधियां स्पृशति सज्ज्ञानम् ॥ ८३५ ॥
शिरसा रचिताञ्जलयो दधति निदेशं त्रिविष्टपे गणिकाः ।
परदाररसाकृष्टस्तथापि भेजे शचीपतिरहल्याम् ॥ ८३६ ॥
अप्सरसः किं न वशा वैदग्ध्यवतां च किं न धौरेयः ।
येन चकारासक्तिं गोविन्दो गोपदारेषु ॥ ८३७ ॥
त्रैलोक्यगता वेश्याः स्वाधीना यातुधानस्य ।
तदपि जहार कलत्रं दशरथतनयस्य रामभद्रस्य[1] ॥ ८३८ ॥
अथ मञ्जर्या जननी निजपक्षसमर्थने कृतोत्साहा ।
आक्षेप्तुमाचचक्षे नृपसुतसचिवाश्रितां वाचम् ॥ ८३९ ॥
घटयुवतिषु प्रगल्भः सागरिकादशनहृतपुंस्त्वः ।
ग्रामोषितोऽविदग्धो निन्दति गणिकां भवद्विधोऽवश्यम् ॥८४०॥
नार्दयति मनः पुंसामवगाहितमीनकेतुना स्त्रीणाम् ।
नखदशनक्षतहीनं जीवत्पतिबन्धकीसुरतम् ॥ ८४१ ॥
स्थापय घटकं तावत्कुरु भूमितले तृणैः समास्तरणम् ।
सुरतोपक्रम ईदृग्ग्रामीणकतरुणमिथुनानाम् ॥ ८४२ ॥
बहलोशीरविलुप्तस्थितजूटककरुणमल्लिकामाल्यः ।
पामरनार्या दृष्टः स्मरोऽहमिति मन्यते विटग्राम्यः ॥ ८४३ ॥

---

१. 'रामदेवस्य' इति पा०.

गृहकर्मकृतायासां प्रस्विन्नां सलिलकार्यनिर्याताम्।
उपपतिरुपैति हर्षान्निशागमे पामरीं प्राप्य ॥ ८४४ ॥
कूपक्षिप्तघटाया नार्यास्तत्काष्ठनिहितचरणायाः।
वलितग्रीवं वीक्षितमुन्नमति ग्रामवासिनो यूनः ॥ ८४५ ॥
लग्नोऽसि यत्र गात्रे कथमपि दैवेन देवयात्रायाम्।
अद्यापि तन्न मुञ्चति पुलकोद्गमकण्टकं तस्याः ॥ ८४६ ॥
उच्चैतुं कार्पासं प्रविष्टया शून्यवाटिकागहनम्।
टंकारितेन संज्ञा कृता तया त्वं च वेत्सि नो मूर्खः ॥ ८४७ ॥
आलिङ्गितमुसलायास्त्वय्येव निविष्टचेतसस्तस्याः।
आवृत्त्या भ्रमति पुरो जातः खलु शालिकण्डने[1] विघ्नः ॥ ८४८ ॥
त्वां लोष्टमाक्षिपन्तं पार्श्वस्थैः स्तूयमानसामर्थ्यम्।
गृहकर्तव्यं त्यक्त्वा पश्यति सा द्वाररन्ध्रेण ॥ ८४९ ॥
त्वयि मार्गनिकटवर्तिन्यविचेतितखेदया तया सुभग।
प्रत्यासन्नगृहेष्वपि कृतः प्रसह्य स्मरातुरो लोकः ॥ ८५० ॥
इति चतुरदूतिकोदित उपचितसौभाग्यगर्वपूर्णस्य।
ऊर्मिसहस्रोल्लसितं भवति मनो ग्राम्यखिङ्गस्य ॥ ८५१ ॥
विनिर्वाय तत्प्रवर्तितवाच्यविकासं नतोत्तमाङ्गेन।
श्रीसिंहभटस्य सुतः समुवाच वचोऽथ नर्तकाचार्यम् ॥ ८५२ ॥
नायकभूमौ भवतः कुशीलवाः कोहलादयो मुनयः।
अप्सरसः स्त्रीलास्ये गान्धर्वे कमलजन्मनस्तनयः ॥ ८५३ ॥
सुषिरस्वरप्रयोगे प्रतिपादनपण्डितो मतङ्गमुनिः।
यदि रञ्जयति भवतो भूमिं स्पृशतां[2] कुतः शक्तिः ॥ ८५४ ॥
अभ्यधिकं धृष्टत्वं प्रायेण हि शिल्पजीविनो[3] भवति।
आश्रितनर्तकवृत्तेर्विशेषतो विजितरङ्गस्य ॥ ८५५ ॥
विज्ञापयाम्यतस्त्वां नरेन्द्रनाट्यप्रजासदृशम्।
अवलोकयाङ्कमेकं मा भवतु मम श्रमो वन्ध्यः ॥ ८५६ ॥

---

१. 'खण्डने' इति पा०. २. 'स्पृशतः' इति पा०. ३. 'जीविताम्' इति पा०.

इति कथयन्नरभर्तुः पुत्रेण स चोदितो भुवोन्नतया ।
रचिते सकलातोद्ये नियोजयामास स प्रकृतम्[1] ॥ ८५७ ॥

वांशिकदत्तकस्थानकतद्भावितभिन्नपञ्चमे सम्यक् ।
प्रावेशिक्यवसाने द्विपदीग्रहणान्तरे विशति सूत्रीम् ॥ ८५८ ॥

उत्साहभावयुक्तः सामाजिकहृदयरञ्जनं कुर्वन् ।
कविनैपुणवत्सेश्वरचरितस्य विधेयदाक्ष्यसामग्र्या ॥ ८५९ ॥

अष्टकलापरिमाणां ध्रुवां च परिकल्प्य तानलययुक्ताम् ।
आहूय नटीं कृत्वा तया समं स्वगृहकार्यसंलापम् ॥ ८६० ॥

सूचितपात्रागमनः किंचिद्गत्वा पदानि निपुणानि ।
निश्चक्राम गृहिण्या सार्धं निःसरणगीतेन ॥ ८६१ ॥

आश्रित्य पदोद्घातं प्रविवेश ततः सविस्मयोऽमात्यः[3] ।
दुर्घटघटनेन क्षितिनाथस्योदयं नमुद्दिश्य (?) ॥ ८६२ ॥

प्रासादमारुहन्तं कुसुमायुधपर्वचर्चरीं द्रष्टुम् ।
निर्दिश्य वत्सराजं समनन्तरकार्यसिद्धये निरगात् ॥ ८६३ ॥

विस्मयति स्म नरेन्द्रः प्रासादगतः समं वयस्येन ।
अवलोकयन्प्रगाढं समुदितचेताः स्वसैन्यसंपत्त्या ॥ ८६४ ॥

विस्मयभावाक्रुष्टः प्रोत्फुल्लविलोचने ततो विसृजन् ।
नृत्यति पौरजनौघे प्रोवाच वयस्य पश्येति ॥ ८६५ ॥

तुल्यशिशुतरुणवृद्धं समगुप्तागुप्तयुवतिसविचेष्टम् ।
अगणितवाच्यावाच्यं क्रीडन्ति जनाः प्रवृद्धहर्षेण ॥ ८६६ ॥

पिष्टातकपिञ्जरितं रुचिरोच्छ्रितविविधकुसुमनिर्यूहम् ।
गात्रायाससमुत्थितबहुनिःश्वासप्रकीर्णपटवासम् ॥ ८६७ ॥

तूर्यरवव्यामिश्रितकरतालैरनुजनं प्रनृत्यन्तम् ।
मुहुरुपवत्सवलनं संदर्शितदार्ढ्यसौष्ठवं सुचिरम् (?) ॥ ८६८ ॥

---

१. 'प्राभृतम्' इति पा०. २. इतः प्रभृति श्रीहर्षदेवकृतरत्नावलीनाटिकानुकूलनाट्यवर्णनम्. ३. अमात्यो यौगन्धरायण इत्यर्थः.

अस्तु वसन्तः सततं स्वाधीनाभीष्टजनसमाश्लेषात् ।
इति गायन्ती रभसादालिङ्गति मदवशात्तरुणी ॥ ८६९ ॥
क्रीडन्त्या श्रमरहितं शृङ्गकसलिलेन ताडितस्तरुणः ।
सीमन्तिन्या गायति हृष्टात्मा सुभगमात्मानम् ॥ ८७० ॥
भग्ने लज्जासेतौ पर्वावसरेण कुलवधूवदनात् ।
अग्लानोक्तिजलौघो निर्यातः केन वार्यते प्रसरन् ॥ ८७१ ॥
तुल्यव्यापारगिरां ललनानां देवनप्रसक्तानाम् ।
आर्यानार्यावगमं मदनावृतिजापिका कुरुते ॥ ८७२ ॥
अथ सहचरनिर्दिष्टे मदंघ्ररणघटितानिनयना (?) ।
वासवदत्ताप्रहिते नृत्यन्त्यौ प्रविशतश्चेट्यौ ॥ ८७३ ॥
दर्शितसरोजवर्तनगात्राभिनये शरेक्षिनेतव्ये (?) ।
निदधाने वीरदशामायुधमात्रां समाश्रित्य ॥ ८७४ ॥
चलितनयनवृत्तिः कौतुकहृतमानसो नराधिपतिः (?) ।
निजगाद निर्भरमहो क्रीडितमनयोर्विलासिन्योः ॥ ८७५ ॥
करपीडनोपमर्दव्यतिकरसमकदर्थ्यमानोऽपि ।
स्तनमण्डले स्थितोऽहं त्वं पुनराकृष्य कुत्रचित्क्षिप्तः(?)॥ ८७६ ॥
अधुना त्वरयसि मामिति कोपादिव वाणवारमभिरामाम् ।
वर्णचित्रपदन्यासैर्वदन्त्याहन्तिहार उच्छलितः ॥ ८७७ ॥
चूतलताधम्मिल्लस्थानच्युतशेखरेन्दवे श्लाघ्यम् ।
अधृतपतनिर्यूहं न च समदनिकां वाणीम् ॥ ८७८ ॥
स्तनभारावनतस्य प्रतनोर्मध्यस्य नास्ति तेऽपेक्षा ।
इत्थमिव पादलग्नौ क्रीडन्त्या नूपुरौ रसतः ॥ ८७९ ॥
वहति स यानि तत्त्वं सपाणिकृच्छ्रेण मन्दसंचारम् ।
कलयति तन्नूनमयं जयति मनोजन्मनो महिमा ॥ ८८० ॥

---

१ अतीवाशुद्धमेतत्सर्वम्, पुस्तकद्वये समानं च.

उदयनसमनुज्ञातो नयमन्तर्न वसन्तकोऽपि मुदितात्मा ।
दास्योन्नयाभिरामं चर्चरिकार्धेन तन्मध्ये ॥ ८८१ ॥
धीरोद्धतललितपरैः क्रीडित्वा ते चिराय नरनाथम् ।
प्रद्योतस्य सुतायाः संदेशमथोचतुः समुपगम्य ॥ ८८२ ॥
आदिशति देव देवीत्यर्धोक्ते सलज्जमन्योन्यम् ।
अवलोक्य मुखं नहि नहि विज्ञापयति प्रणम्य विनयेन ॥ ८८३ ॥
मकरध्वजस्य पूजां त्वत्पादसरोजसंनिधौ कर्तुम् ।
पृथिवीमण्डलमण्डन समीहते मे मनोवृत्तिः ॥ ८८४ ॥
प्रियरतिभोगो मदनो दयितवसन्तो मदसिवसनाम् ।
भावेन भवान्सृष्टो लोकस्थित्या नु कुसुमशरपाणिः ॥ ८८५ ॥
इति दत्त्वा संदेशं प्रकृतिवयःकालसमुचितं [1]भ्रान्त्वा ।
ते मदमदनाविष्टे बभूवतुर्जवनिकान्तरिते ॥ ८८६ ॥
अपनीततिरस्करिणी ततोऽभवन्नृपसुता समं चेट्या ।
अविदितरत्नावल्या पूजोदितवस्तुहस्तयानुगता ॥ ८८७ ॥
अथ बुद्ध्वा सागरिकां प्रमादतः परिजनस्य निन्दित्वा ।
काञ्चनमालामवदन्नृपमहिषी जातसंक्षोभा ॥ ८८८ ॥
प्रेषय कन्यामेनामवरोधं त्वं गृहाण कुसुमादि ।
यावन्न भवति विषये वीक्षणयोर्भूमिनाथस्य ॥ ८८९ ॥
उपगम्य ततश्चेटी तामभ्यवदत्किमर्थमायाता ।
[2]मेधाविनीं विमुच्य व्रज तस्मिन्मा विलम्बस्व ॥ ८९० ॥
विहिते देव्यादेशे मनसीदं संविधाय सा तस्थौ ।
विहगी सुसंगताया हस्ते दत्ता मनोभवसपर्याम् ॥ ८९१ ॥

---

१. 'कृत्वा अञ्जलिमद्याविष्टे' इति पा०. २. मेधाविनी नाम काचित्सारिका रत्नावल्यां प्रसिद्धा.

अवलोकयामि तावत्तिरोहिता सिन्दुवारविटपेन ।
तातान्तःपुरिकाभिर्यथार्च्यते किं तथैतदुत नेति ॥ ८९२ ॥
पिण्डीकृतमिव रागं हृच्छयमिव लब्धविग्रहोत्कर्षम् ।
समुपेत्य वत्सराजं जगाद सा जयति देव इति ॥ ८९३ ॥
परिभुक्तमपि नवत्वं शृङ्गाररसं मदनपर्वणा नीतम् ।
भजमानो भजमानां स्वागतवचसाभिनन्द्य तामूचे ॥ ८९४ ॥
भर्गविलोचनपावकदाहात्यधिकां मनोभवो मन्ये ।
प्राप्स्यति तव करसंगमसुखविरहसमुत्थितां पीडाम् ॥ ८९५ ॥
सा मन्मथमभ्यर्च्य क्षितिनाथं तदनु साधिकं तस्याम् ।
परमां मुदं वहन्त्यां विग्रहवन्मनसि कन्यायाम् ॥ ८९६ ॥
शृङ्गाररससमुद्रं सोत्कलिकं निपतिते तथा नृपतौ ।
तारमधुरस्फुटार्थं नग्नाचार्यः पपाठ नेपथ्ये ॥ ८९७ ॥
नयनानन्दमखण्डितमण्डलमभिराममसृतरश्मिमिव[1] ।
सायंतन आस्थाने क्षितिपतयः सन्त्युदयनं द्रष्टुम् ॥ ८९८ ॥
उच्चारितेऽन्यनाम्नि त्रिदशपतौ तत्क्षणाच्युतपदायाम् ।
उत्पन्नविस्मयपरा[2] मानं दधे नरभर्तुरात्मजा हृदये ॥ ८९९ ॥
अयमुदयनः[3] स राजा तातः सत्कृत्य मां ददौ यस्मिन् ।
हन्त परप्रेषणमपि न निष्फलं सांप्रतं जातम् ॥ ९०० ॥
यावन्न वेत्ति कश्चित्तावदितस्त्वरितमेव निर्यामि ।
इति कथमपि नायकतो हृत्वा दृशमुत्ससर्ज रङ्गभुवम् ॥ ९०१ ॥
कंदर्पमहमहोत्सवहृतहृदयैर्नावधारितोऽस्माभिः ।
संध्यातिक्रमकालः पश्य त्वं प्रियवयस्यक तथा हि ॥ ९०२ ॥
उदयनगान्तरितामियं[4] प्राची सूचयति दिङ् निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ ९०३ ॥

---

१. 'आखण्डलम्' इति पा०. २. 'परतिमि' इति पा०. ३. 'अथ उदयनः' इति पा०. ४. रत्नावलीस्थितैवेयमार्या गृहीता.

देवि त्वन्मुखपद्मं पद्मान्पिदधाति पश्य विच्छायान् ।
अलयोऽपि लज्जिता इव शनैः शनैस्तदुदरेषु लीयन्ते ॥ ९०४ ॥

एवमभिधाय चित्रैश्चरणन्यासैः परिक्रमं कृत्वा ।
निष्क्रामन्पादुकया विनिर्ययौ नायकोऽपि सह सर्वैः ॥ ९०५ ॥

अङ्के जातसमाप्तौ गीतातोद्यध्वनौ च विश्रान्ते ।
प्रेक्षणकगुणग्रहणं नृपसूनुः प्रववृते कर्तुम् ॥ ९०६ ॥

नाट्यप्रयोगतत्त्वे मतयो न विशन्ति मादृशां प्रायः ।
वाहनयानपदातिग्रामादिककार्यदत्तहृदयानाम् ॥ ९०७ ॥

आस्ते ह्यालिखितोऽयं गृहाण सर्वं प्रदेशबहुभूमिम् ।
वासय तत्रावासं भवसि ततन्नक्कुरो(?) दिवसैः ॥ ९०८ ॥

कृतजीवनसंस्थो हि त्वमपि किमर्थं करोषि विज्ञप्तिम् ।
अर्पय वा यदि नेच्छसि कुरु स्थितिं हस्तदानेन ॥ ९०९ ॥

न च पत्तयो न सप्तिर्न च पोष्यजनस्तथाप्यसंतुष्टः ।
लभमानेऽपि स दायं चिरंतनत्वाभिमानेन ॥ ९१० ॥

विज्ञप्तिकोन्मुखत्वं दूरत एवावधारितं भवतः ।
तूष्णीं क्रियतामस्माच्छ्रोष्यसि कार्यं प्रतीहारात् ॥ ९११ ॥

यूयं कुटुम्बमध्ये क्व गम्यते गोत्रपुत्रसामान्याः ।
आदाय संविभागं गृह एव स्थीयतां यथा सौख्यम् ॥ ९१२ ॥

अभ्यन्तरव्ययार्थेन विलम्बो यो महांस्तुङ्गः (?) ।
अत्रापि न न वचो मे नो जाने किं करोमीति ॥ ९१३ ॥

प्रथमं चरमविकल्पितमन्मपि कलजीवनप्रदेशस्थम् ।
अद्यापि ते न यातं नियोगितानां मदन्तरताम् ॥ ९१४ ॥

एवं प्रायैरनुदिनलाभोदयमोहकारिभिर्वचनैः ।
फलशून्यैरनुजीवी प्रतारितः कः कियत्कालम् ॥ ९१५ ॥

---

१. 'पिदधाति' इति पा०. २. अत्रैव रत्नावलीप्रथमाङ्कसमाप्तिः. ३. 'भवति न तस्य कुरो' इति पा०. ४. इतः प्रभृत्यशुद्धमस्ति पुस्तकद्वयेऽपि.

एतद्विषमं नैपुणमत्र तु भूमीभृतां समाश्रित्य ।
मुखरतया कथयामो जडमिव सामाजिकोचितं किंचित् ॥ ९१६ ॥

समाश्रयः स महात्मा सशरीरस्त्रिः प्रमाणपरिमाणे ।
यत्नाद्विलोक्य धृष्टो व्यस्तसमस्तैस्त्रिभिर्विनिष्पाद्यः ॥ ९१७ ॥

स्वर्गसाराधिक्यक्रियदुपरञ्जकरञ्जितो विविधवृत्तिः ।
आदाय त्वममर्त्यैर्भावः संपादितः प्रयोगोऽयम् ॥ ९१८ ॥

गम्भीरमधुरशब्दं परिबृंहितगीतविविधमङ्ग्युतम् ।
दर्शयते वैचित्र्यं तद्द्रथवाहकस्तलकालः ॥ ९१९ ॥

अविभक्ततद्यानम्य काकुपरस्यास्फुटापदम् ।
अभिरामाविश्रान्तं पठितं निरवद्यभाषासु ॥ ९२० ॥

नियमितदीपनगमनं द्रुतमध्यविलम्बि तानलययुक्तम् ।
तमवस्वगेययत्नं तत्साम्यं सादिभिर्विहितम् ॥ ९२१ ॥

प्रकृतिविशेषावस्थाप्रतिपादकवेषरचनसामग्र्या ।
अभिनयकरणे नीता सिद्धिद्वयसंपदाचारम् ॥ ९२२ ॥

नवसुरतैरुपदिष्टं क्षितिपतिजनुषावबोधकाराणाम् ।
ता अपि नाट्ये सर्वाः शोभासंदोहसादृशं नापुः ॥ ९२३ ॥

आश्लिष्टसंधिबन्धं सत्पात्रसुवर्णयोजितं सुतराम् ।
निपुणपरीक्षकदृष्टं राजति रत्नावलीरत्नम् ॥ ९२४ ॥

एवंविधगुणकथनं यसदादिविभावितार्थां तं पतये ।
पठति सार्यामन्यः स्मृतिविषयमुपागतां प्रसङ्गेन ॥ ९२५ ॥

संग्रामादनपसृतिः प्रेक्षाभिज्ञा सुभावनाभिरतिः ।
आच्छोटनाभियोगः कुलविद्या राजपुत्राणाम् ॥ ९२६ ॥

एतद्वस्तुनि जाते स्तुतिभाजां नृपतिनन्दनो रभसात् ।
आरभ्य कथाच्छेदकमाखेटं वा[1]·················· ॥ ९२७ ॥

---

१. एतावानेव ग्रन्थः प्राप्तः.

श्रीरुद्रभट्टकृतं[1]

शृङ्गारतिलकम् ।

प्रथमः परिच्छेदः ।

शृङ्गारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे
बीभत्सोऽस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने[2] च हसकृन्नग्नः प्रशान्तश्चिरा-
दित्थं सर्वरसाश्रयः[3] पशुपतिर्भूयात्सतां भूतये ॥ १ ॥

आख्यातनामरचनाचतुरस्रसंधि
सद्वागलंकृतिगुणं सरसं[4] सुवृत्तम् ।
आसेदुषामपि दिवं कविपुंगवानां
तिष्ठत्यखण्डमिह काव्यमयं शरीरम् ॥ २ ॥

काव्ये शुभेऽपि रचिते खलु नो खलेभ्यः
कश्चिद्गुणो भवति यद्यपि संप्रतीह[5] ।

---

१. अयं रुद्रभट्टः पञ्चतन्त्रसंग्रहकर्तुर्विष्णुशर्मणः प्राचीनः. यतः, अत्रत्यप्रथमपरिच्छेदस्थः 'सार्धं मनोरथशतैस्तव धूर्त कान्ता' इत्यादिश्लोकः पञ्चतन्त्रस्य लब्धप्रणाशनाम्नि चतुर्थे तन्त्रे वर्तते. विष्णुशर्मापि खिस्तसंवत्सरीयाष्टमशतकमध्यमागतो न प्राचीनः. यतः, कुट्टनीमतग्रन्थस्य 'पर्यङ्कः स्वास्तरणः' इत्याद्यार्या पञ्चतन्त्रस्य प्रथमे तन्त्रे दृश्यते. शृङ्गारतिलककर्ता रुद्रट इति तु बहूनां भ्रमः. केषुचित्पुस्तकेष्वपि तथैव लिखितमस्ति. किं तु ग्रन्थसमाप्तौ 'त्रिपुरवधादेव गतामुल्लासमुमां समस्तदेवनताम् । शृङ्गारतिलकविधिना पुनरपि रुद्रः प्रसाधयति ॥' इत्येतस्यामार्यायां शृङ्गारतिलककर्ता रुद्रः, न तु रुद्रटः, इति स्फुटमेव. केषुचित्पुस्तकेष्वियमार्या न वर्तते. अस्मल्लब्धेष्वतिप्राचीनपुस्तकेष्वस्त्येव. शृङ्गारतिलकटीकाकर्ता गोपालभट्टोऽपि टीकाप्रारम्भे 'आशीरूपं मङ्गलं निबध्नाति रुद्रकविः—शृङ्गारीति ।' इति वदति. तस्माद्रुद्र एव शृङ्गारतिलककर्तेति ज्ञेयम्. 'त्रिपुरवधादेव गताम्' इत्याद्यार्यया 'त्रिपुरवध'नामकः कोऽपि ग्रन्थो रुद्रभट्टेन कृत इत्यपि सूच्यते. शार्ङ्गधरपद्धति-सूक्तिमुक्तावलि-साहित्यदर्पणादिष्वपि शृङ्गारतिलकश्लोका लभ्यन्ते. गोपालभट्टकृता रसतरङ्गिण्याख्या शृङ्गारतिलकस्य व्याख्यापि वर्तते. सा चास्माभिः संपूर्णा न लब्धा. २. 'दक्षविमर्दनेन'. ३. 'सर्वरसात्मकः'. ४. 'सुरसम्'. ५. 'संप्रति यद्यपीह'.

कुर्यां तथापि सुजनार्थमिदं यतः किं
यूकाभयेन परिधानविमोक्षणं स्यात् ॥ ३ ॥

सानन्द[1]प्रमदाकटाक्षविशिखैर्येषां न भिन्नं मनो
यैः संसारसमुद्रपातविधुरेष्वन्येषु पोतायितम् ।
यैर्निःसीमसरस्वतीविलसितं द्वित्रैः पदैः संहृतं
तेषामप्युपरि स्फुरन्ति मतयः कस्यापि पुण्यात्मनः ॥ ४ ॥

प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः ।
यथामति मयाप्येषा काव्यं प्रति निगद्यते ॥ ५ ॥

यामिनीवेन्दुना मुक्ता नारीव रमणं विना ।
लक्ष्मीरिव ऋते त्यागान्नो वाणी भाति नीरसा ॥ ६ ॥

सत्यं सन्ति गृहे गृहे सुकवयो येषां वचश्चातुरी
स्वे हर्म्ये कुलकन्यकेव लभते जातैर्गुणैर्गौरवम् ।
दुष्प्रापः स तु कोऽपि कोविदपतिर्यद्वाग्रसग्राहिणां
पण्यस्त्रीव कलाकलापकुशला चेतांसि हर्तुं क्षमा ॥ ७ ॥

तस्माद्यत्नेन कर्तव्यं काव्यं रसनिरन्तरम् ।
अन्यथा शास्त्रविद्गोष्ठ्यां तत्स्यादुद्वेगदायकम् ॥ ८ ॥

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च नव का[2]व्ये रसाः स्मृताः ॥ ९ ॥

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥ १० ॥

निर्वेदोऽथ तथा ग्लानिः शङ्कासूया मदः श्रमः ।
आलस्यं चैव दैन्यं च चिन्ता मोहो धृतिः स्मृतिः ॥ ११ ॥

व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ १२ ॥

---

१. 'सानन्दम्'. २. 'नाट्ये'.

सुप्तं[1] प्रबोधोऽमर्षश्चाप्य[2]वहित्था तथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ १३ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदिमे भावाः प्रयान्ति च रसस्थितिम् ॥ १४ ॥
स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ १५ ॥
भावा एवातिसंपन्नाः प्रयान्ति रसताममी ।
यथा द्रव्याणि भिन्नानि मधुरादिरसात्मताम्[3] ॥ १६ ॥
संभवन्ति यथा वृक्षे पुष्पपत्रफलादयः ।
तद्वद्रसेऽपि रुचिरा विशेषा भावरूपिणः ॥ १७ ॥
प्रायो नैकरसं काव्यं किंचिदत्रोपलभ्यते ।
बाहुल्येन भवेद्यस्तु स तद्वृत्त्या निगद्यते ॥ १८ ॥
कै[4]शिक्यारभटी चैव सात्वती भारती तथा ।
चतस्रो वृत्तयो ज्ञेया रसावस्थानसू[5]चकाः ॥ १९ ॥
धर्मादर्थोऽर्थतः कामः कामात्सुखफलोदयः ।
साधीयानेष तत्सिद्ध्यै शृङ्गारो नायको रसः ॥ २० ॥
चेष्टा भवति पुंनार्योर्या रत्युत्थातिरक्तयोः ।
संयोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ॥ २१ ॥
संयुक्तयोश्च संयोगो विप्रलम्भो वियुक्तयोः ।
प्रच्छन्नश्च प्रकाशश्च पुनरेष द्विधा य[6]था ॥ २२ ॥

'मदनकुञ्जरकुम्भतटोपमे स्त[7]नयुगे परितः स्फुरिताङ्गुलिम् ।
सकरजक्षतवाममपि प्रिया दयितपाणिममन्यत दक्षिणम् ॥'

---

१. 'स्वप्नावबोधौ'; 'सुप्तं विबोध'. २. 'अवहित्थम्'. ३. अस्माच्छ्लोकादग्रे केषुचिन्मूलपुस्तकेष्वन्यच्छ्लोकद्वयं दृश्यते—'विभावेनाहितो योऽर्थस्त्वनुभावैश्च गम्यते । वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥ बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रिताः । अनेन यस्मात्तदयं विभाव इति संज्ञितः ॥'. ४. 'कौशिकी' इति केषुचित्पुस्तकेषु पाठः प्रामादिक एव. ५. 'सूचिकाः'. ६. 'मतः'. ७. 'कुचयुगे'.

'संतप्तः स्मरसंनिवेशविवशैः श्वासैर्मुहुः पञ्चमो-
द्वारावर्तिभिरापतद्भिरभितः सिक्तश्च नेत्राम्बुभिः ।
एतस्याः प्रियविप्रयोगविधुरस्त्यक्त्वाधरो रागितां
संप्रत्युद्धतवह्निवारिविषमं मन्ये व्रतं सेवते ॥'

'कान्ते विचित्रसुरते क्रमबद्धरागे
संकेतकेऽपि मृगशावदृशा रसेन ।
तत्कूजितं किमपि येन तदीयतल्पं
नाल्पैः परीतम[1]नुकूजितलावकौघैः ॥'

'किंचिद्वक्रितकण्ठकन्दलदलत्पीन[2]स्तनावर्तन-
व्यायामाञ्चितकञ्चुकं मृगदृशस्तस्यास्तदालोकितम् ।
वाचस्ताश्च विदग्ध[3]भावचतुराः स्फारीभवन्मन्मथा
हंहो मानस किं स्मरस्यभिमताः सिद्ध्यन्ति पुण्यैः क्रि[4]याः ॥'

त्यागी कुलीनः कुशलो रतेषु
कल्पः कलावित्तरुणो धनाढ्यः ।
[5]भव्यः क्षमावान्सुभगोऽभिमानी
स्त्रीणामभीष्टस्त्विह नायकः स्यात् ॥ २३ ॥

तस्यानुकूलदक्षिणशठधृष्टा इ[6]त्थमत्र चत्वारः ।
भेदाः क्रिययोच्यन्ते तदुदाहृतयश्च रमणीयाः ॥ २४ ॥

[7]अतिरक्ततया नार्यां सदा त्यक्तपराङ्गनः ।
सीतायां रामवत्सोऽयमनुकूलः स्मृतो यथा ॥ २५ ॥

'अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं
नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः ।

---

१. 'अनुशब्दित–'. २. 'स्तनोद्वर्तन–'. ३. 'मुग्धमधुराः'; 'भावमधुराः'. ४. एतच्छ्लोकचतुष्टयं क्रमेण संभोग-विप्रलम्भ-प्रच्छन्नसंभोग-प्रच्छन्नविप्रलम्भानामुदाहरणम्. ५. 'भव्यः क्षमी स्थिररुचिः सुभगोऽभिमानी स्त्रीणां मतः शुभवचा इह नायकः स्यात् ।' अयं पाठः केषुचित्पुस्तकेषूपलभ्यमानोऽपि पूर्वार्धस्य भिन्नवृत्तत्वादुपेक्ष्यः. ६. 'इत्यमुत्र'. ७. 'अनुकूलतया'.

किं त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो
दृष्टिं निःक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्[1] ॥'

यो गौरवं भयं प्रेम सद्भावं पूर्वयोषिति ।
न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा ॥ २६ ॥

'सैवास्य प्रणतिस्तदेव वचनं ता एव केलिक्रिया
भीतिः सैव तदेव नर्म मधुरं पूर्वानुरागोचितम् ।
कान्तस्याप्रियकारिणी च[2] भवती तं वक्ति दोषाविलं
किं स्यादित्थमहर्निशं सखि मनो दोलायते चिन्तया ॥'

प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
ज्ञातापराधचेष्टश्च[3] कुटिलोऽसौ शठो यथा ॥ २७ ॥

'सहजतरले आवां[4] तावद्बहुश्रुतिशालिनौ
पुनरिह युवां सत्यं शिष्टं तदत्र कृतागसि ।
प्रणयिनि पुनर्युक्तं रन्तुं न वेति बतावयो-
र्ध्रुवमुपगते कर्णौ प्रष्टुं कुरङ्गदृशो दृशौ ॥'

अपि[5] च ।

'कोपात्किंचिदुपानतोऽपि[6] रभसादाकृष्य केशेष्वलं
नीत्वा मोहनमन्दिरं दयितया हारेण बद्ध्वा दृढम् ।
भूयो यास्यसि तद्गृहानिति मुहुः कण्ठार्धरुद्धाक्षरं
जल्पन्त्या श्रवणोत्पलेन सुकृती कश्चिद्रहस्ताड्यते[7] ॥'

निःशङ्कः कृतदोषोऽपि विलक्षस्तर्जितोऽपि[8] नो ।
मिथ्यावाग्दृष्टदोषोऽपि धृष्टोऽसौ[9] कथितो यथा ॥ २८ ॥

---

१. 'दुःखितम्'. २. 'इति'; 'इव'. ३. 'मुक्तापराधचेष्टस्तु शठोऽयं कथितो यथा'. ४. 'ह्यावाम्'. ५. केषुचित्पुस्तकेषु नास्ति. ६. 'उपागतोऽपि'. ७. 'कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं नीत्वा मोहनमन्दिरं दयितया सायं सखीनां पुरः । भूयोऽप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं धन्यो हन्यत एव निह्नुतिपरः प्रेयान्रुदत्या हसन् ॥' इत्यस्यामरुश्लोकस्य च्छायाभूतोऽयं श्लोकः. ८. 'तर्जितो हसन्'; 'तर्जितोऽपि सन्'. ९. 'अयम्'.

'जल्पन्त्याः परुषं रुषा मम बलाच्चुम्बत्यसावाननं
गृह्णात्याशु करं करेण बहुशः संताड्यमानोऽपि सन्।
आलीनां पुरतो दधाति शिरसा पादप्रहारान्नतो
नो जाने सखि सांप्रतं प्रणयिने कुप्यामि तस्मै कथम्॥'

अपि च।

'धिक्त्वां धूर्त गतत्रप प्रणयिनी सैव त्वयाराध्यतां
यस्याः पादतलाहतिं तव हृदि व्याख्यात्यसौ यावकः।
इत्युक्तोऽपि न नाम मुञ्चति यदा पादावयं दुर्जनो
मिथ्यावादविचक्षणः किमपरं कुर्यां वयस्ये तदा॥'

गूढमन्त्रः शुचिर्वाग्मी भक्तो नर्मविचक्षणः।
स्यान्नर्मसचिवस्तस्य कुपितस्त्रीप्रसादकः॥ २९॥
पीठमर्दो विटश्चेति विदूषक इति त्रिधा।
स भवेत्[1]प्रथमस्तत्र [2]नायिकानायकानुगः॥ ३०॥
एकविद्यो विटः प्रोक्तः क्रीडाप्रायो विदूषकः।
स्ववपुर्वेषभाषाभिर्हास्यकारी च [3]नर्मवित्॥ ३१॥
एषां [4]प्रबन्धविषयो व्यवहारः प्रायशो भवेत्प्रचुरः।
प्रत्येकमुदाहृतयस्तथापि काश्चिन्निगद्यन्ते॥ ३२॥

'विमुञ्चामुं मानं सफलय वचः साधु सुहृदां
मुधा संतापेन ग्लपयसि किमङ्गं स्मरभुवा।
प्रियं पादप्रान्तप्रणतमधुना मानय भृशं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः[5]॥'

'प्रणयिनि भृशं तस्मिन्मानं मनस्विनि मा कृथाः
किमपरमितो युक्तायुक्तैर्विना ह्यमुना तव।

---

१. पीठमर्दः. २. 'नायको नायिकानुगः'. ३. कर्मवित्'. ४. 'स्वकर्मविषये'. ५. 'प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः। निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥' अतिप्राचीनस्य कश्मीरदेशोद्भूतचन्दककवेरयं श्लोकः.

अयमपि भवेत्संप्रत्येव क्षयानलसंनिभः
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः[1] ॥'

'दूरात्कन्दलितैर्हृदि प्रविततैः कण्ठे लुठद्भिर्हठा-
द्वक्त्रे संकटनासिकातरलितैर्निर्यद्भिरत्यूष्मभिः ।
निःश्वासैः पृथुमन्मथोत्थदवथुर्व्यक्तं[2] तवावेदितो
मिथ्यालम्बितसौष्ठवेन किमतः कोपेन कान्तं प्रति[3] ॥'

स्वकीया परकीया च सामान्यवनिता तथा ।
कलाकलापकुशलास्तिस्रस्तस्येह नायिकाः ॥ ३३ ॥
पौराचाररता साध्वी क्षमार्जवविभूषिता ।
मुग्धा मध्या प्रगल्भा च स्वकीया त्रिविधा मता ॥ ३४ ॥
मुग्धा नववधूस्तत्र नवयौवनभूषिता ।
नवानङ्गरहस्यापि लज्जाप्रायरतिर्यथा ॥ ३५ ॥

'गतं कर्णाभ्यर्णे प्रसरति तथाप्यक्षियुगलं
कुचौ कुम्भारम्भौ तदपि चिबुकोत्तम्भनरुची ।
नितम्बप्राग्भारो गुरुरपि गुरुत्वं मृगयते
कथंचिन्नो तृप्तिस्तरुणिमनि मन्ये मृगदृशः ॥'

'यथा रोमाञ्चोऽयं स्तनभुवि लसत्स्वेदकणिको
यथा दृष्टिस्तिर्यक्पतति सहसा संकुचति च ।
तथा शङ्के[4]ऽमुष्याः प्रणयिनि दरास्वादितरसं
न मध्यस्थं चेतः[5] प्रगुणरमणीयं[6] न च दृढम् ॥'

'विरम नाथ विमुञ्च ममाञ्चलं शमय दीपमिमं[7] समया[8] सखी ।
इति नवोढवधूवचसा युवा मुदमगादधिकां[9] सुरतादपि[10] ॥'

---

१. 'प्रथममरुणच्छायस्तावत्ततः कनकाकृतिः प्रभवति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे । तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥' अयमपि प्राचीनः श्लोकः. २. व्यक्तः. ३. एतच्छ्लोकत्रयं पीठमर्दादीनां क्रमेणोदाहरणम्. ४. 'तस्येति'. ५. 'जाने'. ६. 'सगुण'. ७. 'इयम्'. ८. समीपे. ९. 'अधिकम्'. १०. श्लोकत्रयं क्रमेण नवयौवन-नवानङ्गरहस्य-लज्जाप्रायरतीनामुदाहरणम्.

[1]सकम्पा चुम्बने वक्त्रं हरत्येषोप[2]गूहिता ।
परावृत्य चिरं तल्प आस्ते रन्तुं च वाञ्छति ॥ ३६ ॥

'अपहरति यदास्यं चुम्बने श्लिष्यमाणा
वलति च शयनीये कम्पते च प्रकामम् ।
वदति च यदलक्ष्यं किंचिदुक्तापि भूयो
रमयति सुतरां तच्चित्तमन्तर्नवोढा[3] ॥'

मुग्धामावर्जयत्येष मृदूपायेन सान्त्वयन् ।
नातिभीतिकरैर्भावै[4]र्निबन्धैर्बालभीषकैः[5] ॥ ३७ ॥

'सरति सरसतीरादेषा भ्रमद्भ्रमरावली
सुमुखि विमुखी पद्मे मन्ये तवास्यपिपासया[6] ।
इति निगदिते किंचिद्भीत्या विवर्तितकंधरा
वदनकमले भर्त्रा बाला चिरं परिचुम्बिता ॥'

अन्यां निषेवमाणेऽपि यदि कुप्यति सा प्रिये ।
रोदित्यस्याग्रतः स्वल्पमनुनीता च तुष्यति ॥ ३८ ॥

'म[7]न्यौ कृते प्रथममेव विकारमन्यं
नो जानती नववधू रुदती परं सा ।
धूर्तेन लोचनजलं परिमृज्य गाढं
संचुम्ब्य चाधरदले गमिता प्रसादम् ॥'

आरूढयौवना मध्या प्रादुर्भूतमनोभवा ।
प्रगल्भवचना किंचिद्वि[8]चित्रसुरता यथा ॥ ३९ ॥

---

१. 'सलज्जा'. २. 'अवगूहिता'. ३. अस्माच्छ्लोकादग्रे 'दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता' इत्यादि नागानन्दनाटकतृतीयाङ्कस्थश्लोकः केषुचिन्मूलपुस्तकेषु सटीकपुस्तके च वर्तते. ४. 'चित्रैः'. ५. 'भीषितैः'. ६. 'इदमपास्य विरागि परागिणीरलिकदम्बकमम्बुरुहां ततीः । स्तनभरेण जितस्तबकानमन्नवलते वलतेऽभिमुखं तव ॥' इति शिशुपालवधे (६।११) माघः. ७. 'प्रथमजनिते मन्यौ बाला विकारमजानती कितवचरितेनारोप्याङ्कं विनम्रमुखैव सा । चिबुकमलकं चोन्नम्योच्चैरकृत्रिमविभ्रमा नयनसलिलस्यन्दिन्योष्ठे रुदत्यपि चुम्बिता ॥' इति कस्यचित्पद्यम्. ८. 'विराजद्विभ्रमा'.

'तरत्तारं चक्षुः क्षपयति मुनीनामपि दृशः
कुचद्वन्द्वाक्रान्तं हृदयमहृदः कान्न कुरुते ।
गतिर्मन्दीभूता हरति गमनं मन्मथवता-
महो तन्व्यास्तुल्यं तरुणिमनि सर्वं विजयते ॥'

'दृष्टिः खिद्यति निर्भरं प्रियतमे वैदग्ध्यभाजो गिरः
कामं कुन्तलमालिकाविरचने त्यक्तान्यकर्मा[1] करः ।
वक्षः संव्रियते पुनःपुनरिदं लीलालसं गम्यते
जाता सुभ्रु मनोरमा तव दशा कस्मादकस्मादियम् ॥'

'सुभग कुरबकस्त्वं नो किमालिङ्गनोत्कः
किमु मुखमदिरेच्छुः केसरो नो हृदिस्थः ।
त्वयि नियतमशोके युज्यते पादघातः
प्रियमिति परिहासात्पेशलं काचिदूचे ॥'

'कान्ते तथा कथमपि प्रथितं मृगाक्ष्या
चातुर्यमुद्धतमनोभवया रतेषु ।
तत्कूजितान्यनुवदद्भिरनेकवारं[2]
शिष्यायितं गृहकपोतशतैर्यथास्याः[3] ॥'[4]

गाढं व्याप्रियते कान्तं पिबतीव रतावियम् ।
विशतीव तदङ्गेषु मुह्यतीव सुखे यथा ॥ ४० ॥

'कृत्वानेकविधां रसेन सुरते केलिं कथंचिच्चिरा-
त्प्राप्तान्तःसुखमीलिताक्षियुगला स्विद्यत्कपोलस्थली ।
सुप्तेयं किल सुन्दरीति सुभगः स्वैरं तथैवास्वज-
द्गाढानङ्गविमर्दनिःसहवपुर्निद्रां सहैवागतः ॥'

सा धीरा वक्ति वक्रोक्त्या प्रियं कोपात्कृतागसम् ।
मध्या रोदित्युपालम्भैरधीरा परुषं[5] यथा ॥ ४१ ॥

---

१. 'कर्माग्रहः'. २. 'तत्कूजितं मृदु'. ३. 'गृहशकुन्त–'. ४. एतच्छ्लोकचतुष्टयं क्रमेणारूढयौवना-प्रादुर्भूतमनोभवा-प्रगल्भवचना-विचित्रसुरतानामुदाहरणम्. ५. 'वदति'.

'उपेत्य तां दृढपरिरम्भलालसश्चिरादभूः प्रमुषितचारुचन्दनः।
धृताञ्जनः सपदि तदक्षिचुम्बनादिहैव ते प्रिय विदिता कृतार्थता॥'

'यत्रार्कायितमिन्दुना सरसिजैरङ्गारपुञ्जायितं
क्रुद्धायां मयि नाथ ते कदलिकाकाण्डैरलातायितम्।
कालोऽन्यः खलु कोऽपि सोऽमृतमयो जातो विषात्माधुना
धिक्त्वां धूर्त विनिर्यदश्रुरबला मोहं रुदन्ती गता॥'

'सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या।
अस्माकमस्ति न कथंचिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः[२]॥'

लब्धायतिः प्रगल्भा स्यात्समस्तरतिकोविदा।
आक्रान्तनायिका बाढं विराजद्विभ्रमा यथा॥ ४२॥

'सेयं पङ्कजिनी मृणाललतिकामादाय यस्याः प्रियो
हारं मे कुरुते पयोधरतटे प्रत्यग्रताराचम्।
बन्धूकं च तदेतदालि[२] विदलद्यत्तेन सीमन्तितं
सर्वाशाविजिगीषुपुष्पधनुषो बाणश्रियं धास्यति॥'

'यत्र स्वेदलवैरलं विलुलितैर्व्यालुप्यते चन्दनं
स्वच्छन्दैर्मणितैश्च[३] यत्र रणितं निह्नूयते नूपुरम्।
यत्रायान्त्यचिरेण सर्वविषयाः कामं तदेकाग्रतां
सख्यस्तत्सुरतं भणामि रतये[४] शेषा तु लोकस्थितिः॥'

'स्वामिन्भङ्गुरयालकं[५] सतिलकं भालं विलासिन्कुरु
प्राणेश त्रुटितं पयोधरतटे[६] हारं पुनर्योजय।
इत्युक्त्वा[७] सुरतावसानसुखिता[८] संपूर्णचन्द्रानना
स्पृष्टा तेन तथेति जातपुलका प्राप्ता पुनर्मोहनम्॥'

---

१. धीरा-मध्या-धीराणां क्रमेणोदाहरणत्रयम्. २. 'तदेतदेव विलसत्'. ३. 'सच्छेदैः'. ४. 'धृतये'. ५. 'भङ्गुरितालकम्'. ६. 'पयोधरयुगे'. ७. 'इत्युक्ते'. ८. 'मुषिताप्यापूर्ण—'.

'मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै-
रलसवलितैरङ्गन्यासैर्मनोभवबन्धुभिः ।
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्[1] ॥'

निराकुला[2] रतावेषा द्रवतीव प्रियाङ्कके ।
कोऽयं कास्मि[3] रतं किं वा न वेत्ति च रसाद्यथा ॥ ४३ ॥

'धन्यास्ताः सखि योषितः प्रियतमे सर्वाङ्गलग्नेऽपि याः
प्रागल्भ्यं प्रथयन्ति मोहनविधावालम्ब्य धैर्यं महत् ।
अस्माकं तु तदीयपाणिकमलेऽप्युन्मोचयत्यंशुकं
कोऽयं का वयमत्र किं नु सुरतं नैव स्मृतिर्जायते ॥'

कृतदोषेऽपि साधीरा तस्मिन्नाद्रियते रुषा ।
आकारसंवृतिं चापि कृत्वोदास्ते रतौ यथा ॥ ४४ ॥

'यद्वाचः प्रचुरोपचारचतुरा यत्सादरं दूरतः
प्रत्युत्थानमिदं स्वहस्तनिहितं यद्भिन्नमप्यासनम् ।
उत्पश्यामि यदेवमेव च मुहुर्दृष्टिं सखीसंमुखीं
तच्छङ्के तव पङ्कजाक्षि बलवान्कोऽप्यप्रसादो मयि ॥'

'यत्पाणिर्न निवारितो निवसनग्रन्थिं समुद्ग्रन्थय-
न्भ्रूभेदो न कृतो मनागपि मुहुर्यत्खण्ड्यमानेऽधरे ।
यन्निःशङ्कमिवार्पितं वपुरहो पत्युः समालिङ्गने
मानिन्या कथितोऽनुकूलविधिना तेनैव मन्युर्महान् ॥'

मध्या प्रतिभिनत्त्येनं सोत्कण्ठं साधुभाषितैः ।
अधीरा परुषैर्हन्ति[4] संतर्ज्य दयितं यथा ॥ ४५ ॥

'कृतं मिथ्यावादैर्विरम विदितं कामुक चिरा-
त्प्रियां तामेवोच्चैरभिसर यदीयैर्नखपदैः ।

---

१. लब्धायत्यादीनामुदाहरणचतुष्टयम्. २. 'अनुकूलरतावेगाद्द्रवतीव तदङ्के'.
३. 'काहम्'. ४. 'साग्रहम्'. ५. 'च रुषा'.

विलासैश्च प्राप्तं तव हृदि पदं रागबहुलै-
र्मया किं ते कृत्यं ध्रुवमकुटिलाचारपरया ॥'

'सा बाढं भवतेक्षितेति निबिडं संयम्य बाह्वोः स्रजा
भूयो द्रक्ष्यसि तां शठेति [1]दयितं संतर्ज्य संतर्ज्य च ।
आलीनां पुर एव [2]निह्नुतिपरः कोपाद्रणन्नूपुरं
मानिन्या चरणप्रहारविधिना प्रेयानशोकीकृतः ॥'

[3]एकाकारा मता मुग्धा पुनर्भूश्च यतोऽनयोः ।
अतिसूक्ष्मतया भेदः कविभिर्न प्रदर्शितः ॥ ४६ ॥
मध्या पुनः प्रगल्भा च [4]द्विधा सा परिभिद्यते ।
एका ज्येष्ठा [5]कनिष्ठान्या नायकप्रणयं प्रति ॥ ४७ ॥
उपरोधात्तथा स्नेहात्सानुरागोऽपि नायकः ।
चेष्टते तां प्रति प्रायः कलासु कुशलो यथा ॥ ४८ ॥

'त्वदक्षिणी कुवलयबुद्धिरेत्यली रुणध्म्यहं तदिति निमील्य लोचने ।
ततो भृशं पुलकित[6]गण्डमण्डलां युवा परां निभृतमचुम्बदङ्गनाम् ॥'

संपत्तौ च विपत्तौ च [7]मरणेऽपि न मुञ्चति ।
या स्वीया तां प्रति प्रेम जायते [8]पुण्यकारिणः ॥ ४९ ॥
अन्यदीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये ।
दर्शनाच्छ्रवणाद्[9]वापि कामार्ते भवतो यथा ॥ ५० ॥

'किमपि ललितैः स्निग्धैः किंचित्किमप्य[10]तिकुञ्चितैः
किमपि [11]वलितैः कंदर्पेषून्हसद्भिरिवेक्षणैः ।
अभिमतमुखं वीक्षां चक्रे नवाङ्गनया तथा
[12]ललितकुशलोऽप्यालीलोको यथातिविसिस्मये ॥'

---

१. 'परुषं संभर्त्स्य'; 'दयितं संभर्त्स्य'. २. 'निह्नुतपरम्'. ३. 'एकाकाररता'. ४. 'द्विधासौ'; 'द्विविधा'. ५. 'कनिष्ठा च नायक–'; 'कनिष्ठा स्यान्नायिका–'. ६. गल्ल. ७. 'मरणे च'. ८. 'पुण्यकारिणाम्'. ९. 'चापि'. १०. 'अनिकुञ्चितैः'. ११. 'चलितैः'. १२. 'ललन'; 'कलन'.

'निशमय्य बहिर्[1]मनोहरं स्वरमैक्षिष्ट तथापरा यथा ।
तिलमात्रकमप्यभून्नहि श्रवणेन्दीवरलोचनान्तरम् ॥'

'कस्याश्चित्सुभग इति श्रुतश्चिरं यस्त्वं दृष्ट्वाधिगतरतेर्निमीलिताक्ष्याः ।
निस्पन्दं वपुरवलोक्य सौविदल्लाः संतेपुर्विधुरधियो निशान्तवध्वाः ॥'

'कार्श्यजागरसंतापान्यः करोति श्रुतोऽप्यलम् ।
तमेव दुर्लभं कान्तं चेतः कस्माद्दिदृक्षसे ॥'

साक्षाच्चित्रे तथा स्वप्ने तस्य स्याद्दर्शनं त्रिधा ।
देशे काले च भङ्ग्यां च श्रवणं [2]चास्य तद्यथा ॥ ९१ ॥

'सत्यं सन्ति गृहे गृहे प्रियतमा येषां भुजालिङ्गन-
व्यापारोच्छलदच्छमोहनजला जायन्त एणीदृशः ।
प्रेयान्कोऽप्यपरोऽयमत्र [3]सुकृती दृष्टेऽपि यस्मिन्वपुः
स्वेदोज्जृम्भणकम्पसाध्वसमुखैः प्राप्नोति कांचिद्दशाम् ॥'

'चित्रं चित्रगतोऽप्येष ममालि मदनोपमः ।
समुन्मूल्य बलाल्लज्जामुत्कण्ठयति मानसम् ॥'

'मुग्धा स्वप्नसमागते प्रियतमे तत्पाणिसंस्पर्शना-
द्रोमाञ्चाञ्चितया शरीरलतया संसूच्य [5]कोपात्किल ।
मा मां वल्लभ संस्पृशेति सहसा शून्यं वदन्ती मुहुः
सख्या नो हसिता [6]सचिन्तमसकृत्संशोचिता प्रत्युत ॥'

'स्फारस्फुरत्प्रदीपं सौधं मधु सोत्पलं कलं गीतम् ।
प्रियसखि सकलमिदं तव [7]सफलं खलु यदि भवेत्सोऽत्र ॥'

'विकसति कैरवनिकरे सरति च सरसीसमीरणो [8]सुतनु ।
चुम्बत्यम्बरमिन्दौ तव तेन विना रतिः कीदृक् ॥'

'अजननिरस्तु दृशोस्[9]तव कुचयोरभवनिरलं भवतु ।
[10]यदि दृश्यते न स युवा निर्भरमालिङ्ग्यते नो वा ॥'

---

१. 'मनोगतं चिरम्'. २. 'तस्य'. ३. 'नियतम्'. ४. 'मुहुः'. ५. 'कम्पात्'. ६. 'सचित्रम्'. ७. 'विफलं यदि नो भवेत्सोऽत्र'. ८. 'सुभ्रु'. ९. 'ते'. १०. 'सुमुखि यदि दृश्यते न स'.

द्रष्टुं वक्तुं च नो कन्या रक्ता शक्नोत्यमुं स्फुटम् ।
पश्यन्तमभिजल्पन्तं विविक्तेऽपि ह्रिया यथा ॥ ५२ ॥

'कामं न पश्यति दिदृक्षत एव भूम्ना
नोक्तापि जल्पति विवक्षति चादरेण ।
लज्जासरव्यतिकरेण मनोधिनाथे
बाला रसान्तरमिदं ललितं बिभर्ति ॥'

विज्ञातनायिकाचित्ता सखी वदति नायकम् ।
नायको वा सखीं तस्याः प्रेमाभिव्यक्तये यथा ॥ ५३ ॥

'कण्टकिततनुशरीरा लज्जामुकुलायमाननयनेयम् ।
तव कुमुदिनीव वाञ्छति नृचन्द्र बाला करस्पर्शम् ॥'

'संतापयन्ति शिशिरांशुरुचो यदेते
[1]संमोहयन्ति च विनिद्रसरोजवाताः ।
यत्खिद्यते तनुरियं च [2]तदेष दोषः
सख्यास्तवैव सुतनु प्रचुरत्रपायाः ॥'

[3]अपश्यन्तं च सा कान्तं स्फारिताक्षी निरीक्षते ।
दूरादालोकयत्येवं[4] सखीं स्वजति निर्भरम् ॥ ५४ ॥
निर्निमित्तं हसन्ती च सखीं वदति किंचन ।
सव्याजं सुन्दरं किंचिद्गात्रमाविष्करोति च ॥ ५५ ॥
सख्यादि स्थापितां मालां[5] काञ्च्यादि रचयेत्पुनः ।
चेष्टा च कुरुते रम्यामङ्गभङ्गैः शुभैर्यथा ॥ ५६ ॥

'अभिमुखगते तस्मिन्नेव प्रिये [6]बहुशो वद-
त्यवनतमुखं तूष्णीमेव स्थितं मृगनेत्रया ।
अथ किल [7]वल्लीलालोलं स एव तथेक्षितः
कथमपि यथा मन्ये दृष्ट्या कृतं श्रुतिलङ्घनम् ॥'

१. 'मां मोहयन्ति'. २. 'स एष'. ३. 'अपश्यन्ती तु सा कान्तं स्फुरिताक्षी'. ४. 'एषा' ५. 'बाला'. ६. 'पुरतः'. ७. 'वलज्जीवं यातः'.

'तिर्यग्वर्तितगात्रयष्टिविषमोद्वृत्तस्तनास्फालन-[1]
त्रुट्यन्मौक्तिकमालया सपुलकस्वेदोल्लसद्गण्डया[2] ।
दूरादेव विलोकयत्यभिमते तद्वक्त्रदत्तेक्षणं
दुर्वारस्मरतापया सहचरी गाढं समालिङ्गिता ॥'

'अनिमित्तं यद्विहसति निष्कारणमेव यत्सखीं वदति ।
दयितं विलोक्य तदियं शंसति तदधीनमात्मानम् ॥'

'प्रादुष्यद्भुजमूलकान्तिललितामुद्यम्य दोर्वल्लरीं
वल्गत्पीनपयोधरस्थललुठल्[3]न्मुक्तावलीसुन्दरम् ।
अङ्गुल्या[4] प्रचलत्कराग्रवलयस्वानोपहूतस्मरं
तन्व्याः कुञ्चितलोचनं विजयते तत्कर्णकण्डूयनम्[5] ॥'

स्रजोऽवतंसं रशनां च किंचित्प्रियं समालोक्य समासजन्ती ।
पुनस्तरां सा सुहृदो ददाति भत्यङ्गमावासमिव स्मरस्य ॥ ५७ ॥

'व्याजृम्भणोल्लसितदन्तमयूखजाल-
व्यालम्बिमौक्तिकगुणं रमणे[6] मुदैव ।
ऊर्ध्वं मिलद्भुजलतावलयप्रपञ्च-
सत्तोरणं हृदि विशत्यपरा[7] व्युदास ॥'

अन्योढापि करोत्येव सर्वमुद्धतमन्मथा ।
दुरवस्था[8] पुनः कान्तमभियुङ्क्ते स्वयं यथा ॥ ५८ ॥

'उल्लङ्घ्यापि सखीवचः समुचितामुत्सृज्य लज्जामलं
हित्वा[9] भीतिभरं निरस्य च निजं सौभाग्यगर्वं मनाक् ।
आज्ञां केवलमेव मन्मथगुरोरादाय नूनं मया
त्वं निःशेषविलासिवर्गगणनाचूडामणे संश्रितः ॥'

चक्षुर्मीलति सानन्दं नितम्बः प्रस्रवत्यपि ।
वेपते च तनुस्तन्वी[10] तस्यास्तद्दर्शने यथा ॥ ५९ ॥

---

१. 'स्फालनान्नृत्यन्'. २. 'गल्लया.' ३. 'चलन्'. ४. 'अङ्गुल्यग्रचलत्'. ५. 'समभवत्कर्णस्य'. ६. 'रमणम्'. ७. 'अपराध्युवास'. ८. 'दुःखावस्था'. ९. 'भित्त्वा'. १०. 'तन्व्याः'.

'मीलन्मन्थरचक्षुषा परिपतत्काञ्चीग्रहव्यग्रया
गाढानङ्गभरस्त्रवज्जघनया कम्पोपरुद्धाङ्गया ।
सर्वाङ्गं चटुकारकोऽप्यबलया संकेतके कौतुका-
दास्तां रन्तुमहो निरीक्षितुमपि प्रेयान्न संभावितः ॥'

नाभियुङ्क्ते स्वयं कन्या मुग्धत्वाद्दुःस्थितापि तम् ।
तदवस्थां तु कान्ताय तत्सखी कथयेद्यथा ॥ ६० ॥

'निश्वासेषु स्खलति कदलीवीजनं तापसंप-
न्नेत्राम्भोभिश्छेमिति पतितैः सिच्यते च स्तनान्तः ।
तस्याः किंचित्सुभग तदभूत्तानवं त्वद्वियोगे
येनाकस्माद्वलयपदवीमङ्गुलीयं प्रयाति ॥'

अनन्यशरणा स्वीया धनाहार्या पराङ्गना ।
अस्यास्तु केवलं प्रेम तेनैषा रागिणां मता ॥ ६१ ॥
सामान्यवनिता वेश्या सा वित्तं परमिच्छति ।
निर्गुणेऽपि न विद्वेषो न रागोऽस्या गुणिन्यपि ॥ ६२ ॥
तत्स्वरूपमिदं प्रोक्तं कैश्चिद्ब्रूमो वयं पुनः ।
वर्णयन्त्यनया युक्त्या तासामप्यनुरागिताम् ॥ ६३ ॥
शृङ्गाराभास एव स्याद्यदि ता रागवर्जिताः ।
तद्व्यापारोऽथवा तासां स्मरः किं भक्षितो वकैः ॥ ६४ ॥
तस्मात्तासामपि क्वापि रागः स्यात्किं तु सर्वथा ।
धनार्थं कृत्रिमैर्भावैर्ग्राम्यं व्यामोहयन्ति ताः ॥ ६५ ॥
लिङ्गी प्रच्छन्नकामश्च नरंमन्यश्च षण्ढकः ।
सुखप्राप्तधनो मूर्खः पितृवित्तेन गर्वितः ॥ ६६ ॥
इत्यादीन्प्रथमं ग्राम्याञ्ज्ञात्वाकृष्य च तद्धनम् ।
अपूर्वा इव मुञ्चन्ति तानेतास्तापयन्ति च ॥ ६७ ॥

---

१. 'श्रवद्रमणया'. २. 'स्थगिति'. ३. 'ताम्यते'. ४. 'त्वद्वियोगात्'. ५. 'वराङ्गना'. ६. 'बलवत्यानया'. ७. 'शृङ्गाराभाव'. ८. 'भावश्च'. ९. 'दर्पितः'. १०. 'इत्यादि प्रथमं ज्ञात्वा सम्यक्कर्षति तद्धनम्—तस्मादेता विषोपमाः'.

किं[1] तु तासां कलाकेलिकुशलानां मनोरमम् ।
विस्मारितापरस्त्रीकं सुरतं जायते यथा ॥ ६८ ॥

'गाढालिङ्गनपीडितस्तनतटं स्विद्यत्कपोलस्थलं
संदष्टाधरमुक्तसीत्कृतमभिभ्रान्तभ्रु नृत्यत्करम् ।
चाटुप्रायवचो विचित्रमणितं[3] घातैर्नखैश्चाङ्कितं
वेश्यानां धृतिधाम पुष्पधनुषः प्राप्नोति धन्यो रतम् ॥'

ईर्ष्या कुलस्त्रीषु न नायकस्य निःशङ्ककेलिर्न पराङ्गनासु ।
वेश्यासु चैतद्द्वितयं प्रसिद्धं सर्वस्वमेतास्तदहो स्मरस्य ॥ ६९ ॥

कुप्यत्पिनाकिनेत्राग्निज्वालाभस्मीकृतः पुरा ।
उज्जीवितः पुनः कामो मन्ये वेश्याविलोकितैः ॥ ७० ॥

आनन्दयन्ति युक्त्या ताः सेविता घ्नन्ति चान्यथा ।
दुर्विज्ञेयाः प्रकृत्यैव तस्माद्वेश्या विषोपमाः ॥ ७१ ॥

स्वाधीनपतिकोत्का च तथा वासकसज्जिका ।
[5]संधिता विप्रलब्धा च खण्डिता चाभिसारिका ॥ ७२ ॥

प्रोषितप्रेयसी चैवं नायिकाः पूर्वसूचिताः ।
ता एवात्र भवन्त्यष्टाववस्थाभिः पुनर्यथा ॥ ७३ ॥

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्ता स्वाधीनपतिका[6] यथा ॥ ७४ ॥

'लिखति कुचयोः पत्रं कण्ठे नियोजयति स्रजं
तिलकमलिके कुर्वन्गण्डादुदस्यति कुन्तलान्[7] ।
इति चटुशतैर्वारं वारं वपुः परितः स्पृश-
न्विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥'

उत्का भवति सा यस्याः संकेतं नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयन्त्याकुला[8] यथा ॥ ७५ ॥

---

१. 'किंचित्'. २. 'नृणाम्'. ३. 'मणितैः'. ४. 'रुतैः'. ५. 'अभिसंधिता'; 'अतिसंधिता'. ६. 'सा स्वाधीनपतिः'. ७. 'कुण्डलम्'. ८. 'आकुलेक्षणा'.

'किं रुद्धः प्रियया कयाचिदथवा सख्या तयोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले संस्थाप्य वक्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥'

भवेद्वासकसज्जासौ सज्जिताङ्गरतालया ।
निश्चित्यागमनं भर्तुर्द्वारेक्षणपरा यथा ॥ ७६ ॥

'दृष्ट्वा दर्पणमण्डले निजवपुर्भूषां मनोहारिणीं
दीपार्चिःकपिशं च मोहनगृहं त्रस्यत्कुरङ्गीदृशा ।
एवं नौ सुरतं भविष्यति चिराद्द्येति सानन्दया
कामं कान्तदिदृक्षयातिललिता द्वारे दृगारोपिता ॥'

निरस्तो मन्युना कान्तो नमन्नपि यया पुनः ।
दुःस्थिता तं विना सातिसंधितोऽभिमता यथा ॥ ७७ ॥

'यत्पादप्रणतः प्रियः परुषया वाचा स निर्वारितो
यत्सख्या न कृतं वचो जडतया यन्मन्युरेको धृतः ।
पापस्यास्य फलं तदेतदधुना यच्चन्दनेन्दुद्युति-
प्रालेयाम्बुसमीरपङ्कजबिसैर्गात्रं मुहुर्दह्यते ॥'

प्रेष्य दूतीं स्वयं दत्त्वा संकेतं नागतः प्रियः ।
यस्यास्तेन विना दुःस्था विप्रलब्धा तु सा यथा ॥ ७८ ॥

'यत्संकेतगृहं प्रियेण कथितं संप्रेष्य दूतीं स्वयं
तच्छून्यं सुचिरं निषेव्य सुदृशा पश्चाच्च भग्नाशया ।
स्थानोपासनसूचनाय विगलत्सान्द्राञ्जनैर्लोचनै-
र्भूमावक्षरमालिकेव लिखिता दीर्घं रुदत्या शनैः ॥'

कुतश्चिन्नागतो यस्या उचिते वासके प्रियः ।
तदनागमसंतप्ता खण्डिता सा मता यथा ॥ ७९ ॥

---

१. 'मम'. २. 'सज्जिताङ्गा रतालये'. ३. 'ऊचे'. ४. 'कथिता'. ५. 'कोपस्य'. ६. 'गत्वा'. ७. 'ध्यातम्'.

'सोत्कण्ठं रुदितं सकम्पमसकृद्यातं सबाष्पं चिरं
चक्षुर्दिक्षु निवेशितं सकरुणं सख्या समं जल्पितम् ।
नागच्छत्युचितेऽपि वासकविधौ कान्ते समुद्विग्नया
तत्तत्किंचिदनुष्ठितं मृगदृशा नो यत्र वाचां गतिः ॥'

या निर्लज्जीकृता[1] बाढं मदने मदनेन च ।
अभियाति प्रियं[2] साभिसारिकेति मता यथा ॥ ८० ॥

'नो भीतं तडितो दृशा जलमुचा[3] तद्दर्शनाकाङ्क्षया
नो गर्जिर्गणिता भृशं श्रुतिसुखं तद्वाचि संचिन्त्य च ।
धारापातसमुद्भवा न च मता पीडा तदालिङ्गनं
वाञ्छन्त्या दयिताभिसारणविधौ तन्व्या परं तत्परम् ॥'

कुतश्चित्कारणाद्यस्याः पतिर्देशान्तरं गतः ।
दत्त्वावधिं भृशार्ता सा प्रोषितप्रेयसी यथा[4] ॥ ८१ ॥

'उत्क्षिप्यालकमालिकां विलुलितामापाण्डुगण्डस्थला-
द्विश्लिष्य[5]द्वलयप्रपातभयतः प्रोद्यम्य किंचित्करौ ।
द्वारस्तम्भनिषण्णगात्रलतिका केनापि पुण्यात्मना
मार्गालोकनदत्तदृष्टिरबला तत्कालमालिङ्ग्यते ॥'

निःश्वाससंतापसखीवचो[6]र्तिचिन्ताश्रुपातादियुताः सखेदाः ।
वाच्या[7] प्रलब्धागतभर्तृकोत्कातिसंधिताः[8] खण्डितया सहात्र ॥८२॥

विचित्रमण्डना हृष्टा भवेत्स्वाधीनभर्तृका ।
तथा वासकसज्जापि सा किं त्वागन्तुकप्रिया ॥ ८३ ॥

कुलजान्याङ्गना वेश्या त्रिधा स्यादभिसारिका ।
यथैवोक्तास्तथैवान्याः स्वाधीनपतिकादयः ॥ ८४ ॥

कुलजा संवृता त्रस्ता संव्रीडा[9] च द्रुतं[10] व्रजेत् ।
नायकं परनारी च समन्तादनवेक्षिता[11] ॥ ८५ ॥

---

१. 'निर्लज्जा कृता'. २. 'स्वयम्'. ३. 'जलमुचा'; 'जडमुचाम्'. ४. 'मता'. ५. 'विश्लिष्टात्'. ६. 'वचोभिः'. ७. 'वाण्याः'. ८. 'अभिसंधिताः'. ९. 'च' १०. 'सव्रीडं तद्गृहम्'. ११. 'सदान्यैरप्यवीक्षिता'.

सखीयुक्ता मदाधिक्यात्स्फारिताक्षी न शङ्किता।
सशब्दाभरणा कामं वेश्या सरति नायकम्॥ ८६॥
त्रयोदशविधा स्वीया द्विविधा च पराङ्गना।
एका वेश्या पुनश्चाष्टाववस्थाभेदतोऽत्र[1] ताः॥ ८७॥
पुनश्च[2] तास्त्रिधा सर्वा उत्तमा मध्यमाधमा।
इत्थं शतत्रयं तासामशीतिश्चतुरुत्तरा॥ ८८॥
दोषानुरूपकोपा यानुनीता च प्रसीदति।
रज्यते च भृशं नाथे गुणहार्योत्तमेति सा॥ ८९॥
'कान्ते किं कुपितासि कः परजने प्राणेश कोपो भवे-
त्कोऽयं सुभ्रु परस्त्वमेव दयिते दासोऽस्मि कस्ते परः।
इत्युक्त्वा प्रणतः प्रियः क्षितितलादुत्थाप्य सानन्दया
नेत्राम्भःकणिकाङ्किते स्तनतटे तन्व्या समारोपितः॥'
दोषे स्वल्पेऽपि या कोपं धत्ते कष्टेन मुञ्चति[3]।
प्रयाति कारणाद्रागं मध्यमा सा मता यथा॥ ९०॥
'विस्फार[4]स्फुरिताधरापि विकसद्गण्डस्थप्रस्खल-
द्घर्माम्भःकणिकापि भङ्गुरतरभ्रूभेदभूषाप्यलम्।
पादान्तप्रणते प्रिये प्रकटयत्यन्तः प्रसादं प्रिया
केशान्नूपुरमण्डलीषु[5] वलितानुन्मोचयन्ती शनैः॥'
या कुप्यति विना दोषं[6] स्निह्यत्यनुनयं विना।
निर्हेतुकप्रवृत्तिश्च चलचित्तापि[7] साधमा॥ ९१॥
'यत्राधः[8]कृतकामकार्मुककथो[9] भ्राम्यद्भ्रुवोर्विभ्रमः
सद्यः प्रोद्गत[10]चन्द्रकान्तिजयिनी यस्मिन्कपोलच्छविः।
यत्र स्वेदकणा[11]वलुप्तमहिमा हारोऽप्युरोजस्थले
कोऽयं मानिनि मत्प्रणामविमुखः प्रत्यग्रमानग्रहः॥'

---

१. 'यथा' २. 'पुनस्तास्त्रिविधाः'. ३. 'तुष्यति'. ४. 'प्रस्फार–'. ५. 'मपलितान्'; 'वलयितान्'. ६. 'दोषैः'. ७. 'चलचित्तेति'. ८. 'यः क्रुद्धः'. ९. 'कथोद्भ्राम्यद्भ्रमः'. १०. 'प्रोम्भितचन्द्रबिम्ब'. ११. 'कणावलिप्त–'.

[१]जातिकालवयोवस्थाभावकंदर्पनायकैः ।
इतरा अप्यसंख्याः स्युर्नोक्ता विस्तरभीतितः ॥ ९२ ॥
इत्यादि सकलं ज्ञात्वा स्वयं चालोक्य तद्विदाम् ।
कवीनां च विशेषोक्त्या ज्ञातव्याः सकला इमाः ॥ ९३ ॥
रोमाञ्चवेपथुस्तम्भस्वेदनेत्राम्बुविभ्रमाः ।
वाच्याः संयोगशृङ्गारे कविना नायिकाश्रिताः ॥ ९४ ॥
संबन्धिमित्रद्विजराजतीक्ष्णवर्णाधिकानां प्रमदा न गम्याः ।
व्यङ्गास्तथा प्रव्रजिता विभिन्नमन्त्राश्च धर्मार्थमनोभवज्ञैः ॥९५॥
अनेन मार्गेण विशेषरम्यं [२]संभोगशृङ्गारमिमं वितन्वन् ।
भवेत्कविर्भावरसानुरक्तो विदग्धगोष्ठीवनितामनोज्ञः ॥ ९६ ॥

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलकाभिधाने काव्यरसालंकारे संभोगशृङ्गारो नाम प्रथमः परिच्छेदः ।

द्वितीयः परिच्छेदः ।

विप्रलम्भाभिधानोऽयं शृङ्गारः स्याच्चतुर्विधः ।
पूर्वानुरागो मानाख्यः प्रवासः [३]करुणात्मकः ॥ १ ॥
दंपत्योर्दर्शनादेव [४]समुत्पन्नानुरागयोः ।
ज्ञेयः पूर्वानुरागोऽयमप्राप्तौ च[५] दशा यथा ॥ २ ॥

'किं चन्दनै [६]रचयसे नु मृणालशय्यां
मा मा ममालि [७]कुरु कोमलतालवृन्तम् ।
मुञ्चाग्रहं विकचपङ्कजयोर्जनेषु
तत्संगमः परमपाकुरुते स्मराग्निम् ॥'

'यत्सारैरिव पङ्कजस्य घटितं यच्चन्द्रगर्भादिव
प्रोत्कीर्णं यदनङ्गसायकशिखाभासेव संवर्धितम् ।
यत्संसिच्य सुधारसैरिव रतेरास्थानभूमीकृतं
तद्भूयोऽपि कदा सरोरुहदृशः पश्यामि तस्या मुखम् ॥'

---

१. 'जातिरूपकला—'. २. 'संयोग'. ३. 'करुणा यथा'. ४. 'प्ररूढगुरुरागयोः'. ५. 'या'. ६. 'रचय मुञ्च'. ७. 'धुनु'. ८. 'दर्शनेषु'.

मृणालकदली[1]चन्द्रचन्दनाम्बुरुहादिकम् ।
तत्रानयोः स्मरातङ्कशान्तये नैव सेवितम् ॥ ३ ॥
आलोकालापसंरूढरागाकुलितचेतसोः ।
तयोर्भवेदसंप्राप्तौ दशावस्थः स्मरो यथा ॥ ४ ॥
अभिलाषोऽथ चिन्ता स्यात्स्मृतिश्च गुणकीर्तनम् ।
उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिरेव च ॥ ५ ॥
जडता मरणं चैव दशमं जायते ध्रुवम् ।
असंप्राप्तौ भवन्त्येतास्तयोर्दश दशा यथा ॥ ६ ॥
व्यवसायो भवेद्यत्र बाढं तत्सं[2]गमाशया ।
संकल्पाकुलचित्तत्वात्सोऽभिलाषः स्मृतो यथा ॥ ७ ॥

'प्रविशति यथा[3] गेहेऽकस्माद्बहिश्च विचेष्टते
वदति च यथा सख्या सार्धं सहासमिहोत्सुका ।
दयितवदनालोके मन्दं यथा च[4] चलत्यसौ
मृगदृशि तथैतस्यां मन्ये[5] स्मरेण कृतं पदम् ॥'

कथं स वल्लभः प्राप्यः किं कुर्यामस्य सिद्धये[6] ।
कथं भवेदसौ वश्य इति चिन्ता मता[7] यथा ॥ ८ ॥

'सत्यं दुर्लभ एष[8] वल्लभतमो रागो ममास्मिन्पुनः
कोऽप्यन्योऽस्ति गुरुर्न चातिनिपुणाः सख्योऽस्य संबोधने ।
संचिन्त्येति मृगीदृशा प्रियतमे दृष्टे श्लथां[9] मेखलां
बध्नन्त्या न गतं स्थितं न च गलद्[10]वासो न वा संवृतम् ॥'

द्वेषो यत्रान्यकार्येषु तदेकाग्रं च मानसम् ।
श्वासैर्मनोरथैश्चापि चेष्टास्ताः स्मरणं यथा ॥ ९ ॥

'इन्दुं निन्दति पद्मकन्दलदलै[11]स्तल्पं न वा मन्यते
कर्पूरं किरति प्रयाति न रतिं प्रालेयधारागृहे ।

---

१. 'कन्द'. २. 'संगमाशयः' ३. 'यथाकस्माद्गेहम्'. ४. 'प्रचलति'. ५. 'शङ्के'. ६. 'तुष्टये'. ७. 'भवेत्'. ८. 'एव'. ९. 'तथा'. १०. 'लसत्'. ११. 'कन्दलदली'; 'कन्दकदली'.

श्वासैः केवलमेव खेदि[1]ततनुर्ध्यायत्यसौ बालिका
यत्तत्कोऽपि युवा [2]ध्रुवं स्मरसुहृच्चेतस्यमुष्याः स्थितः ॥'

सौन्दर्यहसितालापैर्नास्त्यन्यस्तत्समो युवा ।
इति वाणी भवेद्यत्र तदित्थं गुणकीर्तनम् ॥ १० ॥

'[3]तद्वक्त्रं हसितेन्दुमण्डलमिति स्फारं तदालोकितं
सा वाणी जितकामकार्मुकरवा सौन्दर्यमेतस्य तत् ।
इत्थं सं[4]ततमालि वल्लभतमध्यानप्रसक्तात्मन-
श्चेतश्चुम्बितकालकूटमिव मे कस्मादिदं मुह्यति ॥'

[5]यस्मिन्रम्यमरम्यं वा न च हर्षाय [6]जायते ।
[7]प्रद्वेषः प्राणितव्येऽपि स उद्वेगः स्मृतो यथा ॥ ११ ॥

'अभ्यागारं कलयसि पुरश्चक्रवाकीव चन्द्रं
बद्धोत्कम्पं शिशिरमरुता दह्यसे पद्मिनीव ।
प्राणान्धत्से कथमपि चिराद्गच्छतः शल्यतुल्यां-
[8]स्तत्केनासौ सुतनु जनितो मान्मथस्ते विकारः ॥'

बम्भ्रमीति मनो यस्मिन्रत्यौत्सुक्यादितस्ततः ।
वाचः प्रियाश्रिता एव स प्रलापः स्मृतो यथा ॥ १२ ॥

'इत्थं तेन निरीक्षितं न च मयाप्येवं [9]समालोकितं
तेनोक्तं सुभगेन तत्र न मया दत्तं वचो मन्दया ।
तत्सत्यं कथयालि किं स सुभगः [10]कुप्येत मय्युच्चकै-
रित्युक्त्वा सुदृशा कयापि वलितग्रीवं दृशौ स्फारिते ॥'

श्वासप्ररोदनोत्कम्पवसु[11]धोल्लेखनैरपि ।
व्यापारो जायते यत्र स उन्मादः स्मृतो यथा ॥ १३ ॥

'देवी[12]वानिमिषेक्षणा विलिखति क्षोणीं श्वसित्युच्चकैः
किंचिद्ध्यायति निश्चला च[13] बलवद्रोमाञ्चिता कम्पते ।

---

१. 'खिद्यति तनुर्याता'. २. 'सखि'. ३. 'यद्वक्त्रम्'. ४. 'संचित'; 'चर्वित'. ५. 'यत्र'. ६. 'किंचन'. ७. 'प्राणानामिव संदेहः'. ८. 'कस्मान्मुग्धे मनसि विषमस्तन्यते विप्रयोगः'. ९. 'समालोकितः'. १०. 'कुप्येन्न मह्यं गते'. '११. 'वसुधालेखनैः'. १२. 'दीपे वानिमिषेक्षणा'. १३. 'चलचलद्रोमाञ्चिता'.

रोदित्यङ्कगतां विलोक्य सुचिरं वीणामपि[1] व्यापृता
स्वल्पैरेव दिनैरियं वरतनुः केनापि संशिक्षिता ॥'

संतापवेदनप्रायो दीर्घश्वाससमाकुलः ।
तनूकृततनुर्व्याधिरष्टमोऽयं[2] स्मृतो यथा ॥ १४ ॥

'तापः शोषितचन्दनोदकरसः श्वासा विकीर्णोत्पलाः
कर्पूराभिभवप्रचण्डपटिमा गण्डस्थले पाण्डिमा ।
म्लायद्बालमृणालनालललिता प्राप्ता तनुस्तानवं
तन्वङ्ग्याः कथितः[3] स्मरेण गुरुणा कोऽप्येष कष्टक्रमः ॥'

अकाण्डे यत्र हुंकारो दृष्टिः स्तब्धा गता स्मृतिः ।
श्वासाः समधिकाः कार्श्यं जडतेयं मता[4] यथा ॥ १५ ॥

'दृष्टिर्निश्चलतारकाधरदलं[5] श्वासैः कृतं धूसरं
प्राप्तं वासरचन्द्रबिम्बपदवीं वक्त्रं विनष्टा स्मृतिः ।
हुंकारः परमेक एव वचनस्थाने स्थितः सांप्रतं
मन्येऽस्याः कुसुमायुधः सशिबिरः प्रत्यङ्गमावासितः[6] ॥'

उपायैर्विविधैर्नार्या[7] यदि न स्यात्समागमः ।
कंदर्पशरभिन्नाया मरणं जायते[8] ततः ॥ १६ ॥
पुंसोऽपि हि भवन्त्येता दशावस्था मनोभवात् ।
मरणं किं त्वसौन्दर्यात्तयोः कैश्चिन्न वध्यते ॥ १७ ॥
अन्ये तदपि बध्नन्ति प्रत्युज्जीवनकाङ्क्षया[9] ।
वृत्तानुवादे तच्छस्तमुत्पाद्ये प्रायशो नहि ॥ १८ ॥
एकस्मिंस्तु मृतेऽप्यन्यो यदि जीवेत्कथंचन ।
का स्नेहगणना तत्र म्रियते चेन्न[10] संगमः ॥ १९ ॥
पूर्वं नारी भवेद्रक्ता पुमान्पश्चात्तदिङ्गितैः ।
ततः संभोगलीलेति स्वभावसुभगा स्थितिः ॥ २० ॥

---

१. 'वीणामति'. २. 'अष्टमो जायते'. ३. 'कुपितस्मरेण'. ४. 'स्मृता'. ५. 'तलम्'. ६. 'आवेशितः'. ७. 'जनितैः'. ८. 'गद्यते'. ९. 'वाञ्छया'. १०. 'न समन्ततः'.

अन्यथापि न दोषः स्याद्यदि प्रेम समं [1]द्वयोः ।
रक्तापरक्ता वृत्तिश्चेच्छृङ्गाराभास एव सः ॥ २१ ॥

अयं च प्रायशस्तज्ज्ञैरित्थं हास्येषु बध्यते ।
निर्द्रव्येण मया सार्धं वेश्ये मानय यौवनम् ॥ २२ ॥

अनुरक्तो भवेद्यस्यां नायकस्तत्सखीजनम् ।
साम्ना मानेन दानेन बाढमावर्जयत्यसौ ॥ २३ ॥

तस्याग्रे तत्कथां कुर्वन्स्वाभिप्रायं प्रकाशयेत् ।
तदभावे [2]प्रयुञ्जीत [3]काश्चित्प्रव्रजितादिकाः ॥ २४ ॥

तद्वारेण [4]समाख्यातस्वभावो ज्ञाततन्मनाः ।
उपचारैः परैर्लेखै[5]ः साधयेत्तामतन्द्रितः ॥ २५ ॥

ततो दृष्ट्वा विविक्ते तामिन्द्रजालकलादिभिः ।
प्रयोगैर्ललितः स्वैरं विस्मयं परमं नयेत् ॥ २६ ॥

धात्रीसखीवेश्मनि रात्रिचारे महोत्सवे [6]तीव्रतमे भये च ।
निमन्त्रणे व्याधिमिषे[7]ण शून्ये गेहे तयोर्नूतनसंगमः स्यात् ॥२७॥

यदा रागो गुरुः सा च लभ्यते नैव याचिता ।
क्षीणोपायस्तदा [8]कन्यां नायकः साधयेदिति ॥ २८ ॥

परस्त्रीगमनोपायः कविभिर्नोपदिश्यते ।
सुन्दरं किं तु काव्याङ्गमेतत्तेन नि[9]दर्श्यते ॥ २९ ॥

वामता दुर्लभत्वं च स्त्रीणां [10]यां च निवारणा ।
[11]तदेव पञ्चबाणस्य मन्ये परममायुधम् ॥ ३० ॥

बहुमानाद्भयाद्वापि नृणामन्यत्र योषिति ।
प्रच्छन्नकामितं रम्यं [12]सतामपि भवेद्यथा ॥ ३१ ॥

---

१. 'तयोः'. २. 'अनुयुञ्जीत'. ३. 'किंचित्प्रव्रजितादिकम्'; 'कांचित्प्रव्रजितादिकाम्'. ४. 'समाख्याताः स्वभावज्ञातमन्मथः'. ५. 'दोषैः'. ६. 'तीव्रभये वने च'; 'तीव्रतमे वने च'. ७. 'मिषाच्च'. ८. 'नारीं साधयेत्तामतन्द्रितः'. ९. 'निर्दिश्यते'. १०. 'या तु निवारणम्'. ११. 'ता एव'. १२. 'तासामपि'.

'जीर्णे तार्णकुटीरकं निवसनं तल्पीकृतं स्थण्डिले
नीरन्ध्रं तिमिरं किरन्ति सलिलं गर्जन्त एते घनाः ।
गच्छामीति वदत्यसावपि मुहुः शङ्काकुला केवलं
चेतश्चित्रमहो तथापि रमते संकेतके कामिनाम् ॥'

स मानो नायिका यस्मिन्नीर्ष्यया नायकं प्रति ।
धत्ते विकारमन्यस्त्रीसङ्गदोषवशाद्यथा ॥ ३२ ॥

'किंचिद्बाष्पजलावलेपललिते नेत्रे समाकुञ्चिते
रागो विस्फुरणानुबन्धरुचिरः संदर्शितो गण्डयोः ।
कम्पश्चाधरपल्लवे विरचितः कामं कुरङ्गीदृशा
नो जाने किमयं प्रिये प्रकटितः कोपोऽभिलाषोऽथवा ॥'

स प्रायशो भवेत्त्रेधा कामिनीनां प्रियं प्रति ।
अवेक्ष्य दोषमेतस्य गरीयान्मध्यमो लघुः ॥ ३३ ॥
प्रतिनार्यां गते कान्ते स्वयं दृष्टे नखाङ्किते ।
तद्वासोदर्शने गोत्रस्खलिते च[1] गुरुर्यथा ॥ ३४ ॥

'बिम्बोष्ठः स्फुरति प्रयाति पटुतां गण्डस्थले शोणिमा
यातस्तिर्यगमू दृशौ च बलवद्भ्रूयुग्ममुद्भ्राम्यति ।
इत्थं चण्डि तथा तवैष रुचिरः कोपक्रमो जृम्भते
जातोऽयं प्रणतीरपास्य सुतरामेतद्दिदृक्षुर्यथा ॥'

दृष्टे प्रियतमे रागादन्यया सह जल्पति ।
सख्याख्यातेऽथ[2]वा दोषे मानो[3]ऽयं मध्यमो यथा ॥ ३५ ॥

'वाचो वाग्मिनि किं तवाद्य परुषाः सुभ्रु भ्रुवोर्विभ्रमो-[4]
ऽप्युद्भ्रान्तः कुत एष लोलनयने किं लोहिते लोचने ।
नास्त्यागो मयि किं मुधैव कुपितेत्युक्ते पुरः प्रेयसा
मानिन्या जलबिन्दुदन्तुरपुटा दृष्टिः सखीष्वाहिता ॥'

---

१. 'अपि'. २. 'तथा'. ३. 'स्यात्'. ४. 'भ्रमो विभ्रमो भ्राम्यत्किं तव लोल एष नयने'.

सविलासं स्फुरच्चक्षु वीक्षमाणे परां प्रिये ।
किंचिदन्यमनस्केव जायते स लघुर्यथा ॥ ३६ ॥

'मामेव ताडय नितम्बिनि यद्यकस्मा-
त्कोपो भवेत्तव मुखं तु निजं किमेतत् ।
आनीयते शशधरानुकृतिं कपोल-
पालीप्लुतेन घनकज्जलनेत्रवारा ॥'

देशकालबलात्कोपः प्रायशः सर्वयोषिताम् ।
जायते सुखसाध्योऽयं कृच्छ्रसाध्यश्च कामिभिः ॥ ३७ ॥

प्रज्वलितोज्ज्वलदीपं रतिगृहमिन्दूज्ज्वलं च सौधतलम् ।
मधुविधुरीकृतमधुकरमधुरध्वनिबोधितं च कमलवनम् ॥ ३८ ॥

इत्यादिषु प्रदेशेषु मानिनीनामसंशयम् ।
मन्युर्गुरुतरोऽप्याशु सुखसाध्यो भवेद्यथा ॥ ३९ ॥

'दृष्ट्वा चन्द्रमसं मनोभववधूकेलिक्रियाकन्दुकं
प्रोन्मीलन्नवमालतीपरिमलं चाघ्राय मानौषधम् ।
दीपार्चिःकपिशां विविक्तवलभीमालोक्य लोलदृशा
मानिन्या चटुमात्रकेण रमणे मानो मनाङ्मन्दितः ॥'

मधुसमयशशधरोदयकंदर्पमदाधिकेषु कालेषु ।
मानो मनस्विनीनामतिसुखसाध्यो भवेद्भूम्ना ॥ ४० ॥

'चन्द्रश्चन्द्रमुखीक्ष्यतां क्षणमियं संभाव्यतां मञ्जरी
चूतस्य स्मरविद्विषि प्रियतमे कोपेऽपि केयं रतिः ।
इत्युक्ते रुचिरेऽपि तत्करतलं पादाग्रसंवाहने
धुन्वन्त्याः सुदृशो बलात्पुलकिते जङ्घे च दोर्वल्लरी ॥'

दूतीजनस्य पुरतो लघुरपि दोषो गुरूयते प्रायः ।
अभिनवदोषावसरे तथैव वनिताजनस्य यथा ॥ ४१ ॥

---

१. 'प्रायः सर्वोऽपि'. २. 'साध्यस्तु कामिनाम्'. ३. 'मधुरी–'. ४. 'मधुरध्वनि योषितावचनम्'. ५. 'च चित्रवडभी–'. ६. 'मात्रकेऽपि'. ७. 'महादिकेषुः'; 'मदादिकेषु' ८. 'इत्युक्त्वा रुचितेन'. ९. 'संवाहनाच्चुम्बन्त्याः'.

'चरणपतनात्पत्युर्मन्यौ मनाक्शिथिलीकृते
त्यजति च किमप्युत्कम्पत्वं घनस्तनमण्डले ।
तदपि विसरत्सारङ्गाक्ष्या चिरानुनयेच्छया
कथमपि पुरो दृष्ट्वा दूतीं पुनर्भ्रुकुटी कृता ॥'

'चतुरवचनैर्गाढाश्लेषैर्हठात्परिचुम्बनै-
रलकवलनैर्वारं वारं गतोऽप्यतिमन्दताम् ।
अपरवनितासङ्गाल्लग्नं विलोक्य विलेपनं
कुवलयदृशः कोपः कान्ते पुनर्नवतां गतः ॥'

साम दानं च भेदः स्यादुपेक्षा प्रणतिस्तथा ।
तथा प्रसङ्गविध्वंसो दण्डः शृङ्गारहानये ॥ ४२ ॥
तस्याः प्रसादने सद्भिरुपायाः षट् प्रकीर्तिताः ।
सुन्दरास्ते निदर्श्यन्ते सहोदाहृतिभिर्यथा ॥ ४३ ॥
अविनीतोऽपि पाल्योऽहं त्वया सुभ्रु क्षमाभृता ।
इति वाणी भवेद्यत्र तत्सामेति निगद्यते ॥ ४४ ॥

'सत्यं भामिनि दुर्जनोऽस्मि दयिते पाल्यस्तथापि त्वया
यो दोषः स लघुर्मृगाक्षि निर्यतं दीनस्य मे क्षम्यताम् ।
इत्थं जल्पति वल्लभे मृगदृशा चक्षुर्जलं संवृतं
रक्तत्वं विरलीकृतं च वदने दत्तं च किंचिद्वचः ॥'

अलंकारादिकं दद्यान्नायको यत्र तुष्टये ।
उद्दिश्य कारणं किंचिद्दानं लुब्धासु तद्यथा ॥ ४५ ॥

'प्रणयिना निजहारलता स्वयं किल नवेति निवेश्य कुचस्थले ।
पुलकभाजि पुरा कुपिताप्यसौ कृतकचग्रहणं परिचुम्बिता ॥'

यस्मिन्परिजनं तस्याः समावर्ज्य प्रसादतः ।
तेनैव लभते कान्तां कान्ताभेदः स उच्यते ॥ ४६ ॥

---

१. 'किमप्युक्तं पत्रम्'. २. 'चतुरचतुरैः'. ३. 'चुम्बितैर्मधुरवचनैः', ४. 'सततम्'.
५. 'गलत्'. ६. 'विमली–'. ७. 'कुर्यात्'. ८. 'कुच–'. ९. 'प्रसादितम्'.

'धुन्वाना करपल्लवं विदधती दृष्टिं रुषा रागिणीं
तन्वाना वचनानि निष्ठुरतरं मा गाः शठेत्थं मुहुः ।
दूरादायतिभीतिमत्यभिमते स्वैरं स्वसंज्ञाकृता
पूर्वावर्जितया चकोरनयना सख्यैव संबोधिता ॥'

प्रसादनविधिं[1] त्यक्त्वा वाक्यैरन्यार्थसूचकैः ।
यस्मिन्प्रसाद्यते[2] योषिदुपेक्षा सा मता यथा ॥ ४७ ॥

'एतत्किं ननु कर्णभूषणमयं[3] हारः स काञ्ची नवा
बद्धा काचिदियं त्वयाद्य तिलकः[4] श्लाघ्यः प्रिये कल्पितः ।
प्रत्यङ्गं स्पृशतेति तत्क्षणभवद्रोमाञ्चमालाञ्चिता[5]
तन्वी मानमुपेक्षयैव शनकैर्धूर्तेन संमोचिता ॥'

केवलं दैन्यमालम्ब्य पादपातान्नतिर्मता ।
अभीष्टा सा भृशं स्त्रीणां ललिता च भवेद्यथा ॥ ४८ ॥

'कुङ्कुमार्द्रकुचकुम्भलिङ्गितं वीक्ष्य पृष्ठमपराङ्गनाश्रयम् ।
शंसदूनरसमाशु[6] सा मुदं प्राप पादपतितस्य कामिनः ॥'

अकस्माज्जायते यत्र भयहर्षादिभावना ।
सोऽयं प्रसङ्गविध्वंसः[7] कोपभ्रंशात्मको यथा ॥ ४९ ॥

'कथं ममोरसि कृतपक्षनिःस्वनः शिलीमुखोऽपतदिति[8] जल्पति प्रिये ।
निवृत्त्य किं किमिदमिति ब्रुवाणया ससाध्वसं कुपितमलोकि[9] कान्तया ॥'

यथोत्तरं बलीयांस इत्युपायाः प्रसादने[10] ।
आद्यास्त्रयो घनं कार्या विदग्धैः पश्चिमाः क्वचित् ॥ ५० ॥

नातिखेदयितव्योऽयं प्रियः प्रमदया[11] क्वचित् ।
मानश्च विरलः कार्यः प्रणामोत्सवसिद्धये ॥ ५१ ॥

इत्युपायान्प्रयुञ्जीत नायिकापि प्रियं प्रति ।
कुलजा[12] नेर्ष्यते किं तु तत्रान्यत्कारणं भवेत् ॥ ५२ ॥

---

१. 'प्रसाधन–'. २. 'प्रसाध्यते'. ३. 'इयं हारं च'. ४. 'ललिताः श्लाघ्याः'. ५. 'बिम्बितम्'. ६. 'सङ्गभूतरसम्'. ७. 'विभ्रंशः'. ८. 'अगलत्'. ९. 'अमोचि'. १०. 'प्रसाधने'. ११. 'प्रमदमानसः'. १२. 'कुलं नोपेक्षते'.

स्नेहं विना भयं न स्यान्मन्मथो नेर्ष्यया विना।
तस्मान्मानप्रकारोऽयं द्वयोः [1]प्रीतिप्रवर्धनः॥ ९३॥
प्रियसुभग[2]दयितवल्लभनाथस्वामीशकान्तचन्द्रमुखाः।
दयित मनोरम रमणीजीवित इत्यादि नाम स्यात्॥ ९४॥
प्रीतौ भर्तरि सुदृशामप्रीतौ पुनरमूनि शठधृष्टौ।
निर्लज्जदुराचारौ निष्ठुरदुःशीलवानादि॥ ९५॥
गर्वाद्व्यसनत्यागाद्विप्रियकरणाच्च [3]निष्ठुरालापात्।
लोभादतिप्रवासात्स्त्रीणां द्वेष्यः प्रियो भवति॥ ९६॥
परदेशं [4]व्रजेद्यस्मिन्कुतश्चित्कारणात्प्रियः।
स प्रवास इति ख्यातः कष्टावस्थो द्वयोरपि॥ ९७॥

'दृष्टं केसरधूलिधूसरमिदं व्योम क्रमाद्वीक्षिताः
कच्छान्ताश्च शिलीन्ध्रकन्दलभृतः सोढाः कदम्बानिलाः।
सख्यः संवृणुताश्रु मुञ्चत भयं कस्मान्मुधैवाकुला
एतानप्य[5]धुनापि वज्रघटिता नूनं सहिष्ये घनान्॥'

'कामं कर्णकटुः कुतोऽतिमधुरः केकारवः [6]केकिनां
मेघाश्चामृतधारिणोऽपि विहिताः प्रायो विषस्यन्दिनः।
उन्मीलन्नवकन्दलावलिरसौ [7]संद्याप्यसह्यायते
तत्किं यद्विपरीतमत्र न कृतं तस्या वियोगेन मे॥'

कार्श्यजागरमालिन्यचिन्ताद्यं यत्र जायते।
अवस्था [8]विविधाः स्त्रीणां मृत्युश्चेदवधेः परः॥ ९८॥

'अद्यैव यत्प्रतिपदुद्गतचन्द्ररेखा-
सख्यं त्वया तनुरियं गमिता वराक्याः।
कान्ते गते कुसुमसायक तत्प्रभाते
बाणावलीं कथय कुत्र विमोक्ष्यसि त्वम्॥'

---

१. 'प्रीतिप्रकाशकः'. २. 'रुचिर'. ३. 'निष्ठुरारवणात्'. ४. 'गतः कान्तः कुतश्चित्'. ५. 'अधुनाति–'. ६. 'कामिनाम्'. ७. 'सप्यौप्यशय्यायते'. ८. 'त्रिविधाः'.

'निःश्वासैः सह सांप्रतं सखि गता वृद्धिं ध्रुवं रात्रयः
सार्धं लोचनवारिणा विगलितं यत्प्राक्तनं[1] मे सुखम् ।
प्राणाशा तनुतामुपैति च मुहुर्नूनं तनुस्पर्धया
कंदर्पः परमेक एव विजयी यातेऽपि कान्ते स्थितः ॥'

'नीरागोऽधरपल्लवोऽतिमलिना वेणी दृशौ नाञ्जिते
म्लायद्बालमृणालिकाधवलतामालम्बतेऽङ्गच्छविः[2] ।
इत्थं सुभ्रु[3] विसंस्थुलापि विरहव्यापद्विमर्दादियं
सख्येव स्थिरशोभया दृढतरं प्रत्यङ्गमालिङ्गिता ॥'

'किं तत्र नास्ति रजनी किं वा चन्द्रो न[4] सुष्ठुरुचिः ।
येन सखि वल्लभामपि न स्मरति स मां विदेशरुचिः ॥'

'प्रसर शिशिरामोदं कौन्दं समीर समीरय
प्रकटय शशिन्नाशाः कामं मनोभव जृम्भताम् ।
अवधिदिवसः पूर्णः सख्यो विमुञ्चत तत्कथां
हृदयमधुना किंचित्कर्तुं ममान्यदिहेच्छति ॥'

इत्यादिविरहावस्थाः पुंसोऽपि हि भवन्ति ताः ।
कंदर्पशरपाताद्या[5] मा भूवन्वैरिणामपि ॥ ५९ ॥
यत्रैकस्मिन्विपन्ने[6]ऽन्यो मृतकल्पोऽपि तद्गतम् ।
नायकः प्रलपेत्प्रेम्णा करुणोऽसौ स्मृतो यथा ॥ ६० ॥

'दग्धा स्निग्धवधूविलासकदली वाणी समुन्मूलिता[7]
पीता पञ्चमकाकली कवलिता शीतद्युतेः कौमुदी ।
प्लुष्टः स्पष्टमनेकरत्ननिचयो नाहं रतिः केवलं
कंदर्पं दहता हरेण भुवनं निःसारमेतत्कृतम् ॥'

'वक्त्रं चन्द्रमसा दृशौ मृगगणैः केशाः कलापिव्रजै-
र्मातङ्गैः स्तनमण्डलं भुजयुगोल्लासो[8] मृणालैरपि ।

---

१. 'यत्प्राक्तनैः कंकणैः'. २. 'व्यालम्बा तु मृणालिकाधरलता'; 'व्यालम्बालक-मालिकाधवलता'. ३. 'सुष्ठु'. ४. 'न किं च सोऽप्यरुचिः'. ५. 'घातात्'. ६. 'मृतेऽप्यन्यो'. ७. 'मीलिता'. ८. 'भुजलतालासश्चलत्पल्लवैः'; 'भुजलतोल्लासो लतामण्डपैः'; 'भुजलतोल्लासैर्लतामण्डपैः'.

सौगन्ध्यं मलयानिलेन बलिना तन्वी विभज्येति सा
सर्वैर्निष्करुणैर्हृता ध्रुवमहो दैवेन किंचिन्न मे ॥'

'इयतीं सुभगावस्थां गतोऽसि यस्याः कृते स्मरातङ्कात्।
मूर्छां हरामि सा तव गतपुण्या नयनसलिलेन ॥'

'पाशो विपाशित उपाहित एष सान्द्रः
कर्पूररेणुरुपगूढमुरो नताङ्गि।
पापेन येन गमितेति दशाममुष्मि-
न्मूर्छाविरामललितं मयि धेहि चक्षुः ॥'

ग्लानो मुक्ताश्रुरुद्विग्नः स्रस्ताङ्गो मुक्तचेतनः।
सचिन्तो दैन्यभागस्मिन्नेवंप्रायो जनो भवेत् ॥ ६१ ॥
केषांचित्करुणभ्रान्तिः कारुण्यादत्र जायते।
एतस्य मिथुनावस्थां विस्मृत्य रतिमूलजाम् ॥ ६२ ॥
स्त्रीपुंसयोर्भवेदेष सापेक्षः संगमे पुनः।
शृङ्गारवचनप्रायः करुणः स्यात्स चान्यथा ॥ ६३ ॥
तस्माच्छृङ्गार एवायं करुणेनानुमोदितः।
सौन्दर्यं सुतरां धत्ते निबद्धो विरलं बुधैः ॥ ६४ ॥
कारुर्दासी नटी धात्री प्रातिवेश्या च शिल्पिनी।
बाला प्रव्रजिता चेति स्त्रीणां ज्ञेयः सखीजनः ॥ ६५ ॥
कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः।
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः ॥ ६६ ॥
विनोदो मण्डनं शिक्षोपालम्भोऽथ प्रसादनम्।
संगमो विरहाश्वासः सखीकर्मेति तद्यथा ॥ ६७ ॥

'मया कोऽयं मुग्धे कथय लिखितः सत्वरसखी-
वचः श्रुत्वेत्युच्चैर्विनिहितदृशा चित्रफलके।

---

१. 'द्रुतम्'. २. 'उपासितः'. ३. 'इह'. ४. 'विस्मारयति गूढताम्'. ५. 'स्त्रीपुंसोश्च भवत्येष'. ६. 'साक्षेपः'. ७. 'शृङ्गारवचने'.

न वक्तुं तन्वङ्ग्या शकितमथ चोद्दामविदल-
त्कदम्बाकारेण प्रिय इति समाख्यायि वपुषा ॥'

'प्रत्यङ्गं प्रतिकर्म नर्मपरया कृत्वातिरूढस्मरा-
दौत्सुक्यं प्रविलोक्य मोहनविधौ [1]चातुर्यमालोक्य च ।
सख्या यावकमण्डनं विरचितं पादे [2]कुरङ्गीदृशा
ससेरं विशदच्छदे च शयने दृष्टिः समारोपिता ॥'

'नीरन्ध्रं परिरभ्यते प्रियतमो भूयस्तरां चुम्ब्यते
तद्गाढं क्रियते यदस्य [3]रुचितं चाटूच्चकैस्तन्यते ।
सख्या मुग्धवधूरियं रतिविधौ यत्नेन संशिक्षिता
निर्भ्रान्तं गुरुणा पुनः शतगुणं पुष्पेषुणा कारिता ॥'

'सुभग भवता ह्येतस्या ज्वलत्स्मरपावके-
ऽप्यभिनिविशता प्रेमाधिक्यं चिरात्प्रकटीकृतम् ।
तव तु हृदये शीतेऽप्येवं सदैव सुखाप्तये
मम सहचरी सा निःस्नेहा मनागपि न स्थिता ॥'

'कोपं विमुञ्च कुरु नाथ वचो मदीय-
माश्वासय स्मरकृशानुकृशां कृशाङ्गीम् ।
एकाकिनी कठिनतारकराजकान्त्या
पञ्चत्वमाशु ननु यास्यति सा वराकी ॥'

'अमुं दधेऽशुकमहमत्र पादपे युवामलं निभृतमिहैव तिष्ठताम् ।
[5]रहःस्थयोरिदमभिधाय कामिनोः [6]स्वयं ययौ निपुणसखी लतान्तरम् ॥'

'स्फुरति यदिदमुच्चैर्लोचनं तन्वि वामं
स्तनतटमपि धत्ते चारुरोमाञ्चमालाम् ।
कलयति च यदन्तःकम्पतामूरुकाण्डं
ननु वदति तदद्य प्रेयसा संगमं ते ॥'

---

१. 'चातुर्यमस्याः पुनः'. २. 'कुरङ्गीदृशः'. ३. 'रुचिरं चाटुत्वमातन्यते'. ४. 'तारकनाथ–'. ५. 'रहस्तयोः'. ३. 'पुरः'. ७. 'अभिधत्ते'.

इत्यादि विविधं सख्यो व्यापारं कुर्वते सदा ।
[1]योषितां मन्त्रसर्वस्वनिधानकलशोपमाः ॥ ६८ ॥
इत्थं विरचनीयोऽयं शृङ्गारः [2]कविभिः सदा ।
अनेन रहितं काव्यं प्रायो नीरसमुच्यते[3] ॥ ६९ ॥
इत्थं विचार्य प्रचुरप्रयोगान्योऽमुं निबध्नाति रसं रसज्ञः ।
तत्काव्यमारोप्य पदं विदग्धवक्त्रेषु विश्वं परिबम्भ्रमीति ॥७०॥

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलकाभिधाने काव्यरसालंकारे
विप्रलम्भो नाम द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

विकृताङ्गवचःकृत्यवेषेभ्यो जायते रसः ।
[4]हास्योऽयं हासमूलत्वात्पात्रत्रयगतो यथा ॥ १ ॥
किंचिद्विकसितैर्गण्डैः किंचिद्विस्फारितेक्षणैः[5] ।
किंचिल्लक्ष्यैर्द्विजैः[6] सोऽयमुत्तमानां भवेद्यथा ॥ २ ॥
'[7]पाणौ कङ्कणमुत्फणः फणिपतिर्नेत्रं ज्वलत्पावकं
कण्ठः कुण्ठितकालकूट[8]कुटिलो वस्त्रं गजेन्द्राजिनम् ।
गौरीलोचनलोभनाय सुभगो वेषो वरस्येति मे
गण्डोल्लासविभावितः पशुपतेर्हासोद्गमः पातु वः ॥'
मध्यमानां भवत्येष विवृताननपङ्कजः ।
नीचानां निपतद्बाष्पः श्रूयमाणध्वनिर्यथा ॥ ३ ॥
'मुग्धे त्वं सुभगे न वेत्सि मदनव्यापारमद्यापि तं
नूनं ते[9] जलजैषिणायमलिना दृष्टो न भर्त्राधरः ।
[10]सख्यैवं हसितं वधूं प्रति तथा सानन्दमाविर्भव-
[11]द्वक्त्रान्तर्गतसीधुवासरसिकैर्भृङ्गैर्यथा धावितम् ॥'

---

१. 'योषितामत्र सर्वस्वं निधानकलशोपमम्'. २. 'कविना'. ३. केषुचित्पुस्तकेष्वस्माच्छ्लोकादग्रे 'तव नाथानुरागोऽयं मद्विधैः कथमुच्यते । येनैकापि प्रिया नीता पञ्चत्वं पुण्यकारिणा ॥' अयं श्लोको वर्तते. ४. 'हासः'. ५. 'ईक्षणः'. ६. 'द्विजः'. ७. 'पाण्योः'; 'बाहौ'. ८. 'घटितः'. ९. 'ते जलजेक्षणेयम्'; 'तेऽञ्जदलैषिणायम्'. १०. 'सख्येत्थम्'. ११. 'वक्त्रान्तर्घन—'; 'वक्त्रान्तर्नव—'.

'त्यक्त्वा गुञ्जफलानि मौक्तिकमयी भूषा स्तनेष्वाहिता
　　स्त्रीणां कष्टमिदं कृतं सरसिजं कर्णे न बर्हिच्छदम्[1] ।
इत्थं नाथ तवारिधाम्नि शबरैरालोक्य चित्रस्थितिं
　　बाष्पार्द्रीकृतलोचनैः[2] स्फुटरवं दारैः समं हस्यते ॥'
अस्मिन्सखी[3]कराघातनेत्रोल्लासाङ्गवर्तनम् ।
नासाकपोलविस्पन्दो[4] मुखरागश्च जायते ॥ ४ ॥
शोकात्मा करुणो ज्ञेयः प्रियभृत्यधनक्षयात् ।
तत्रेत्थं नायको दैवहतः स्याद्दुःखभाजनम् ॥ ५ ॥
'भर्ता संगर एव मृत्युवसतिं प्राप्तः समं बन्धुभि-
　　र्यूनां[5] काममियं दुनोति च मनो वैधव्यभावाद्वधूः[6] ।
बालो दुस्त्यज एक एव च शिशुः कष्टं कृतं वेधसा
　　जीवामीति महीपते प्रलपति त्वद्वैरिसीमन्तिनी ॥'
भूपातो दैवनिन्दा च रोदनं दीननिःस्वनः[7] ।
शरीरताडनं मोहो वैवर्ण्यं चात्र जायते ॥ ६ ॥
क्रोधात्मको भवेद्रौद्रः प्रतिशत्रूर्नमर्षतः[8] ।
रक्षःप्रायो[9] भवेदत्र नायकोऽत्युग्रविग्रहः ॥ ७ ॥
'यैः प्राणापहतिः कृता मम पितुः[10] क्षुद्रैर्युधि क्षत्रियै
　　रामोऽहं रमणीर्विहाय बलवन्निःशेषमेषां हठात् ।
भास्वत्प्रौढकुठारकोटिघटनाकाण्डत्रुटत्कंधरा-
　　स्रोतोऽन्तःस्रुतविस्रशोणितभरैः कुर्यां क्रुधां[11] निर्वृतिम् ॥'
मुखरागायुधोत्क्षेपस्वेदकम्पाधरग्रहाः ।
शक्तिशंसा कराघातो भ्रुकुटी चात्र जायते ॥ ८ ॥
उत्साहात्मा भवेद्वीरो दयादानाजिपूर्वकः ।
त्रिविधो नायकस्तत्र जायते सत्त्वसंयुतः ॥ ९ ॥

---

१. 'बर्हच्छदम्'. २. 'लोचनम्'. ३. 'सखि'. ४. 'निःस्पन्दः'. ५. 'प्रौढानामनिशम्'. ६. 'लाभात्'. ७. 'भाषणम्'. ८.'अमर्षणः'. ९. 'क्रुद्धप्रायः'. १०. 'गुरोः'. ११. 'क्रुधः'.

गाम्भीर्यौदार्यसौन्दर्यशौर्यधैर्यादिभूषितः ।
आवर्जितजनो जन्यनिर्व्यूढप्रौढविक्रमः ॥ १० ॥

'अयि विहंग वराक कपोतकं विसृज धेहि धृतिं मम मेदसा ।
शिबिरहं भवता विदितो न किं सकलसत्त्वसमुद्धरणक्षमः ॥'

'सुखितोऽसि हरे नूनं भुवनत्रयमात्रलब्धितोषेण ।
बलिरर्थितदोऽस्मि यतो न याचितः किंचिदप्यधिकम् ॥'

'यैत्रैरावणदन्ततीव्रमुसलैरेरण्डकाण्डायितं
वज्रेणापि विकीर्णवह्नितितिना मार्णालनालायितम् ।
मद्वक्षस्यवलम्ब्य किंचिदधुना तद्विस्मृतं वज्रिणा
युद्धं यद्यवलम्बते स तु पुनः सज्जोऽस्म्यहं रावणः ॥'

धृतिगर्वौद्धत्यमतिस्मृतिरोमाश्चा भवन्ति चामुष्मिन् ।
विविधा वाक्यक्षेपाः सोत्साहामर्षवेगाश्च ॥ ११ ॥

भयानको भयस्थायिभावोऽसौ जायते रसः ।
शब्दादेर्विकृताद्वाढं बालस्त्रीनीचनायकः ॥ १२ ॥

'श्रुत्वा तूर्यनिनादं द्वारे भयचकितलैलितबाहुलतः ।
धन्यस्य लगति कण्ठे मुग्धशिशुर्धूलिधूसरितः ॥'

'प्रणयकलहसङ्गान्मन्युभाजा निरस्तः
प्रकटितचटुकोटिः पादपद्मानतोऽपि ।
नवजलधरगर्जेर्भीतयासौ कयाचि-
त्त्रुटिततरलहारं सस्वजे प्राणनाथः ॥'

'कम्पोपरुद्धसर्वाङ्गैर्गलत्स्वेदोदबिन्दुभिः ।
त्वया रुद्धैर्महीपाल वैरिभिर्वनितायितम् ॥'

वैवर्ण्यमश्रु संत्रासो हस्तपादादिकम्पनम् ।
स्वेदास्यशोषदिक्प्रेक्षासंभ्रमाश्च प्रकीर्तिताः ॥ १३ ॥

---

१. 'बाढम्'. २. 'बलिरर्थितोऽस्मि नियतम्'. ३. 'यत्रैरावततीव्रदन्त'. ४. 'औत्सुक्य–'. ५. 'गाढम्'. ६. 'चलित–'. ७. 'सर्वाङ्गगलत्–'. ८. 'त्वया लब्धैः'; 'त्वयारब्धैः'.

जुगुप्साप्रकृतिर्ज्ञेयो बीभत्सोऽहृद्यदर्शनात् ।
श्रवणात्कीर्तनाद्वापि पूत्यादिविषयाद्यथा ॥ १४ ॥

'लुठत्कृमिकलेवरं स्रवदसृग्वसावासितं
विशीर्णशवसंततिप्रसरदुग्रगन्धान्वितम्[1] ।
भ्रमत्प्रचुरपत्रिकं त्रिकविवर्तिनृत्यक्रिया-[2]
प्रवीणगुणकौणपं परिबभौ परेताजिरम् ॥'

नासाप्रच्छादनं वक्त्रकूणनं गात्रसंवृतिः ।
निष्ठीवनादि चात्र स्यादुद्वेगादुत्तमेष्वपि ॥ १५ ॥
विस्मयात्माद्भुतो ज्ञेयो रसो रसविचक्षणैः ।
मायेन्द्रजालदिव्यस्त्रीविपिनाद्युद्भवो यथा ॥ १६ ॥

'सत्यं हृता त्वया हंस वनितानामियं गतिः ।
भ्रमन्त्येतास्तथाप्येतदिन्द्रजालं तदद्भुतम् ॥'

गद्गदः साधुवादश्च स्वेदः पुलकवेपथू ।
दृष्टेर्निश्चलतारत्वं विकासश्चात्र जायते ॥ १७ ॥
सम्यग्ज्ञानोद्भवः शान्तः समत्वात्सर्वजन्तुषु ।
गतेच्छो[3] नायकस्तत्र तमोरागपरिक्षयात् ॥ १८ ॥

'धनमहरहर्दत्तं स्वीयं यथार्थितमर्थिने[4]
कृतमरिकुलं नारीशेषं स्वखड्गविजृम्भितैः[5] ।
प्रणयिनि जने रागोद्रिक्ते रतिर्विहिता चिरं
किमपरमतः कर्तव्यं नस्तनावपि नादरः ॥'

निरालम्बं मनो ह्यत्र[6] बाढमात्मनि तिष्ठति ।
सुखे नेच्छा तथा दुःखेऽप्युद्वेगो नात्र जायते ॥ १९ ॥
अष्टावमी रसाः पूर्वं ये प्रोक्तास्तत्र निश्चितम्[7] ।
प्रत्यनीकौ रसौ द्वौ द्वौ तत्संपर्कं विवर्जयेत् ॥ २० ॥

---

१. 'गन्ध्यार्दितम्'. २. 'नृत्यक्रियाप्रवीणकुणपं परम्'. ३. 'गतेर्ष्यः'. ४. 'यथायथम्'.
५. 'स्वबाहु–'. ६. 'यत्र'. ७. 'प्रोक्तास्तत्र विनिश्चितम्'; 'यथोक्तास्तत्र निश्चितम्'.

शृङ्गारबीभत्सरसौ तथा वीरभयानकौ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ २१ ॥
हास्यो भवति शृङ्गारात्करुणो रौद्रकर्मतः[1]।
अद्भुतश्च तथा वीराद्बीभत्साच्च भयानकः ॥ २२ ॥
यौ[2] जन्यजनकावेतौ रसावुक्तौ मनीषिभिः।
युक्त्या कृतोऽपि संभेदस्तयोर्बाढं न दुष्यति ॥ २३ ॥
केचिद्रसविभागेषु भावाः पूर्वं प्रदर्शिताः।
स्वातन्त्र्येणेह कीर्त्यन्ते रम्यास्ते कृतिनां मताः ॥ २४ ॥
रत्यादय इमे भावा रसाभिप्रायसूचकाः।
पञ्चाशत्स्थायिसंचारिसात्त्विकास्तान्निबोधत ॥ २५ ॥
शृङ्गारादिरसेष्वेव भावा रत्यादयः स्मृताः।
प्रत्येकं स्थैर्यतोऽन्ये[3] च त्रयस्त्रिंशच्चराः स्मृताः[4] ॥ २६ ॥
प्रायोऽनवस्थिते चित्ते भावाः संकीर्णसंभवाः।
बाहुल्येन निगद्यन्ते तथाप्येते यथा स्थिताः ॥ २७ ॥
शङ्कासूया भयं ग्लानिर्व्याधिश्चिन्ता स्मृतिर्धृतिः।
औत्सुक्यं विस्मयो हर्षो व्रीडोन्मादो मदस्तथा ॥ २८ ॥
विषादो जडता निद्रावहित्थं चापलं स्मृतिः[5]।
इति भावाः प्रयोक्तव्याः शृङ्गारे व्यभिचारिणः ॥ २९ ॥
श्रम[6]श्चपलता निद्रा[7] स्वप्नो ग्लानिस्तथैव च।
शङ्कासूयावहित्थं च हास्ये भावा भवन्त्यमी ॥ ३० ॥
दैन्यं चिन्ता तथा ग्लानिर्निर्वेदो जडतास्मृतिः[8]।
व्याधिश्च करुणे ज्ञेया भावा भावविशारदैः ॥ ३१ ॥
हर्षोऽसूया तथा गर्व उत्साहो मद एव च।
चापल्यमुग्रता वेगो रौद्रे भावाः प्रकीर्तिताः ॥ ३२ ॥

---

१. 'धर्मतः'. २. 'द्वौ'. ३. 'ये च'. ४. 'यथा'. ५. 'मतिः'. ६. 'श्रमः'. ७. 'स्वप्नो हर्षो ग्लानिः'. ८. 'जडताधृतिः'; 'जडता मृतिः'. ९. 'वाच्याः'.

अमर्षः [1]प्रतिबोधश्च वितर्कोऽथ मतिर्धृतिः ।
क्रोधोऽसूयाश्रु संमोह आवेगो रो[3]महर्षणम् ॥ ३३ ॥
गर्वो मदस्तथोग्रत्वं भावा वीरे भवन्त्यमी ।
संत्रासो मरणं चैव वचनीयं भयानके ॥ ३४ ॥
अपस्मारो विषादश्च भयं वेगो मतिर्मदः ।
उन्मादश्चेति विज्ञेया भावा बीभत्ससंभवाः ॥ ३५ ॥
आवेगो जडता मोहो विस्मयो हर्षणं मतिः ।
इति भावान्निबध्नन्ति रसेऽस्मिन्नद्भुते बुधाः ॥ ३६ ॥
एवं संचारिणो भावा ज्ञेयाः प्रतिरसं स्थिताः ।
सात्त्विकास्तु भवन्त्येते सर्वे सर्वरसाश्रयाः ॥ ३७ ॥
या नृत्यगीतप्रमदोपभोग[7]वेषाङ्गसंकीर्तनचारुबन्धा ।
माधुर्ययुक्ताल्पसमासरम्या वाणी स्मृतासाविह कैशिकीति ॥३८॥
शृङ्गारहास्यकरुणरसानां परिवृद्धये ।
एषा वृत्तिः [9]प्रयोक्तव्या प्रयत्नेन बुधैर्यथा ॥ ३९ ॥

'सौन्दर्यं [10]शशलाञ्छनस्य कविभिर्मिथ्यैव तद्वर्ण्यते
[11]सौभाग्यं क्व नु पङ्कजस्य रजनीसंभोग[12]भिन्नत्विषः ।
इत्यालोच्य चिराय चारु रुचिमत्रस्यत्कुरङ्गीदृशो
वीक्षेते नवयौवनोन्नतमुखौ मन्ये स्तनावाननम् ॥'

'हस्तेषुः कुसुमायुधस्य ललितं रागश्रियो लोचनं
[13]सौभाग्यैकगृहं विलासनिकषो वैदग्ध्यसिद्धिध्वजः ।
साक्षीदं [14]मदबान्धवस्य निभृतं कस्यापि [15]लीलानिधेः
कक्षान्तर्नखमण्डनं सखि नवं [16]प्रच्छाद्यतां वाससा ॥'

---

१. 'प्रतिवेगश्च'. २. 'अथ संहर्षः'. ३. 'शोकमर्षणम्'; 'शोकहर्षणम्'. ४. 'इति'. ५. 'सर्वैरसस्थिता'; 'सर्वैरसान्विताः'. ६. अस्माच्छ्लोकादग्रे 'कैशिक्यारभटी चैव' इत्यादि प्रथमपरिच्छेदागतः श्लोकः केषुचित्पुस्तकेषु दृश्यते. ७. 'भोगैर्देशाङ्ग'. ८. 'कारुण्यरसातिशयसिद्धये'. ९. 'प्रयत्नेन प्रयोज्या विबुधैर्यथा'. १०. 'मृग–'. ११. 'शोभैव'; 'शोभेदृक्'. १२. 'भिन्न–'. १३. 'भोगस्यैव ग्रहम्'. १४. 'मधु–'. १६. 'लीलावधिः'. १६. 'संगच्छताम्'.

'समुल्लसत्काञ्चनकुण्डलोज्ज्वलप्रभापि तापाय बभूव येष्वलम्[1] ।
विलासिनीरम्यमुखाम्बुजन्मसु प्रजज्वलुस्तेष्वकृशाः कृशानवः ॥'

या चित्रयुद्धभ्रमशस्त्रपातमायेन्द्रजालप्लुतिलङ्घिताढ्या ।
ओजस्विगुर्वक्षरबन्धगाढा[2] ज्ञेया बुधैः सारभटीति वृत्तिः ॥ ४० ॥

रौद्रे भयानके चैव बीभत्से च विचक्षणैः ।
काव्यशोभाकरी वृत्तिरियमित्थं[3] प्रयुज्यते ॥ ४१ ॥

'शस्त्रोद्दारितकुम्भिकुम्भविगलद्रक्ताक्तमुक्ताफलं
स्फारस्फूर्जितकान्तिकल्पितबृहच्चञ्चच्चतुष्कायितम्[4] ।
क्रोधोद्धावितधीरधोरणलसत्खड्गाग्रमुग्राग्रहं[5]
युद्धं सिद्धवधूगृहीतसुभटं जातं तदा दुर्धरम् ॥'

'नायं गर्जिरवो गभीरपुरुषं तूर्यं तदीयं त्विदं
नैते भीमभुजंगभोगरुचयो मेघा इमे तद्गजाः ।
इत्थं नाथ नवाम्बुवाहसमये त्वत्सैन्यशङ्काकुला
म्लायद्वक्त्ररुचो विरोधिवनितास्त्रस्यन्ति नश्यन्ति च ॥'

'पिबन्नसृक्स्वदन्मांसमाकर्षन्नन्त्रमालिकाम्[6] ।
कबन्धसंकुले क्रोष्टा भ्रमत्येष[7] महारणे ॥'

हर्षप्रधानाधिकसत्त्ववृत्तिस्त्यागोत्तरोदारवचोमनोज्ञा ।
आश्चर्यसंपत्सुभगा च या स्यात्सा सात्वती नाम मतात्र वृत्तिः[8] ॥ ४२ ॥

नातिगूढार्थसंपत्तिः[9] श्रव्यशब्दमनोरमा[10] ।
वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा मता यथा ॥ ४३ ॥

'लक्ष्म्यास्त्वं जनको निधिश्च पयसां निःशेषरत्नाकरो
मर्यादानिरतस्त्वमेव जलधे ब्रूतेऽत्र कोऽन्यादृशम् ।
किं त्वेकस्य गृहं गतस्य वडवावह्नेः सदा तृष्णया
क्लान्तस्योदरपूरणेऽपि[11] न सहो यत्तन्मनाङ्मध्यमम् ॥'

---

१. 'केवलम्'. २. 'वर्णाद्भुतदुर्विगाढा'; 'गुर्वक्षरदुर्विगाढा'. ३. 'रीतिः'. ४. 'चतुष्कार्चितम्'. ५. 'मुक्ताग्रहम्'. ६. 'अदन्मांसम्'. ७. 'नदति'. ८. 'वृत्त्या'. ९. 'सशास्त्रा'. १०. 'श्लथशब्दा'. ११. 'क्रान्तस्य'.

'[1]स्फारितोत्कटकठोरतारकाकीर्णवह्निकणसंततिः क्रुधा ।
दुर्निमित्ततडिदाकृतिर्बभौ दृष्टिरिष्टसमरांशुमालिनः ॥'

'अत्यद्भुतं नराधिप तव कीर्तिर्धवलयन्त्यपि जगन्ति ।
रक्तान्करोति सुहृदो मलिनयति च वैरिवदनानि ॥'

'निवृत्तविषयासङ्ग[2]मधुना सुचिराय मे ।
आत्मन्येव समाधानं मनः केवलमिच्छति ॥'

प्रधानपुरुषप्राया सद्वक्रोक्तिनिरन्तरा ।
भारतीयं भवेद्वृत्तिर्वीरहास्याद्भुताश्रया ॥ ४४ ॥

'जन्मदेहवध[3]बन्धनादिकं तुल्यमेतदितरैः समं सताम् ।
यत्तथापि वि[4]पुलाचलाः श्रियः साहसैकपरतात्र कारणम् ॥'

'[5]यशोदाकृतरक्षस्य शासितुर्भुवनद्रुहाम् ।
बाल्ये निभृतगम्भीरो हरेर्हासः पुनातु वः ॥'

'निर्भयोऽप्येष भूपालस्तद्ददाति द्विषां युधि ।
असत्तेषु यशः शुभ्रमादत्ते चेदमद्भुतम् ॥'

इत्यादि रम्याः प्रविलोक्य वृत्तीर्दृष्ट्वा निबन्धांश्च महाकवीनाम् ।
[6]आलोक्य वैचित्र्यमिदं विदध्यात्काव्यं कविः सज्जनचित्तचौरम् ४५

विरसं प्रत्यनीकं च दुःसंधानरसं तथा ।
नीरसं पात्रदुष्टं च काव्यं सद्भिर्न शस्यते ॥ ४६ ॥

विहाय जननीमृत्युशोकं मुग्धे मया सह ।
यौवनं मानय स्पष्टमित्यादि विरसं [7]मतम् ॥ ४७ ॥

[8]प्रबन्धे नीयते यत्र रस एको निरन्तरम् ।
महतीं वृद्धिमिच्छन्ति नीरसं तच्च केचन ॥ ४८ ॥

नखक्षतो[9]च्छलत्पूतिप्लुतगण्डस्थलं रतौ ।
पि[10]बामि वदनं तस्याः [11]प्रत्यनीकं तदुच्यते ॥ ४९ ॥

---

१. 'स्पष्टितोत्कट–'. २. 'मधुरम्'. ३. 'वेदनादिकम्'. ४. 'विपुलाश्चलाः श्रियः'; 'चटुला वरश्रियः'; 'विपुलाचलाश्रयः'. ५. 'यशोदाहित–'. ६. 'आलोच्य चौचित्य–'. ७. 'यथा'. ८. अयं श्लोकः केषुचित्पुस्तकेषु नास्ति. ९. 'उल्लसत्पूतिप्लुत्या'. १०. 'स्मरामि'. ११. 'प्रत्यनीकमिदं भवेत्'; 'प्रत्यनीकरसं यथा'.

तामेवानुचितां गच्छ ज्वलिता त्वत्कृते तु या।
किं ते कृत्यं मया धूर्त दुःसंधानरसं त्विदम् ॥ ९० ॥
दुर्जनो दयितः कामं मनो म्लानं मनोभवः।
कृशो वियोगतप्तायास्तस्या इत्यादि नीरसम् ॥ ९१ ॥
मुग्धा व्याजं विना वेश्या कन्येयं निपुणा रतौ।
कुलस्त्री सर्वदा धृष्टा पात्रदुष्टं त्विदं मतम् ॥ ९२ ॥
अन्येष्वपि रसेष्वेते दोषा वर्ज्या मनीषिभिः।
यत्संपर्कान्न यात्येव काव्यं रसपरम्पराम् ॥ ९३ ॥
इति मया कथितेन पथामुना रसविशेषमशेषमुपेयुषा।
ललितपादपदासदलंकृतिः कृतधियामिह वाग्वनितायते ॥ ९४ ॥
शृङ्गारतिलको नाम ग्रन्थोऽयं ग्रथितो मया।
व्युत्पत्तये निषेवन्तु कवयः कामिनश्च ये ॥ ९५ ॥
कान्या काव्यकथा कीदृग्वैदग्धी को रसागमः।
किं गोष्ठीमण्डनं हन्त शृङ्गारतिलकं विना ॥ ९६ ॥
त्रिपुरवधादेव गतामुल्लासमुमां समस्तदेवनताम्।
शृङ्गारतिलकविधिना पुनरपि रुद्रः प्रसादयति ॥ ९७ ॥

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलकाभिधाने काव्यरसालंकारे
हास्यादिरसनिरूपणं नाम तृतीयः परिच्छेदः।

भट्टश्रीमाधवकविप्रणीतं
दानलीलाकाव्यम्।

अस्ति स्वस्तिकरी समस्तजगतां निर्वाणगर्वापहा
क्षोणीमण्डलमध्यभूषणमणिः काचित्पुरी माधवी।

---

१. 'अत्र'. २. 'मानम्लानः'; 'गतो ग्लानिम्'. ३. 'कविपरम्पराम्'. ४. 'स्वयम्'. ५. 'वैदग्ध्यम्'. ६. 'मण्डलम्'. ७. 'तिलकादृते'. ८. 'विबुधनुताम्'. ९. 'प्रसाधयति'. केषुचित्पुस्तकेषु 'त्रिपुरवधादेव' इत्याद्यान्तिमार्या नास्ति. १०. कवेर्देशकालौ ग्रन्थान्ते स्फुटावेव. प्रणयिमाधवचम्पू-सुभद्राहरणादिग्रन्थकर्तुर्मण्डलेश्वरभट्टसूनोर्माधवभट्टादयं भिन्नो माधवभट्टः.

रम्या कृष्णतरङ्गिणीसहचरी कर्मद्रुमोन्मूलिनी
सत्यानन्दचिदात्मनोऽनवरतस्वेच्छाविहारस्थली ॥ १ ॥
स्निग्धच्छायतरुप्रसूनविलसन्माधुर्यलोभभ्रम-
त्कालिन्दीपुलिनोपवर्ति पवनप्रालेयितप्राङ्गणम् ।
ब्रह्मेन्द्रादिसुरेन्द्रमृग्यमहिम प्रेमैकलभ्यं परं
पूर्णब्रह्मरहोविहारभवनं तत्रास्ति वृन्दावनम् ॥ २ ॥
नित्यानेकफलप्रवालसुमनःशीतोष्णवर्षादिभि-
र्यस्मिन्कालगुणैस्त्रिकालविदुषां याता मतिर्मुग्धताम् ।
श्रीराधामुखकर्णभूषणलसन्माणिक्यचन्द्रांशुभि-
र्नित्योद्यत्किरणैः क एष समयो निर्णेतुमित्यञ्जसा ॥ ३ ॥
ये राधारतिकान्तकोमललसत्पादारविन्दद्वय-
प्रस्यन्दन्मकरन्दपानमुदितस्वात्मेन्द्रियेन्दिन्दिराः ।
धर्मादित्रितयं चतुर्विधमपि श्रेयस्तृणीकुर्वते
तेषामेव परं मनः सुकृतिनां यस्मिन्नरीनृत्यते ॥ ४ ॥
क्रीडाकौतुकमीक्षितुं भगवतः सर्वे सुनन्दादयो
ब्रह्मामर्त्यमुनीन्द्रसिद्धविबुधा नन्दव्रजानन्दिनः ।
भूत्वा चन्द्रकिकीरकोककलरुत्कादम्बमुख्यद्विजा
यस्मिन्कृष्णमृगादयो मृगवरा निर्वैरमध्यासते ॥ ५ ॥
तत्र श्रीरमणः कलिन्दतनयातीरोल्लसन्मालती-
वल्लीपल्लवमल्लिकावलयितद्योतन्निकुञ्जालिषु ।
वंशीवादविनोदनोदितमनोजन्मोपनीतव्रज-
क्षामाङ्गीमिषवेदशेखरगिरां वृन्दैरलं क्रीडति ॥ ६ ॥
तल्लीलेक्षणविस्मृतेक्षणगणैरेणाङ्कयानादिव
भ्रश्यद्भिर्भगणैरनङ्गरभसादेणीदृगानन्दिनः ।
त्रुट्यन्मौक्तिकदामकाञ्चनरणत्काञ्चीक्वणन्नूपुरैः
स्रंसत्कुन्तलमल्लिकादिसुमनःसंघैर्बभौ केलिभूः ॥ ७ ॥
इत्थं मञ्जुतरस्थलीषु नलिनीगेहेषु कल्लोलिनी-
कूलान्तःपुलिनेषु च प्रमदयन्सोऽरीरमद्रात्रिषु ।

नानाकामकलाविनीतवनिताभावैरनेकैर्मुहु-
र्मुष्णन्तीर्हृदयंगमैरपि मनः कंदर्पदर्पापहः ॥ ८ ॥

आभीरार्भकमण्डलैः परिवृतो वृन्दं गवां चारय-
न्वृन्दारण्यपुरंदरोऽरुणभुवस्तीरे[1] मनोहारिणि ।
गुञ्जाबर्हदलप्रसूनविहितप्रत्यङ्गभूषोत्सवो
गायन्वेणुरवैर्दिवापि कृतिनः संलालयन्क्रीडति ॥ ९ ॥

एकस्मिन्दिवसेऽव्रजद्व्रजपतिर्गोपात्मजैरन्वितः
प्रातर्नैव कृताशनो मुरलिकामापूर्य रम्यं वनम् ।
तत्र सैत्य वनस्थलीषु विहरन्प्रत्यग्रनानाविध-
स्वेच्छाकल्पितकेलिभिर्विलसति प्रेमैकलभ्यो हरिः ॥ १० ॥

ऊचुर्गोकुलपालकाः क्वचिदमुं कृष्णं क्षुधासंप्लुताः
किंचिच्चिन्तय तत्र तान्व्रजपतिः प्रत्यब्रवीत्पश्यत ।
विक्रेतुं व्रजसुन्दरीर्दधिपयो यान्तीः पुरं चेत्तदा
याचध्वं पुरतः करं यदि न ता दास्यन्त्यथो लुण्ठत ॥ ११ ॥

श्रुत्वैवं वचनानि गोकुलपतेरारुह्य केचिद्द्रुमा-
न्दूरादेव विलोक्य गोपयुवतीर्मन्द्रक्वणन्नूपुराः ।
धम्मिल्लग्रथितप्रसूननिकरैर्वीथीरलंकुर्वती-
र्गोस्तन्यामृतपूर्णभाजनलसन्मौलीर्मुदावातरन् ॥ १२ ॥

वक्रोक्तिप्रखराः स्वभावचपला नन्दात्मजं संश्रिता-
स्तस्थुर्गोकुलयोषितां तत इतः संवृत्य केचित्पुरः ।
पन्थानं प्रतिरुध्य कण्टकिलताकीर्णद्रुमैः संकुलं
बर्होत्तंसवनप्रसूनसुभगा वेत्रैकहस्तास्ततः ॥ १३ ॥

तावन्मुग्धवधूजनः कलरवं गायन्यशः श्रीपतेः
काञ्चीनादविभिन्ननूपुररणत्कारैर्मुनीनामपि ।
अन्तः[2] पञ्चशरानुगं विरचयन्नन्योन्यहासोक्तिभि-
र्हस्तान्दोलनतालिकाभिरभितः खेलञ्शनैरभ्यगात् ॥ १४ ॥

---

१. यमुनातटे. २. अन्तःकरणम्.

आयान्तीर्व्रजसुन्दरीः कलपदं स्वच्छन्दमुद्वीक्ष्य ता
गायन्तीः प्रतिवीथि गोपपृथुका वेत्रोल्लसत्पाणयः ।
वल्गन्तश्च मुहुः सहासशपथं संत्रासयन्तश्च ता
धावन्तश्च ततस्ततो रुरुधिरे प्रत्येकमत्युद्धताः ॥ १५ ॥

काश्चित्क्वापि निलिल्यिरे तत इतो निर्गत्य काश्चिद्ययुः
काश्चित्संभ्रमवीक्षणाश्च चकिताः काश्चित्पुनः प्रत्ययुः ।
सर्वास्ताः प्रतिषिध्य काश्चन पुनस्तानब्रुवन्निर्भया
रे रे ब्रूत निरुन्ध केन युवतीः के कस्य वान्तर्व्रजे ॥ १६ ॥

किं प्रश्नैर्बहुभिर्वयं विधिकराः सूनोर्व्रजाधीशितु-
र्दानीनस्य विहारिणो वनभुवि स्वैरं रस····ऽमुना ।
आदातुं दधिदुग्धयोः करमितः सर्वे वयं प्रेषिता-
स्तद्गृह्णीत सुखेन गोपवनिता दत्त्वा स्वकीयान्पथः ॥ १७ ॥

तच्छ्रुत्वा परिहस्य ता अपि मिथः संवीक्ष्य तानूचिरे
तिर्यक्कुञ्चितकंधरैः करतलैर्दत्त्वासकृत्तालिकाः ।
एतैरेव मुखैरभीप्सथ पयः पातुं दधि स्वादुम-
त्तत्प्रक्षाल्य निजान्यमूनि न चिरादागच्छतागच्छत ॥ १८ ॥

काचिद्गोपनितम्बिनी निजकरेणोद्धृत्य किंचिद्दधि
स्वीयं पश्यत जक्षतेति वचनं व्याहृत्य वक्रान्तिकम् ।
गत्वा गण्डतले विलिप्य झटिति प्रत्यागमत्स्वान्तरं
दृष्ट्वा तज्जहसुर्भृशं करतलैरुच्चैरदुस्तालिकाः ॥ १९ ॥

काचित्पाणितलेन कंचिदपरं हत्वा कपोलस्थले
निर्भर्त्स्यैष करं ग्रहीष्यति मुखं शक्तिं च पश्यन्त्विति ।
जल्पन्ती पुरतः कराङ्गुलिपतिं संदर्शयित्वा मुहुः
सर्वाभिः सममन्यतः प्रचलिता मार्गं परित्यज्य तम् ॥ २० ॥

गच्छन्तीरपथेन वीक्ष्य जहसुः संकूर्द्य गत्वा पुरो
याता यूयमिति प्रजल्प्य शिरसः पात्राणि चापाहरन् ।

---

१. दानिनां प्रभोः. २. अङ्गुष्ठम्.

मूढास्तिष्ठत दूरतः किमुत नो जानीथ दासीस्तदे-
त्यूचुस्तान्वृषभानुगोपजनुषः किं वा न तां पश्यत ॥ २१ ॥
कण्ठं श्रीमणिरत्नमौक्तिकसरैर्नानावतंसैरपि
प्रत्यङ्गं वलयैः सुवर्णलशुनै रत्नाङ्गुलीयैरपि ।
हारैः काञ्चनचन्द्रकार्धविधुभिः सीमन्तसंदर्भित-
भ्राजच्चम्पककुड्मलैश्च तिलकैरुद्दीपयन्ती स्मरम् ॥ २२ ॥
नानारत्ननिबद्धकाञ्चनलसत्पर्णच्छदैर्मञ्जुलै-
र्मुक्ताभिः परितो लसत्तनुतरं चित्राञ्चलं बिभ्रती ।
अन्तः कृत्रिमपुत्रिकाविरचनैर्हैमैश्च रौप्यै रसै
राजन्नीलदुकूलमुत्कलयती नीवीं करेण क्वचित् ॥ २३ ॥
खेलत्खञ्जनलोचना नसि[1] लसन्मुक्ताग्ररत्नान्तर-
भ्राजिष्णु प्रसरत्सुवर्णकुसुमा बन्धूकरम्याधरा ।
संसर्पद्दशनांशुभिर्दश दिशोऽप्युद्भासयन्ती मिथः
क्रीडन्ती ललितादिभिः प्रियसखीवृन्दैः समं सस्मिता ॥ २४ ॥
केशग्रन्थिसुरङ्गदोरकमिलत्सौवर्णपथ्यामणि-
द्योतन्मौक्तिकगुच्छवेल्लितगतद्योतन्नितम्बाम्बरा ।
अन्तः सेयमथाविरास शनकैर्मञ्जीरमञ्जुस्वनै
राधा माधवमाकुलं कलयती नेत्राञ्चलान्दोलनैः ॥ २५ ॥
(चतुर्भिः कालापकम्)

मौलौ चन्द्रकशेखरं श्रवणयोरर्कप्रभे कुण्डले
मुक्ता नस्यलिके ललामतिलकं कण्ठे मणिं कौस्तुभम् ।
पाण्योः कङ्कणमङ्गदं च हृदये हारं तथा मौक्तिकं
कौशेयं कनकप्रभं कटितटे बिभ्रत्क्वणत्काञ्चिकम् ॥ २६ ॥
दृष्ट्वा तां निजवल्लभामतिरसादागत्य धृत्वाञ्चलं
नीलेन्दीवरकान्तकोमलतनुः किंचिल्ललल्लोचनः ।
शिञ्जन्नूपुरमञ्जुलैर्निजपदैरुल्लासयन्भूतलं
सर्वाङ्गे वनमालया विलसितः सस्मेरमूचे हरिः ॥२७॥(युग्मम्)

---

१. नासिकायाम्.

मुग्धे त्वं बहुभिर्दिनैरसि मया प्राप्ताद्य चौर्येण य-
न्नित्यं यासि सहालिभिर्दधिपयो विक्रीय विक्रीय वै ।
विज्ञेयं कमलाक्षि तत्परमतो मत्तेभकुम्भस्तनि
त्वां मुञ्चामि तदैव सुन्दरि यदा सर्वस्य दद्याः करम् ॥ २८ ॥

इत्याकर्ण्य कृशोदरी कलपदं मन्दाक्षमन्दाक्षरं
प्रत्यूचे वचनानि सस्मितमुखी त्वं तस्करो वा वयम् ।
तज्जानासि न किं त्वमेव जननीबद्धो यदोलूखले
त्वां किंचिन्नवनीतचोरमजहात्तत्किं त्वया विस्मृतम् ॥ २९ ॥

रे रे चञ्चल मुञ्च मेऽञ्चलमलं किं लोचने नर्तयेः
सख्यः पश्यत धाष्ट्र्यमस्य महितां यन्नात्मनो रक्षति ।
इत्युक्त्वा करतोऽपहृत्य वसनं वंशीं च गत्वा द्रुतं
पश्चादेहि गृहाण चेत्यभिदधे साङ्गुष्ठदर्शस्मितम् ॥ ३० ॥

किं कुर्मः सखि नन्दगोकुलपतिर्ज्ञात्याभिजात्यादिभि-
र्ज्यायांस्तत्तनयस्ततोऽप्यतितरां मान्यो ह्ययं मादृशम् ।
इत्यालोच्य मयानपाश्रितमते रागोऽस्य संस्थीयते
नो चेदद्य तथा क्रियेत पुनरप्येवं न कुर्याद्यथा ॥ ३१ ॥

तत्तस्याः प्रसमीक्ष्य हेलनममी लज्जानमत्कंधरं
गोविन्दं स्मितरोषसुन्दरमुखं तिर्यक्चलल्लोचनम् ।
दृष्ट्वा चोद्धतमन्यवः कृतधियस्तन्नोदिता लुण्ठितुं
धावन्तः परितः पुरंध्रिनिचयं संतर्जयांचक्रिरे ॥ ३२ ॥

जक्षुः केचन नव्यगव्यमितरेऽमत्राणि जह्रुस्ततः
श्रीदामाद्यनुगा व्रजेशजनुषो व्यातेनिरे बल्लवीः ।
इत्थं संभ्रमिता बृहत्कलकलैरूचेऽथ काचिद्वधू-
रायाता किमु लुण्ठितुं करमुतादातुं समादत्त तत् ॥ ३३ ॥

वाचो नः शृणुतान्यतोऽस्त्यपि करो गव्यस्य जातु क्वचि-
द्रीतिः काचन कल्पिता नवनवा युष्माभिरत्रैव वा ।
कस्तूरीघनसारकं मलयजं चैलालवङ्गादयो
विद्यन्तेऽत्र करं ग्रहीष्यति पुनः कस्यात्र तत्कथ्यताम् ॥३४॥

अस्त्येतद्विपिनं वयं युवतयो द्रव्यं च गव्यं परं
कंसश्चोग्रनृपोऽनयं कुरुथ यत्तन्नैव युक्तं ततः ।
किंचान्यत्पथिकाः क्वचित्कलपदं गायन्ति लोलेक्षणा
वक्षोजेषु च बिभ्रति क्वचिदहो गत्वाञ्चलं योषिताम् ॥ ३५ ॥

श्रुत्वा तद्वचनानि गोकुलपतिः प्रत्यब्रवीत्सस्मितं
दत्त्वा यात करं मदीयमखिलं गत्वा नृपस्याग्रतः ।
ब्रूताहं न ततो बिभेमि दलिका चूर्णस्य चैषास्ति व-
स्तस्यापि त्वरितं प्रयात कुरुत स्वंस्वं मनोभावितम् ॥ ३६ ॥

ऊचेऽन्याथ तदा त्वमेव नृपतिः साधूच्यतां तत्करः
कस्यायं च कियान्व्रजेश वनिताहृल्लोचनानन्दन ।
कर्णाभ्यां परिपीय तत्कलगिरः संजातरोमोद्गमा
तस्यापाङ्गतरङ्गभङ्गिजनितानङ्गातुराङ्गी वधूः ॥ ३७ ॥

मौलौ गुम्फितमल्लिकासुमनसां नेत्राञ्जनानां तथा
कर्णस्वर्णजपर्णयोश्च मधुनो बिम्बाधरस्यन्दिनः ।
हारस्यापि च मौक्तिकस्य लुठतः कण्ठे कटिप्रक्वण-
त्किंकिण्याश्च करं प्रयच्छत रणन्मञ्जीरयोः कोटिशः ॥३८॥

तद्भावं मनसावगाह्य मदनेनाविद्धचित्ता भृशं
स्मेरास्या न च भाषितुं समशकंल्लज्जानमत्कंधराः ।
ईषत्कुञ्चितलोचनाञ्चलशरैर्घ्नन्त्यो मुहुर्माधवं
धृत्वा धैर्यमवोचिरे कुचपटैरावृत्य किंचिन्मुखम् ॥ ३९ ॥

श्याम श्यामतमालमञ्जुलतनो दास्यस्तवाज्ञापय
स्वच्छन्दं तदशान गोरसमिमं साकं स्वकैः किंकरैः ।
अन्यच्चापि यदीप्सितं तव हि तद्वक्तुं न शक्ता वयं
गन्तुं चापि भवत्पदाम्बुजरजः काङ्क्षामहे केवलम् ॥ ४० ॥

नीलेन्दीवरलोचनः स भगवानाकर्ण्य तत्सादरं
ताभिर्दत्तमथाजजक्ष सखिभिः साकं दधि स्वादुमत् ।
एतस्या मदमत्तवारणगतेः स्निग्धं निरम्बूज्ज्वलं
मृष्टं नैव तवेति संपरिहसन्नानाविनोदैर्विभुः ॥ ४१ ॥

भुक्त्वा तद्दधि मञ्जुकुञ्जसदनं गत्वा रहः केलिभिः
कृत्वा तल्पमनल्पकल्पकुसुमैर्दत्त्वा सुधामाधुरीम् ।
पीत्वा च स्वरतोऽप्यरीरमदलं धृत्वा हृदा राधिकां
श्रित्वा मन्मथकोटिजित्वरवपुर्हृत्वा नितम्बाम्बरम् ॥ ४२ ॥

रसावेशादेषा धृतसुभगवेषा वरतनु-
र्वेरं वारंवारं विततनयना वल्लववधूः ।
निरीक्ष्य प्रक्षुभ्यन्मदनकदनक्लान्तवदना
न रन्तुं गन्तुं वा गृहमलमभूद्विस्मृतगतिः ॥ ४३ ॥

इत्थं तन्महदद्भुतं व्रजभुवां भाग्योदयं वीक्ष्य ते
ब्रह्मेन्द्रप्रमुखाः सुराः सुमनसां वृन्दैर्मुदावाकिरन् ।
एतैः किं चरितं तपः श्रुतिशिरःसंगीततत्त्वेन य-
त्स्वच्छन्दं विहरन्ति जन्म सफलं कुर्वन्ति चेत्यस्तुवन् ॥ ४४ ॥

धन्येयं धरणी ततोऽपि मथुरा तत्रापि वृन्दावनं
तत्रापि व्रजवासिनो युवतयस्तत्रापि गोपाङ्गनाः ।
तत्राचिन्त्यगुणैकधामपरमानन्दात्मिका राधिका
लावण्याम्बुनिधिस्त्रिलोकरमणीचूडामणिः काचन ॥ ४५ ॥

सौभाग्यं भगवत्प्रियापि नियतं वक्षःस्थलस्थायिनी
मुक्तिश्चापि पदारविन्दमधुनः सौगन्ध्यमाकाङ्क्षति ।
यस्याश्चोपनिषद्रहस्यमपि तद्ब्रह्माद्वयं केवलं
विज्ञानात्मकृपावलोकनमतस्तां वर्णितुं कः क्षमः ॥ ४६ ॥

मदनरसिकमौलेर्वल्लवीभिः सहैवं
विविधललितलीलाकौतुकालापितानि ।
भगवति रतिमन्तः शृण्वतामादरेण
व्रजविपिननिवासं संविदध्युर्जनानाम् ॥ ४७ ॥

तपनतनयातीरे गुञ्जन्मधुव्रतमञ्जुल-
प्रसवनिकरैर्भ्राजत्कुञ्जेऽम्बुजद्युतिरञ्जिते ।

निधुवनविधिश्रान्तां कान्तां मुहुः कुसुमाकरे
रमयति रमारामे श्यामे मनो रमतां सताम् ॥ ४८ ॥

कश्चित्कर्णाटविद्यावनवसतिरभूद्विष्णुशर्मा द्विजन्मा
सोमेनेष्ट्वा च येनोत्तरवयसि पुनर्मुक्तिदामेत्य काशीम् ।
शंभोर्निर्वाणसद्मन्यनुपमविधिभिः कीर्तिमास्थाप्य लोके
संन्यस्याशेषकर्माध्यगमि पदमहो नैति यस्मिन्मनोऽपि ॥ ४९ ॥

अजनिषत तनूजास्तस्य षड् यः कनीया-
नखिलगुणगरीयांस्तत्र यज्ञेश्वराख्यः ।
अजनि च तनयोऽस्माद्वाचिदेवोऽस्य चास्ता-
मगणितगुणधामा लक्ष्मणो माधवश्च ॥ ५० ॥

आद्यो वंशावतंसः सुरुगुरुसदृशः प्रज्ञया विष्णुदेवः
ख्यातो यश्चक्रवर्तीत्यनुपमकवितालब्धकीर्तिः कवीनाम् ।
वृन्दारण्येन्दुनन्दात्मजपदनलिनद्वन्द्वनित्यानुवृत्त्या
प्राप्तान्तःप्रेमभक्तिप्रमुदितहृदयो नन्दनो माधवस्य ॥ ५१ ॥

तस्यासंस्तनयास्त्रयोऽपि सुधियो रामः क्षमाचन्द्रमाः
श्रीमान्विश्वपतिश्च माधव इति ख्याता गुणाम्भोधयः ।
तत्राकारि कनीयसा सुकृतिना चेतश्चमत्कारकं
काव्यं कृष्णकृपाभिलाषमनसा श्रीदानलीलाभिधम् ॥ ५२ ॥

वसुकररसेन्दु(१६२८)वर्षे पक्षे शुक्ले चतुर्दश्याम् ।
चन्द्रे तपसि कृतेयं वारीग्रामे सुराज्ञि शूरजने ॥ ५३ ॥

इति श्रीमद्वृन्दावनचन्द्रचरणारविन्दमकरन्दास्वादमृदितमनोमधुकरेण
भट्टश्रीमन्माधवेन कृतं दानलीलाभिधं काव्यं समाप्तम् ।